ऋग्वेदान्तर्गता

कौषीतकिब्राह्मणोपनिषत्

प्रधानसम्पादकः
सन्निधानं सुदर्शनशर्मा
कुलपतिः

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपति
२००९

S.V. Vedic University Series No: 10
Research & Publications (Special Drive)

ऋग्वेदान्तर्गता

कौषीतकिब्राह्मणोपनिषत्

प्रधानसम्पादकः
सन्निधानं सुदर्शनशर्मा
कुलपतिः

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपति
२००९

Sri Venkateswara Vedic University

S.V. Vedic University Series No: 10
Research & Publications (Special Drive)

ऋग्वेदान्तर्गता

कौषीतकिब्राह्मणोपनिषत्

(व्याख्याचतुष्टयविभूषिता)

प्रधानसम्पादकः
सन्निधानं सुदर्शनशर्मा
कुलपतिः

सम्पादकः
'शास्त्ररत्नाकरः' 'शास्त्रविद्वन्मणिः'
डा. समुद्राल वेङ्कटरङ्गरामानुजाचार्यः

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपति
२००९

Sri Venkateswara Vedic University

S.V. Vedic University Series No: 10
Research & Publications (Special Drive)

KAUṢĪTAKIBRĀHMAṆŌPANIṢAT

of

ṚGVĒDA

With Four Commentaries of Śaṅkarānanda, Viṣṇuvēdayati
Śrī Raṅgarāmānujamuni & Śrī Uttamūru Vīrarāghavācārya

Chief Editor
Prof. Sannidhanam Sudarsana Sarma
Vice-Chancellor

Editor
'Sastraratnakara' 'Sastravidvanmani'
Dr. Samudrala VenkataRanga Ramanujacharyulu

Sri Venkateswara Vedic University
Tirupati.
2009

Sri Venkateswara Vedic University

S.V Vedic University Series No: 10

KAUṢĪTAKIBRĀHMAṆŌPANIṢAT

Chief Editor : Prof. Sannidhanam Sudarsana Sarma.

Editor : Dr. S.V. Ranga Ramanujacharyulu.

© **ALL RIGHTS RESERVED**

Copies : 1000

Price :

Published by : The Vice-Chancellor
S.V. Vedic University
Tirupati.

Designed by : Research and Publications Dept.
S.V. Vedic University
Tirupati.
2009

Sri Venkateswara Vedic University

वेदाचार्यः
सन्निधानं सुदर्शनशर्मा
कुलपतिः



पुरोवाक्

अपरोक्षमेतत् वैपश्चितीचक्षुष्मतां तत्त्ववित्तल्लजानां विदुषां, यद्भारतीय-चिरन्तनतत्त्वविचारधारायाः मूलं स्रोतः वेदान्तापरनामधेया उपनिषद एवेति। पूर्वोत्तरार्धभेदेन भिन्नस्य वेदस्य उपायोपेयनिरूपणमेव प्रधानलक्ष्यमिति तद्विवेचकाः वदन्ति। यज्ञादिक्रियाकलापैरुपास्यमानः सकलदेवतान्तर्यामी परमात्मा मोक्षपर्यन्तान् सकलान् पुमर्थानविकलमेवानुगृह्णाति इति शास्त्रमर्यादा। 'स प्रीतोऽलं फलाय' इति द्रमिडाचार्यवचनेन फलप्रदातृत्वं तस्यैव, नान्यस्य। तादृशसर्वफलप्रदातृभगवदुपासनाः साक्षाद्ब्रह्मविद्याः, प्राणाद्युपाधिकब्रह्मोपासनाः आभ्युदयिकफलप्रदाः इत्युभयप्रकाराः विद्याः उपनिषत्प्रतिपाद्या एव लक्ष्यन्ते। सुप्रसिद्धासु बृहदारण्यकप्रभृतिष्वपि उपनिषत्सु इयं प्रक्रिया जागर्ति।

ऋग्वेदान्तर्गता सम्प्रति प्रकाश्यमाना कौषीतकिब्राह्मणोपनिषद्, चतुर्षु अध्यायेषु पर्यङ्कविद्या - प्रतर्दनविद्या - बालाकिविद्या नाम्ना तिस्रो ब्रह्मविद्याः, विविधाः प्राणब्रह्मोपासनाः आयुष्यादिसाधिकाः निरूपयति। अस्याश्च विविधसाम्प्रदायिकैराचार्यैः प्रणीताः टीकाः, तत्र तत्र विविक्ततया बहुकालात् प्राक् प्रकाशिताः, अधुना एकत्रैव मालारूपेण सङ्गृह्य प्राकाश्यमुपनीयन्ते, दुर्लभापूर्वग्रन्थप्रकाशनविशेषपरियोजनायामिति महान् प्रमोदोऽस्माकम्। अत्र चतस्रः टीकाः समायोजितास्सन्ति इति, तत्त्वबुभुत्सूनामयं विशिष्टव्याख्यासङ्कलनरूपो ग्रन्थः महते उपकाराय भविष्यतीति च आशास्महे।

एतद्ग्रन्थस्य एतादृशस्वरूपसम्पादने कृतविशेषपरिश्रमेभ्यः संशोधनग्रन्थ-प्रकाशनपरियोजनाधिकृतेभ्यः सर्वेभ्यः शुभाभिनन्दनानि वितीर्यन्ते।

एवम् आवेदयिता

सन्निधानं सुदर्शनशर्मा
कुलपतिः

तिरुपतिः
२३.५.२००९.

Sri Venkateswara Vedic University

।। औपनिषदवरिवस्या।।

कौषीतकिब्राह्मणोपनिषदो वैशिष्ट्यम्

कौषीतकिब्राह्मणोपनिषदियम् ऋग्वेदान्तर्गता चतुर्षु अध्यायेषु उपनिबद्धा महीयते। अत्रस्थानि कानिचिद् वाक्यानि ब्रह्मसूत्रभाष्येषु परिगृहीतानि विशेषविचारपदवीं नीतानि दरीदृश्यन्ते। ब्रह्मसूत्रतृतीयाध्यायप्रथमपादगतस्य 'विद्याकर्मणोरिति तु प्रकृतत्वात्' इति सूत्रस्य भाष्ये श्रीमद्भिः शङ्करभगवत्पादैः 'ये वै केचिदस्माल्लोकात्प्रयन्ति; चन्द्रमसमेव ते सर्वे गच्छन्ति' इति कौषीतक्युपनिषदः प्रथमाध्याये पर्यङ्कविद्यायां विद्यमानं वाक्यमुपादाय व्याख्यातम्। प्रायशः भगवद्रामानुज-मध्वाचार्य-श्रीकण्ठ-श्रीकरप्रभृतिभिः सर्वैरपि एतदुपनिषद्-गतवाक्यान्युद्धृत्य व्याख्यातानि। शरीरादुत्क्रान्तस्य विदुषोऽर्चिरादिगतिरुपपन्नेति उपपादयितुं पूर्वोक्तं वाक्यमुद्धृतं श्रीकण्ठेन। एवमेव श्रीकरेणापि। श्रीमद्रामानुजैः पुनः चतुर्थाध्यायतृतीयपादान्तगततृतीयसूत्रव्याख्यानावसरे प्रोक्तम्–

'आदित्यस्याप्यत्र पाठक्रमबाधनेन,' 'देवलोकादादित्यमादित्याच्चन्द्रमसम्' इति बृहदारण्यकवचनानुसारेण क्रममुपादाय देवलोकशब्दाभिहितात् वायोरुपरि निवेशः सिद्ध्यतीति उक्तम्। अत्र प्रस्तुतोपनिषत्संवादो विचारितः।

वल्लभाचार्याः पुनरेवं प्राहुः–'दर्शनाच्च' 'स एनं देवयानं... सब्रह्मलोकम्' इति कौषीतकिश्रुत्या अग्न्यादिलोकप्राप्तिवत्, अविशेषेणैव प्रजापतिलोकप्राप्त्यनन्तरं ब्रह्मलोकप्राप्तिं दर्शयितुं वचनमेतदुद्धृतवन्तः। श्रीमन्तः शङ्करभगवत्पादाः 'साम्पराये तर्तव्याभावात् तथा ह्यन्ये' इति सूत्रेऽपि कौषितक्याः पर्यङ्कविद्यां प्रस्तूय विचारमुपस्थापयन्, 'स एतं देवयानं पन्थानमापद्य अग्निलोकमागच्छति विरजां नदीम्, तां मनसैवात्येति, तत्सुकृतदुष्कृते धूनुते' इति वाक्यमुपादाय विचारितवन्तः।

एतावत्प्रदर्शितैः विविधाचार्यवचनोद्धरणैः इदमवश्यमेवावगम्यते यत्, कौषीतक्युपनिषत् सादरसमादृताऽस्मत्पूर्वाचार्यैः विभिन्नसम्प्रदायसमाश्रयैरिति।

यद्यपि साक्षादस्या उपनिषदः श्रीमच्छङ्करैः रामानुजैर्वा व्याख्यानं न प्रणीतं, तथापि, तन्मतानुयायिभिः श्रीमच्छङ्करानन्द-रङ्गरामानुजप्रभृतिभिः

Sri Venkateswara Vedic University

व्याख्यानिर्माणेन स्वाचार्याभिप्रायाः सम्यगुपदर्शिता इति उपनिषदोऽस्या विशेषोपादेयता अवगम्यते एव।

इदानीमियमुपनिषत् चतुर्षु अध्यायेषु उपलभ्यते। ब्रह्मविद्यात्वेन प्रसिद्धासु विद्यासु, पर्यङ्कविद्या, बालाकिविद्या, प्रतर्दनविद्या इति तिस्रः प्रधानब्रह्मविद्याः, तथा कौषीतकि - पैङ्ग्य- शुष्कभृङ्गारैः प्रधानतया दर्शिताः प्राणविद्या अपि निदर्शितास्सन्ति।

तत्र तावत्प्रथमाध्याये पर्यङ्कविद्यानाम्नी काचन ब्रह्मविद्या निरूपिता।

अत्र च छान्दोग्य-बृहदारण्यादिषु पञ्चाग्निविद्याप्रस्तावे निदर्शितयोः देवयानपितृयाणयोः वर्णनमपि उपलभ्यते। अर्चिरादिगतो यान् यान् लोकान् जीवो गच्छन्नतिक्रामति तेषां लोकानां विविधस्थलेषु ईषद्वैषम्येण निर्देशात्, को वा क्रम आस्थेय इति निश्चेतुं कौषीतकीवचनानि ब्रह्मसूत्रेषु विचारविषयत्वेन स्वीकृतानि, तथा तत्तन्मतावलम्बिभिराचार्यैः स्वाभिमतशैल्या विवृतानि च।

पर्यङ्कविद्याविचारः

यद्यपि एतद्विद्याविषये विशेषो विचारः जागर्ति, यत् किमियं विद्या साक्षात्परब्रह्मविषयिणी? उत, कार्यभूतचतुर्मुखब्रह्मविषयिणी? इति। केचन सम्प्रदायिनः विशेषतः शाङ्करीयाः विद्यामिमां कार्यब्रह्मपरां निरूपयन्ति। अत्र तु साक्षाद्ब्रह्मपरैवेयं विद्या परमपदनिरूपणपरा इति श्रीमद्रामानुजाः, तदनुयायिनश्च व्याख्यान्ति।

कौषीतक्याः प्रथमाध्याये चित्रगार्ग्यायणिश्वेतकेतुसंवादमुखेन पर्यङ्कविद्या अवतारिता। 'सेयं परमपदे पर्यङ्के समुपासीनस्य भगवतो वासुदेवस्य ध्यानरूपा' इति श्रीवैष्णवव्याख्या। अत्र प्रस्तुतो ब्रह्मलोकः विष्णुलोक एवेति विष्णुवेदयतिनाप्युद्घोषितम्। यथा–

'विष्णुलोकस्य मार्गस्था लोकाः सर्वे सदेवताः।
इत्येतदुच्यते श्रुत्या तत्र पूर्वो हि चन्द्रमाः।।' इति।
'निन्दापूर्वं हि सर्वेषां लोकानामुत्तमोत्तमम्।

स्थानं प्रदर्श्यते तत्र तदर्थैषोत्तरा श्रुतिः।।'इत्यपि सर्वोत्तमस्थानपरा इयं विद्येति आवेदयति। अत्र विद्यायां ब्रह्मशब्दः साक्षात्परब्रह्मपर इति रामानुजीयानां विवरणम्। हिरण्यगर्भपर इति शङ्करानन्दस्य व्याख्या।

'ब्रह्मलोकस्य हिरण्यगर्भनिवासस्य'इति।

एवं पर्यङ्कविद्याविषये समन्वयभेदः विस्पष्ट एव। इदमत्रावश्यं ज्ञातव्यम् यत्, अत्र पर्यङ्कविद्यायां प्रस्तुतं स्थानं किमिति छान्दोग्यबृहदारण्यकादिषु निर्दिष्टमस्ति इति। अर्चिरादिगमनप्रस्तावे वैद्युतलोकानन्तरं परमपदात् प्राप्तस्य अमानवपुरुषस्य करस्पर्शात् ब्रह्मप्राप्तिरेव उपवर्णिता। तत्र 'ब्रह्म' शब्दनिर्दिष्टो न चतुर्मुखब्रह्मा अपि तु परमात्मैवेति 'स ब्रह्म गमयति' 'एष देवपथो ब्रह्मपथः' 'एतेन प्रतिपद्यमाना मानवमावर्तं नावर्तन्ते' इति कथनात्, चतुर्मुखब्रह्मपर्यन्तलोकानां पुनरावृत्तिस्थानत्वस्य श्रीगीतायाम् 'आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन' इत्यादिना विशदप्रोक्तत्वात्, अपुनरावृत्तिस्थानं यदत्रोपश्लोक्यते तत् 'परब्रह्मलोक' एव न तु चतुर्मुखब्रह्मलोक इति विज्ञायते। अत्रोपवर्णिता विरजानदी-तिल्यवृक्षार-ह्रदापराजितायतनप्रभृतीनाम् एव ईषन्नामभेदेन मुक्तप्राप्यत्वेन तत्रापि निर्दिष्टत्वात्, उभयत्रापि इयमुपासना परब्रह्मोपासनैव इति निश्चिन्वन्ति श्रीरामानुजादयः।

।। द्वितीयाध्यायगतोपासनाविचारः।।

द्वितीयाध्याये कानिचित्कर्माणि अग्निहोत्रप्रधानानि प्राणोपासनारूपाणि निर्दिष्टानि सन्ति। यद्यपि लौकिकफलसाधकानामेतेषां कर्मणां ब्रह्मविद्यारूपत्वं न भवति, अतः उपनिषदन्तर्गततया एतेषां निरूपणमन्तःकरणविशुद्धिद्वारा ब्रह्म-विद्यायोग्यतासाधकतया इति मन्तव्यम्।

तत्र तावत्, प्राणे ब्रह्मत्वबुद्ध्या क्रियमाणमुपासनमेकं कौषीतकिनामकेन ऋषिणा प्रवर्तितं प्रथमम्। द्वितीयं पुनरेकधनावरोधननामकं पूर्णिमायाममावास्यायां वा शुद्धनक्षत्रे क्रियमाणमग्न्युपासनं धनसाधकतयोपदिश्यते।

अथ दैवस्मरो नाम लोकप्रियतासाधकं पर्वण्यग्निसाधनकं कर्म तृतीयम्। ततश्च सांयमनं प्रातर्दनमिति अग्निहोत्रकर्म श्रैष्ठ्यापदकतया उपदिष्टम्। तदनु

Sri Venkateswara Vedic University

सर्वजित्कौषीतकेः त्रीण्युपासनानि जातपुत्राजातपुत्रक्षेमसाधकानि, जपप्रधानानि निरूपितानि आदित्यचन्द्रोपासनात्मकानि। अथ पुत्रायुः प्रार्थनात्मकमुपासनं मन्त्रानुष्ठानात्मकं समुपक्षिपति उपनिषद्। दैवः परिमर इति अध्यात्ममधिदैवञ्च प्राणोपासनं शत्रुद्वेषादिनिवारणफलकमुपदिश्यते। ततश्च निःश्रेयसादानमिति अपरं कर्म निःश्रेयसफलार्थिन उद्दिश्योच्यते। पितापुत्रीयमिति सम्प्रत्तिकर्म पुत्राभ्युदयसाधकं प्रतिपाद्यते।

एवमेता उपासनाः लौकिकफलसाधिकाः सन्त्योऽपि परमप्रयोजन-साधनोपासनासोपानरूपेण निर्दिष्टा इति मन्तव्यम्।

।। अथ तृतीयचतुर्थयोरुपासने।।

अथ तृतीयाध्याये प्रतर्दनविद्या निर्दिश्यते। इयं हि प्राणेन्द्रशरीरक-परमात्मोपासनैवेति प्रकाशिकाकाराः वदन्ति। प्रायशः सर्वैरप्याचार्यैः अत्रस्थानि कानिचिद्वाक्यानि स्वकीयभाष्येषु व्याख्यातानि। अस्या उपासनायाः किं फलमिति विचिकित्सायां 'स यो मामायुरमृतमित्युपास्ते सर्वमायुरस्मिन् लोके एति, आप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके' इति वाक्यपुरस्कारेण, मधुविद्याया यथा वस्वादिपदप्राप्तिपूर्वकब्रह्मप्राप्तिः फलं, तद्वत् अस्या अपि विद्यायाः चिरायुष्ट्वपूर्वकचिरकालस्वर्गप्राप्तिपूर्वकब्रह्मप्राप्तिः फलमिति वदन्ति।

'तद्यथा रथस्यारेषु...' इत्यादिवाक्यानि भाष्येषु व्याख्यातानि। इन्द्रप्राणाधिकरणभाष्याणि अत्र द्रष्टव्यानि।

चतुर्थाध्याये बालाकिविद्या प्रस्तुता। समन्वयाध्याये चतुर्थपञ्चमे 'जगद्वाचित्वात्' इति सूत्रेण एतत् कौषीतकीश्रुतिगतस्य 'यस्य वैतत् कर्म' इति कर्मपदस्यार्थनिर्धारणात् तदधिकरणं कौषीतकिबालाक्यजातशत्रुसंवादमेव प्राधान्येन अधिकृत्य प्रवृत्तमिति वक्तव्यम्। एतद्विशेषाः भाष्यव्याख्यानेषु समन्वयाध्याये द्रष्टव्याः।

एवं विशिष्टशिष्टपरिगृहीताया अस्या उपनिषदः तिस्रो व्याख्याः, एकः परिष्कारश्च इति आहत्य चतस्रः टीका अत्र सन्दृभ्यन्त इति अपूर्वतास्य प्रकाशनस्य सिद्ध्यति।

Sri Venkateswara Vedic University

अथ व्याख्यातृसङ्ग्रहपरिचयः

दीपिकाव्याख्याता **शङ्करानन्दः** कौषीतकीव्याख्यातृषु चरित्रक्रमेण प्रथमगणनीयो भवति। अयन्तु महानुभावः ईशवीयद्वादशत्रयोदशशतकयोः आसीदिति अवगम्यते।

नृसिंहतापनीदीपिकायां स्वसमाचारं सङ्ग्रहेणैवं समसूसुचत् शङ्करानन्दो यथा-

'कृता मया वेदचतुष्टयेऽपि प्रसिद्धशाखोपनिषत्पदेषु।
व्याख्या, तया तुष्यतु सर्वजीवः आनन्द आत्माद्वय ईश्वरोऽयम्।।'

इति बहुत्र व्याख्यासु स्वीयासु 'आनन्दात्मा' संस्तुतः। तेन चायम् आनन्दात्मशिष्य इत्यवगम्यते। विवरणप्रमेयसङ्ग्रहे, तथा पञ्चदश्यादौ विद्यारण्येनायं नमस्कृतः। तेन चायं विद्यारण्यगुरुरिति स्पष्टम्। 'आनन्दात्मा' इति नामान्तरं विद्यातीर्थस्येति हेतोः , अयं विद्यातीर्थशिष्य इति फलति। शङ्करानन्दस्यैव शङ्करानन्दतीर्थ इत्यपि नामान्तरं जागर्तीति केचन वदन्ति। दासगुप्तमहोदयस्तु स्वीये "HISTORY OF INDIAN PHILOSOPHY" नाम ग्रन्थे विद्यारण्यामलानन्दयोः शङ्करानन्दः गुरुरिति प्राह। नृसिंहतीर्थः पुनरस्य दीक्षागुरुः।

अयं प्रायशः त्रयोविंशतिसङ्ख्याकानामुपनिषदां दीपिकाव्याख्याः प्रणीतवान् इति अमुद्रितपाण्डुलिपिसङ्कलनानुशीलनया स्पष्टीभवति। काश्चनैतदीयाः दीपिकाव्याख्याः आनन्दाश्रमीयोपनिषद्व्याख्यासमुच्चये मुद्रिताः सन्ति। अमुद्रिताः पुनः मद्रासराजकीयहस्तलिखितपुस्तकालये उपलभ्यन्ते।

विष्णुदेवयतेः श्लोकमयी टिप्पणी

अडयारमुद्रिता चेयं व्याख्या लघुकाया अपि मूलग्रन्थतात्पर्यस्य विस्पष्टप्रकाशनाय, नितान्तसमर्था भवति। यद्यपि व्याख्यातुरस्याभिजनादिविषये किञ्चिदपि न ज्ञायते तथापि प्रतिपादानशैलीपुरस्कारेण व्याख्यातुः शैली नितान्तहृद्या इति अवगम्यते। पर्यङ्कविद्याव्याख्यानावसरे कारिकारूपेण सङ्ग्रथितानि एतदीयवचनानि व्याख्याया अस्या विशिष्टताम् अवगमयन्ति।

Sri Venkateswara Vedic University

श्रीमद्रङ्गरामानुजमुनेः प्रकाशिका

श्रीमद्रामानुजसम्प्रदाये उपनिषद्व्याख्यातृत्वेन प्रथितयशस्काः श्रीमन्तो रङ्गरामानुजसंयमीन्द्राः पूर्वाचार्यैः व्याख्याय विसृष्टानेव उपनिषद्ग्रन्थान् व्याख्यातवन्तः। तत्र तावत् ईशावास्यस्य श्रीमन्निगमान्तदेशिक - श्रीकूरनारायण-व्याख्यालाभात् तदुत्सृज्य, तथा सुबालोपनिषदः साक्षात् श्रुतप्रकाशिकाकारैः श्रीमत्सुदर्शनसूरिभिर्व्याख्याप्रणयनात् तामपि उपनिषदमुत्सृज्य प्रायशः भगवद्रामानुजादृताः सर्वा अपि उपनिषदः श्रीमद्भिः रङ्गरामानुजैः व्याख्याताः महीयन्ते।

श्रीमन्तः इमे आचार्याः श्रीभाष्यश्रुतप्रकाशिकाया अपि विवरणरूपं भावप्रकाशिकनामानं व्याख्यानं विधाय, उपनिषद्वाक्यसमन्वये श्रीमद्रामानुजीयां निर्वचनशैलीं रिरक्षिषवः पूर्वव्याख्यात्रसंस्पृष्टान् उपनिषद्ग्रन्थान् श्रीभाष्याधिकरण-समन्वयपुरस्सरं व्याख्याय कृतकृत्यास्समभवन्निति, जानन्ति इमान् महानुभावान् उपनिषद्भाष्यकारत्वेन विद्वत्तल्लजाः। एतदीयां व्याख्यां द्वितीयाध्यायविवरणे मूकां परिलक्ष्य तत्पूरणेन, अपेक्षितपरिष्काराय समुद्युक्ताः श्रीमन्तः उभयवेदान्तनिष्णाताः उत्तमूर् वीरराघवाचार्यस्वामिनः 'भाष्यपरिष्कार' नाम्ना टीकां प्रणीतवन्तः। सापि टीका अत्र समायोजिता, विशेषतः द्वितीयाध्यायगतप्राणोपासना स्वरूपविशदनायेति समावेद्यते।

कौषीतक्युपनिषदः श्रीमदुपनिषद्ब्रह्मयोगिनापि व्याख्या निर्मिता, या किल तदीयान्योपनिषद्व्याख्याभिः समं 'व्याख्यासङ्ग्रह' रूपेण अडयारप्रकाशिता इदानीं विशेषतस्समुपलभ्यत इति नात्र प्रस्तुतप्रकाशने समायोज्यते। तथचात्र शङ्करानन्दस्य दीपिका, विष्णुदेवयतिव्याख्या, श्रीमद्रङ्गरामानुजमुनेः प्रकाशिका, तथा श्रीमदुत्तमूरु वीरराघवाचार्याणां परिष्कार इति चतस्रः टीका अत्र सङ्कलिता इति विदाङ्कुर्वन्तु विद्वांसः।

अस्य च ग्रन्थराजस्य प्रकाशने कृतविशेषादराः श्रीवेङ्कटेश्वर-वेदविश्वविद्यालयकुलपतिमहाभागाः 'वेदाचार्याः' श्रीमन्तः सन्निधानं सुदर्शनशर्माणः विशेषमाननीयाः सादरमिति विज्ञापये। तेषामेव हि अप्रतिहता प्रोत्साहना अपूर्वाणां

बहूनां ग्रन्थानां प्रकाशने मार्गं सुगमं विदधती नवीनस्याप्यस्य संशोधनापूर्वग्रन्थ-प्रकाशनविभागस्य क्रमपरिणतिं स्पृहणीयामायतिं च साक्षात्कारयतीति नातिशयोक्तिः काचित्।

पूर्ववदेव अस्य ग्रन्थस्य एतादृशस्वरूपसम्पादने कृतविशेषपरिश्रमः अस्मद्विभागीययुवोद्योगिवृन्दः श्रीविनायकभट्ट - नरसिंहुलु - सुरेशबाबु - सौजन्या - मनोजकुमारपाडिसमन्वितः विशेषाभिनन्दनीय इति आवेदये। प्रकाशनमिदं विदुषां परितोषाय नूनं भवितेति विश्वसन् विरमति भावत्कः।

ग्रन्थसम्पादकः।

समुद्राल वेङ्कट रङ्गरामानुजाचार्यः।

तिरुपति
२२.५.२००९.

Sri Venkateswara Vedic University

।। कौषीतक्युपनिषत्सङ्ग्रहकारिका: ।।

ऋग्वेदस्य शिरोभूता कौषीतक्यभिविश्रुता।
चतुरध्यायबद्धेयं विविधोपासनात्मिका।।१।।
तत्रादौ वर्णिता सम्यक् पर्यङ्कोपासना शुभा।
देवयानगति:, तत्र गच्छतो मुक्तजीविन:।।२।।
आतिवाहिकदेवानां योग: तल्लोकग: तत:।
चन्द्रलोकसमावाप्ति:, चन्द्रसंवादपूर्वकम्।।३।।
ब्रह्मलोक प्रवेशोऽत्र विरजारस्सरोगति:।
तिल्यवृक्षसमावाप्ति: सालज्यस्थानसेवनम्।।४।।
ब्रह्मालङ्कारसङ्क्लृप्तिस्त्वपराजितधामनि।
ब्रह्मपर्यङ्कसम्प्राप्ति: ब्रह्मसंवादतद्गती।।५।।
प्रथमाध्यायसंदृब्धा विशेषास्सम्भवन्ति हि।
द्वितीये कथिता: प्राणब्रह्मोपासनरूपत:।।६।।
विद्याविशेषा आयुष्यधनमुख्यफला: किल।
कौषीतके: प्राणब्रह्मविद्या ह्यन्नफला, तत:।।७।।
पैङ्ग्यस्य चापि सम्प्रोक्ता, तथैकधनरोधनम्।
तृतीयं, दैवसंस्मार: चतुर्थ:, पञ्चमं तु यत्।।८।।
प्रातर्दनं, तथोक्थं तु शुष्कभृङ्गारदर्शितम्।
षष्ठं, कौषीतके: प्रोक्ता त्रिविधोपास्तिरञ्जसा।।९।।
पुनरावृत्तिरहितस्थानप्राप्तिफला शुभा।
दैव: परिमर: प्रोक्तो दशम:, मृतिहानिकृद्।।१०।।
विद्या चैकादशी, सम्यङ् नि:श्रेयसफला तत:।
द्वादशी, सम्प्रदानाख्यं पितापुत्रीयमन्तिमम् ।।११।।

Sri Venkateswara Vedic University

श्रेयोऽभ्युदयसिद्ध्यर्था विद्या ह्यत्र निरूपिताः।
प्रातर्दनी ब्रह्मविद्या तृतीये सुनिरूप्यते।।१२।।
प्रतर्दनाख्यः शैर्येण स्वर्गं गत्वा शचीपतेः।
समक्षे संवदत्यद्धा ब्रह्मविज्ञानमृच्छति।।१३।।
चतुर्थे ब्रह्मविद्यैव बालाकेः कुरुवासिनः।
काश्यस्याजातशत्रोश्च संवादः सुमनोहरः।।१४।।
एवं बहुविधा विद्या वितता ह्यत्र तात्त्विकाः।
ब्रह्मोपासनवैशिष्ट्यं सम्यगुद्घोषयन्ति हि।।१५।।
ग्रन्थसम्पादकेनेह रङ्गरामानुजेन याः।
कृता विषयसंक्षेपकारिकाः वस्तुदेशिकाः।।
श्रीवेङ्कटपतेः प्रीत्यै भूयासुर्बुधमोदिकाः।।१६।।

Sri Venkateswara Vedic University

विषयानुक्रमणिका

Sri Venkateswara Vedic University

Sri Venkateswara Vedic University

Sri Venkateswara Vedic University

कौषीतकिब्राह्मणोपनिषत्

हरिः ओम्

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविराविर्मर्योऽभूर्वेदसा मत्साऽऽणीर्ऋतं मा मा हिंसीरनेनाधीतेनाहोरात्रात्संवसाम्यग्र इला नम इला नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो नमो वोऽस्तु देवेभ्यः शिवा नः शंतमा भव सुमृलीका सरस्वती मा ते व्योम संदृशि। अदब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः।। १ ।।

वाङ्मे मदीया मनसि प्रतिष्ठिताऽस्तु । मनो मे वाचि प्रतिष्ठितमस्तु। अग्रे दीक्ष इति संबोधनम्। दीक्षा सरस्वती वाग्दीक्षेति व्यवहारात्। सुमृलीका सरस्वती चास्तु। तथा सति सरस्वतीं वाग्देवीं प्रति वचनम्। मूर्तिश्रुतौ मर्यो मूर्तिमती शरीरिणो वेदसा ज्ञानेन लक्षिता त्वमाविराविरभूः 'एत इति वै प्रजापतिर्देवानसृजत। असृग्रमिति मनुष्यान्' इति वेदपदैर्देवादिसृष्टिवचनागदधिष्ठात्री सरस्वती मूर्तिश्रुतावाविर्भूतेत्युक्तम्। अनन्तरं मदिति मत्तः सकाशात्सा त्वमाणीः। अण शब्दे लुङ्। शब्दात्मिका विस्तृताऽभूः । अत ऋतं मा मा हिंसीः। अनेन वक्ष्यमाणेनाधीतेनाहोरात्रात्संवसामि। एकीभावेन वसामि। अग्न्यादीन्नमस्यति। इलाशब्दः कृत्स्नार्थः। अग्रे प्रकृष्टं नम ऋषिभ्यो देवेभ्यश्च नमोऽस्तु। सरस्वती सुखा भव। तेन च व्योम शून्यं मा संदृशि। लुङ्चाऽऽत्मनेपद इति सिज्लुकि रूपम्(?)। यथा सूर्यो ज्योतिषां श्रेष्ठो नान्यथा क्रियते तथा मनोऽदब्धं निर्मलं चक्षुरिषिमिष्टदर्शि दीक्षे मा मा हिंसीर्माऽन्यथा कुरु।। १ ।।

इति शङ्करानन्दविरचितदीपिकाव्याख्योपेता शान्तिः समाप्ता।

Sri Venkateswara Vedic University

शङ्करानन्दविरचितदीपिकाव्याख्या

आनन्द आत्मा स्थिरजङ्गमानामस्त्यत्र चित्रस्तमहं प्रणम्य।
कौषीतकिब्राह्मणमा(गा)त्मविद्यां पदावलोकात्प्रकटीकरोमि।। १।।

विष्णुवेदाख्ययतिव्याख्या

कौषीतकोपनिषद् व्याख्यायते। विष्णुवेदाख्ययतिना कृतायां व्याख्यायां स्फुरितोऽर्थः किंचित् किंचिन्मयोच्यते।

श्रीमद्रङ्गरामानुजमुनीन्द्रप्रणीतप्रकाशिकाव्याख्या

श्रीमते रामानुजाय नमः
श्रीमद्रङ्गरामानुजमुनीन्द्रानुग्रहीता
कौषीतक्युपनिषत्प्रकाशिका

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया।
अञ्जनाचलश्रृङ्गारमञ्जलिर्मम गाहताम्।।
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि।
कौषीतकि(की)श्रुतिव्याख्यां करवाणि यथामति।।

कौषीतक्युपनिषद्भाष्यपरिष्कारः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः
प्रथमाध्यायपरिष्कारः

विद्वद्भिश्चन्द्रमाप्तैरपि विहितमखैः सेव्यपर्यङ्करूपः
प्राणादौ वश्यभूते वशयितुमुचितश्चेन्द्रमुख्यान्तरात्मा।
धाम स्वापादिकर्तुः कृतनिखिलजगद् यो हि कौषीतकीष्टः
श्रीमान् श्रीवेङ्कटाद्रीश्वर इह वितनोत्वञ्जसैष श्रियं नः।।

Sri Venkateswara Vedic University

दीपिका

समधिगतमेतन्निघर्षणादीनां कर्मणां तैजसस्य द्रव्यस्याऽदर्शादेः शुद्धिहेतुत्वम्। तथा चाग्निहोत्रादीन्यश्वमेधान्तानि कर्माणि तैजसस्यान्तःकरणस्य शुद्धिहेतवो विविदिषासाधनत्वस्य श्रुतितोऽप्यवगमाच्च। अपि च स्वर्गादेः कर्मफलस्य सुखविशेषरूपत्वात्तस्य चान्तःकरणप्रसादापरपर्यायत्वात्कर्मिभिरपि कर्मणामन्तःकरणशुद्धिहेतुत्वमङ्गीकृतं यतस्ततस्तानि महता सन्दर्भेण प्रथमतोऽभिधायेदानीं ब्रह्मविद्यां वक्तुं लब्धावसरा श्रुतिः प्रववृते। तत्र चित्रो ह वै गार्ग्यायणिरित्यादिका य एवं वेदेत्यन्ता चतुरध्यायी कौषीतकिब्राह्मणोपनिषत्। आद्येनाध्यायेन पर्यङ्कविद्यां सदक्षिणोत्तरमार्गान्तां द्वितीयेन प्राणविद्यां तद्विदश्च बाह्याध्यात्मिकानि कर्माणि फलविशेषसिद्धये तृतीयचतुर्थाभ्यां चाऽऽत्मविद्यामाह। यद्यपि प्रतर्दनो हेत्यादिकमेव प्रथमतः पठनीयं तथाऽपि शुद्धमप्यन्तःकरणं निर्गुणे ब्रह्मण्यभयेऽपि प्रथमतो ब्रह्मस्वभावमजानद्भयमाप्नुयात्। गर्भस्थप्रोषितपितृको युवेव सद्वृत्तस्थः प्रथमतः पितृदर्शने। ततोऽस्य भयनिरासार्थमुत्तरमार्गोप्यमेतल्लोकस्थराजादिवद्ब्रह्मलोकस्थं सगुणं ब्रह्म प्रथमतः उक्तवती। तत्र च स आगच्छत्यमितौजसं पर्यङ्कम्। स प्राण इति प्राणस्य पर्यङ्कत्वं प्रथमेऽध्याय उक्तम्। तस्मिन्प्राणे भवति श्रोतॄणां जिज्ञासा किमयं श्वासमात्रः प्राण आहोस्विद्विविधभूतिजुष्ट इति। अस्या जिज्ञासाया निवृत्त्यर्थं प्राणोपासनं द्वितीयेनाध्यायेनोपक्रान्तम्। तथा च लब्धावसरोत्तरत्र ब्रह्मविद्यामुक्तवतीत्यदोषः। तत्र ब्रह्मविद्यायाः सगुणाया अपि महद्भिर्गौतमश्वेतकेत्वादिभिरप्यमानित्वादिगुणैर्गुरुमुखादेवावगतिः कृता यतस्ततोऽमानित्वादिगुणैराधुनिकैरप्यधिकारिभिः सगुणा निर्गुणा च ब्रह्मविद्याऽवगन्तव्येत्येतदर्थमाख्यायिका–

प्रकाशिका

अर्चिरादिगतितत्प्राप्यदेशविशेषतद्विशिष्टब्रह्मानुभवप्रकारोपदेशाय आख्यायिकेयमारभ्यते।

परिष्कारः

कौषीतकिब्राह्मणोपनिषदि चतुरध्याय्यां प्रथमेऽध्याये पर्यङ्कविद्या प्रस्तूयते। सेयं परमपदे पर्यङ्के समुपासीनस्य भगवतो वासुदेवस्य ध्यानरूपा। तामिमां प्रस्तोष्यता प्रथमतः चन्द्रं प्राप्तैरपि पूर्वानुष्ठितविद्यैः परमपदं सुखलभ्यमिति कयाचिदाख्यायिकया प्रदर्श्यते

Sri Venkateswara Vedic University

अथ प्रथमोऽध्यायः

* *क्रतुसामान्यस्य गौणमुख्यफलजिज्ञासा* *

चित्रो ह वै गार्ग्यायणिः[१] यक्ष्यमाण आरुणिं वव्रे। स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति।

दीपिका

चित्रश्चित्रनामकः कश्चित् त्रैवर्णिकः। ह किल वै प्रसिद्धः, श्रुतेस्तत्कालीनानां च। गार्ग्यस्य युवापत्यं गार्ग्यायणिः। यक्ष्यमाणः कंचिज्ज्योतिष्टोमादिकं यागं करिष्यमाणः। आरुणिमरुणस्यापत्यं वव्रे सदस्यसप्तदशान्यतमऋत्विक्त्वेन वरणं चक्रे, त्वं मे प्रधानभूतो यज्ञे याजयिता भवेति। स गार्ग्यायणिना चित्रेण वृत आरुणिः। ह प्रसिद्धः श्रुत्यन्तर उद्दालकनामा। पुत्रं पितरं पाप्मनः पुंनाम्नो नरकात् त्रायत इत्यौरसस्तनय इत्यर्थः। तं श्वेतकेतुं श्वेतकेतुनामानं प्रजिघाय प्रहितवान्। तत्प्रेषणमाह याजय हे श्वेतकेतो चित्रं यागं कारय इति, अनेन प्रकारेण

विष्णुवेदाख्ययतिव्याख्या

चित्रो गाङ्ग्याय निर्युष्टुं प्रवृत्तः परमात्मवित् चित्रो नाम्ना गाङ्ग्यायनिर्गोत्रतः मुक्तिसाधनेन यागेन यष्टुं प्रवृत्त आरुणिं पुरोहितं वव्रे। स आरुणिः स्वपुत्रं श्वेतकेतुनामानं प्रेषितवान् त्वमेव गत्वा एनं याजय इति। स यष्टा एनं

प्रकाशिका

चित्रो ह... वव्रे। नाम्ना चित्रः गार्ग्यस्यापत्यं गार्ग्यायणिः चित्रनामा क्षत्रियः आरुणिं गौतमं याजनाय प्रार्थितवानित्यर्थः।।

स... याजयेति। स तु श्वेतकेतुनामानं पुत्रम्, त्वमेव गत्वा याजयेति प्राहिणोत् प्रेषितवानित्यर्थः।।

परिष्कारः

तत्र चित्रनामा क्षत्रियः स्वयं पर्यङ्कविद्यावित् मुमुक्षुर्यष्टुं प्रववृते। याजकस्तु ब्राह्मणः यागेनानेन अयं चन्द्रमण्डलं प्राप्य भोगान् अनुभूय पुनर्निवर्तिष्यते

१. गाङ्ग्यायनिः इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

तं हाऽऽसीनं पप्रच्छ। गौतमस्य पुत्रास्ति संवृतं लोके। यस्मिन्मा धास्यस्यन्यमुताहो[१] वाध्वा।

दीपिका

तं चित्रगृहमागतं पित्रा प्रहितं श्वेतकेतुं ह प्रसिद्धम्। श्रुत्यन्तरे। अभिमानिनं प्रवाहणादिभिः संवादकर्तारमासीनं चित्रदत्ते महत्यासन उपविष्टम्। पप्रच्छ प्रश्नं कृतवान्। चित्रः प्रश्नमाह– गौतमस्य पुत्र हे गौतमगोत्रीयस्यौरस। अस्ति विद्यते संवृत्तं सम्यगावृतं गुप्तं स्थानं बहिर्मुखैरज्ञातमावृत्तिशून्यमित्यर्थः। लोकेऽस्मिन्स्थिरजङ्गमनिवासे यस्मिन्संवृते स्थाने मा मां प्रष्टारं शिष्यभूतं धास्यसि त्वं याजयिता गुरुर्भूत्वा स्थापयिष्यसि तत्राप्यन्यं सर्वस्माज्जगतो भिन्नमुत सर्वजगदात्मभूतं मां धास्यसीत्येकः पक्षो बहिरेवावगन्तव्यः। अहो संबोधने। अन्यत्वपक्षे दोषं दर्शयितुं धारणे गतिमाह- वाध्वा बद्ध्वा काष्ठेनैव काष्ठं निःसन्धिबन्धनं जतुरज्जुलोहादिभिरिव बद्ध्वाऽन्यं मां धास्यसीत्यन्वयः। अन्यशब्दोऽयं तन्त्रेणोच्चारितो लिङ्गव्यत्यासेनावगन्तव्यः। ततोऽस्ति संवृतं स्थानमन्यद्वा। अन्यस्थानपक्ष आह-

विष्णुवेदाख्ययतिव्याख्या

गुरुपुत्रमुपास्य तमर्थं वक्ष्यमाणं पप्रच्छ। तस्यैव व्याख्या कृता। पुरोहितं समभ्येत्य पप्रच्छेदं महामुनिः। इति। तत्र पुरोहितो गुरुपुत्रः।

अस्ति गुह्यं हि लोकेऽस्मिन् हे गोतमस्य पुत्र। संवृतं गुह्यं रहस्यमित्यर्थः। त्वं जानासि किम्?। यत्र मां गमयिष्यसि। यज्ञान्ते यत्र लोके मां गमयिष्यसि।

प्रकाशिका

तं... धास्यसीति। हे गौतमपुत्र! यस्मिन् लोके मां वा अन्यं वा यज्ञाद्यनुष्ठापनेन स्थापयिष्यसि, तस्मिन् लोके रहस्यमुपदेश्यं किञ्चिदस्ति किम्? यस्मिन् लोके मां स्थापयिष्यसि, स्थापयितुमिच्छसि, तस्याध्वा वा कश्चिदस्ति किमित्यर्थः।।

परिष्कारः

यथालोकमित्येव मेने। यतः स न विजज्ञौ काम्यकर्मैकरतेभ्योऽन्येभ्योऽस्य यष्टुर्विशेषम्। तदेष क्षत्रियः याजकस्य यथावस्थितबुद्धिपूर्वकमनुष्ठापकत्वे

१.अन्तमुताहो इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

तस्य मा लोके धास्यसीति। स होवाच। नाहमेतद्वेद हन्ताऽऽचार्यं पृच्छानीति ।

दीपिका

तस्य तस्मिन्नसंवृते स्थाने मा मां राज्यादिवन्तं कंचित्कालं परतन्त्रफलभोक्तारमुक्तम्। लोके धास्यसि, व्याख्यातम्। इत्यनेन प्रकारेण बुद्धिपरीक्षार्थं पितु: सपुत्रस्याभिमानपरिहारार्थं वा राजा पप्रच्छेत्यन्वय:। स गौतमपुत्र: श्वेतकेतुश्चित्रपृष्ट:। ह प्रसिद्ध:। उवाचोक्तवान्। श्वेतकेतूक्तिमाह - नाहमेतद्वेद। अहं श्वेतकेतुरेतत्त्वदुक्तं लोके संवृतमसंवृतं वा स्थानं त्वमाधेयमन्यत्वेन वा बद्ध्वाऽबद्ध्वा वेति न जानामि। हन्त हर्षसंबोधने त्वत्प्रश्ननिमित्तं ममाप्येतदवगतं भविष्यतीत्यर्थ:।

विष्णुवेदाख्ययतिव्याख्या

कार्यकालादिरहितो यत्रासौ भगवान् हरि:। आस्ते इति शेष:। अन्नमिति कार्यम्, अह इति काल: इत्यादि सर्वं बाध्वा बाधित्वा। तद्रहित इत्यर्थ:।यत्र लोके आस्ते भगवान् हरि: परब्रह्मरूपी।

तत्र मां गमय क्षिप्रं तं वेत्सि यदि तत्त्वत:।

मां तस्मिन् ब्रह्मलोके गमय यदि त्वं तं लोकं वेत्सि। इति पप्रच्छेति संबन्ध:।

स पुरोहित उवाच। नाहमेतद्वेद। अहमेतद् गुह्यं न वेद। अहं गत्वा पितरं पृच्छानीत्युवाच।

प्रकाशिका

स... पप्रच्छ। स्पष्टोऽर्थ:।।

परिष्कार:

सत्येव कर्मसाद्गुण्यं मन्वान: याजकमागतं रहस्यमर्थं पप्रच्छ, अथ चाविदुषे तद्रहस्यमुपदिदेशेत्युच्यते चित्र इत्यादिना। भक्त्या सह काम्यस्य,मुक्त्या भुक्तेश्च समाहरणादयमन्वर्थनामा चित्र:। अन्यमहोवाऽध्वा इत्यत्र अहो इत्येतत् आह

Sri Venkateswara Vedic University

स ह पितरमासाद्य पप्रच्छ। इतीति[१] माप्राक्षीत्। कथं प्रतिब्रवाणीति। स होवाच। अहमप्येतन्न वेद। सदस्येव वयं स्वाध्यायमधीत्य हरामहे[२] यन्नः परे ददति।

दीपिका

आचार्यं सर्वज्ञं सर्वशास्त्रार्थस्य ज्ञातारमनुष्ठातारमाचारे स्थापयितारं च पितरं पृच्छानि प्रश्नं करवाणि। पितुर्गमनात्पूर्वं विस्मृतिर्माभूत्तत्र गत्वा प्रश्नं करिष्यामीत्यर्थः। इत्यनेन प्रकारेणोवाचेत्यन्वयः स चित्रदेयोत्ररः श्वेतकेतुः। ह प्रसिद्धः। पितरमाचार्यमारुणिं जनकमासाद्य संप्राप्य। पप्रच्छेति, अनेन वक्ष्यमाणेन प्रकारेण प्रश्नं कृतवान्। तत्प्रश्नप्रकारमाह- इति माऽप्राक्षीन्मां श्वेतकेतुं गौतमस्येत्यादिना धास्यसीत्यन्तेन वाक्येन प्रश्नमकरोत्। कथं प्रतिब्रवाणीत्यस्य प्रश्नस्य केन प्रकारेण प्रत्युत्तरं वदामीत्यनेन प्रकारेण पप्रच्छेत्यन्वयः। स पुत्रपृष्ट आरुणिः। ह प्रसिद्धः। उवाच, उक्तवान्।अहमप्येतन्न वेदाऽऽचार्योऽप्यह मारुणिरेतच्चित्रपृष्टं न जानामि। सदस्येव चित्रस्य गार्ग्यायणेः सभायामेव न त्वन्यत्र वयमारुणिश्वेतकेतुप्रभृतयः। स्वाध्यायमधीत्यैतदर्थप्रतिपादकं वेदभागं सार्थमधिगम्य चित्राद्गार्ग्यायणेः। हरामहेऽधिगच्छामः। यद्यस्मात्कारणान्नोऽस्मभ्यं गौतमादिभ्योऽपरिहार्येभ्योऽव्यर्थोपक्रमेभ्यो याचकेभ्यः परे विद्याधनदातारो ददति प्रयच्छन्ति तच्चित्रो न दास्यतीति शङ्का

विष्णुवेदाख्ययतिव्याख्या

स श्वेतकेतुः पितरमासाद्य इति पप्रच्छ। स चित्र इति माप्राक्षीत्। अस्ति संवृतमित्याद्यप्राक्षीत्। कथं प्रतिब्रवाणि। तं प्रति कथं ब्रवाणि इति पितरं पप्रच्छ।

प्रकाशिका

इत्येतदर्थकम्। संवृतं किञ्चिदस्ति आहो न; अध्वा वा कश्चिदस्ति, आहो नेत्यर्थः। यद्वा अहो इत्याश्चर्ये। तत्र लोके किञ्चित् रहस्यमस्ति; अहो अत्याश्चर्यं तत्।

१.इति ह इति परिष्कारपाठः   २. हवामहे इति परिष्कारपाठः

Sri Venkateswara Vedic University

एह्युभौ[1] गमिष्याव इति।। १ ।।

* *गौणफलं स्वर्गप्राप्तिः पुनरावृत्तिश्च* *

स ह[2] समित्पाणिश्चित्रं गार्ग्यायणिं प्रतिचक्रम उपायानीति। तं होवाच।

दीपिका

न करणीयेत्यर्थः। एह्यागच्छ चित्रं प्रत्युभौ गमिष्याव आवां यास्यावः। इत्यनेन प्रकारेणोवाचेत्यन्वयः।। १ ।।

स आरुणिः। ह प्रसिद्धः। समित्पाणिर्गुरुदर्शनार्थं समिद्धस्तः। चित्रं चित्रनामानं गार्ग्यायणिं गार्ग्यस्य युवापत्यं प्रतिचक्रम उपायानीति त्वां विशिष्टविद्याविदं चित्रं गुरुत्वेनोपागच्छामि प्राप्तोऽस्मीत्यनेन प्रकारेण प्रतिचक्रमे प्रतिचक्राम समीपं गतवान्। तं शिष्यत्वेनाऽऽत्मानं प्राप्तमारुणिं ह प्रसिद्धमुवाचोक्तवान्।

विष्णुवेदाख्ययतिव्याख्या

अहमप्येतत् संवृतं न वेद इत्युक्तवान् स पिता।। १ ।।

स आरुणिः पुरोहितः सन् शिष्यो भूत्वा पुत्रेण सह पलाशदण्डपाणिः चित्रं गाङ्ग्यायनिम् उपायानि अहं त्वामुपायानि शिष्यो भवानीति प्राप्तवान्। तं पुरोहितं गाङ्ग्यायनिरुवाच।

प्रकाशिका

स ह... गमिष्याव इति। अहमपि न जाने। गुरुं रहसि गत्वा रहस्यान् अर्थान् [अ] पृष्ट्वा सदस्येव स्वाध्यायमधीत्य परे यजमानाय यत् द्रव्यं होतव्यमिति प्रयच्छन्ति, तत् जुहुमः। अस्माकं रहस्यार्थपर्यन्तज्ञानं नास्ति। त्वमप्यागच्छ। आवाभ्यां गत्वा स प्रष्टव्य इत्यर्थः।। १ ।।

स... उपायानीति। समिद्भारहस्तस्सन् चित्रनाम्नः क्षत्रियस्य समीपे, शिष्यस्सन् उपगच्छामीति प्रववृते।।तत् किं ज्ञायते, अध्वा वा किं ज्ञायत इति प्रश्नार्थः। **इति ह... प्रतिब्रवाणीति।** इतीत्येतत् उक्तार्थप्रकारवचनम्।एवं प्रकारेण मां पृष्टवान् ; कथमस्योत्तरं ददामीति।।

१.उभौ इति विष्णुवेदयतिपाठे नास्ति २.स हि इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

ब्रह्मार्घोऽसि[1] गौतम[2]। यो न मानमुपागाः। एहि व्येव त्वा ज्ञपयिष्यामीति[3]।

दीपिका

चित्रोक्तिमाह– ब्रह्मार्घो ब्रह्मणो हिरण्यगर्भस्य परस्य ब्रह्मणो वाऽर्घोर्घ्यं पूजेति यावत्। तद्यस्य स ब्रह्मार्घो ब्रह्मवन्माननीय इत्यर्थः। असि भवसि। गौतम हे गौतमगोत्रीय। तत्र कारणमाह- यो वेदविदामग्रणीर्मद्गुरुभूतो याजकः सन्मया पुत्रद्वारेण पृष्टो न मानमुपागा मां शिष्यभूतं प्रष्टुं समागतो भवान्न तु किमनेन शिष्यभूतेन पृष्टेनेत्यभिमानं गतवान्। एह्यागच्छ व्येव त्वा ज्ञपयिष्यामि त्वां गौतमं विज्ञापयिष्याम्येव स्पष्टं बोधयिष्यामि न तु संदेहादिकं जनयिष्यामि। इत्यनेन प्रकारेण प्रतिज्ञामकरोदिति शेषः।

विष्णुवेदाख्ययतिव्याख्या

त्वामहं प्रष्टुमिच्छामि सर्वज्ञो ह्यसि मे मतः।
प्रशस्य तं महाबाहुः प्रवक्तुमुपचक्रमे।

हे गौतम त्वं ब्रह्मार्घोऽसि यो अस्मान्नाभिमानमुपागात् इति तं प्रशस्य प्रवक्तुं रहस्यमुपचक्रमे। कुतः? गुरुणा शिष्यं संभाव्य ज्ञानं वा कर्म वा वक्तव्यमिति प्रदर्शनार्थं प्रशस्येत्युक्तम्। एहि आगच्छ। त्वां रहस्यं विज्ञापयिष्याम्येवेत्युवाच चित्रः। स चित्रः शिष्यं प्रति प्रोक्तवान्।

प्रकाशिका

तं... ज्ञापयिष्यामीति। यस्त्वमभिमाननोपागाःउत्यक्ताभिमान एव सन् शिष्योऽहमित्यागतोऽसि, स त्वं ब्रह्मर्घोसि। ब्रह्मत्वेन ब्राह्मणत्वेन अर्घ्योऽमि पूज्योऽसि। ब्राह्मणस्त्वं क्षत्रियेण मया उपनीय शिष्यभावं प्रापयितुमयोग्यः।

परिष्कारः

यत्र लोके धास्यति तत्र रहस्यं जानासि किमिति पृष्टवानयं राजा, धास्यसीति पदं प्रयुञ्जानः, त्वं स्थापयितुं तत्रेच्छसि। अहं तु न तत्र स्थास्यामि

१.ब्रह्मार्घ्योऽसि इति परिष्कारपाठः २. गोतम इति विष्णुवेदयतिपाठः

३. ज्ञापयिष्यामि इति परिष्कारपाठः

Sri Venkateswara Vedic University

स होवाच। ये वै के चास्माल्लोकात्प्रयन्ति। चन्द्रमसमेव ते सर्वे गच्छन्ति।

दीपिका

स चित्रः कृतप्रतिज्ञः। ह प्रसिद्ध उवाचोक्तवान्। प्रथमतो गुप्तं स्थानं भेददर्शिनां कर्मिणामाह- ये वै के च ये के च त्रैवर्णिकाः प्रसिद्धाः अग्निहोत्रादिकर्मानुष्ठातारः। अस्मात्प्रत्यक्षाल्लोकादवलोकनयोग्यात् त्रैवर्णिकदेहात्। प्रयन्ति, अपसर्पन्ति म्रियन्त इत्यर्थः। चन्द्रमसमेव ते सर्वे गच्छन्ति ते विमुक्तदेहाः कर्मिणो निखिला धूमरात्रिकृष्णपक्षदक्षिणायनाकाशान्गत्वाऽनन्तरं कर्मफलभूतं स्वर्गापरपर्यायं चन्द्रमण्डलं गच्छन्ति न त्वादित्यादिकम्।।

विष्णुवेदाख्ययतिव्याख्या

विष्णुलोकस्य मार्गस्था लोकाः सर्वे सदेवताः।
इत्येतदुच्यते श्रुत्या तत्र पूर्वो हि चन्द्रमाः।

ये के चास्माल्लोकात् परतो गच्छन्ति ते सर्वे प्रथमतश्चन्द्रमसं गच्छन्ति।

निन्दापूर्वं हि सर्वेषां लोकानामुत्तमोत्तमम्।
स्थानं प्रदर्श्यते तत्र तदर्थैषोत्तरा श्रुतिः।

चन्द्रादीनां लोकानां सर्वेषामुत्तरोत्तरत्वम्। प्रथमं चन्द्रमसं प्रविशति।

प्रकाशिका

तूष्णीमेवाऽऽयाहि, त्वां ब्रह्म विज्ञापयिष्यामि इति।।

स ह... गच्छन्तीति। ये केचन इष्टापूर्तादिकारिणः विद्वांसश्च, ते सर्वे चन्द्रमसं गच्छन्तीत्यर्थः। इयांस्तु विशेषः – इष्टादिकारिणस्तु घूमरात्र्यपर-पक्षदक्षिणायनपितृलोकाकाशक्रमेण चन्द्रमसमायान्ति। विद्वांसस्तु अर्चिर्दिन-पूर्वपक्षोदगयनसंवत्सरवायुलोकादित्यक्रमेण चन्द्रमसमुपयान्तीति।

इदञ्च वाक्यं तृतीयाध्याये वैराग्यपादे चिन्तितम्। तत्र हि– अनिष्टादि-कारिणामपि च श्रुतम्। ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्तीत्यविशेषश्रवणात् इष्टादिकारिणामिव अनिष्टादिकारिणामपि

परिष्कारः

इति सूचयतीव। तदयं, किं, सर्वेषामिष्टापूर्तादिकारिणामिव स्वात्मनोऽपि

Sri Venkateswara Vedic University

प्रकाशिका

चन्द्रप्राप्तिरस्त्येवेत्यर्थः। तर्हि सुकृतकारिणां दुष्कृतकारिणाञ्च चन्द्रप्राप्तिसत्त्वे,को विशेष इत्यत्राह संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्। तुशब्दः शङ्कां व्यावर्तयति। संयमनेयमशासने सति इतरेषान् अनिष्टादिकारिणां यमयातनाः अनुभूय चन्द्रारोहावरोहौ। अयं लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे इति अनिष्टादिकारिणां यमवश्यतादर्शनात्। स्मरन्ति च। सर्वे चैते वशं यान्ति यमस्य भगवन् किल इति यमवश्यतास्मरणात्। अपि सप्त पापकृतां गन्तव्यत्वेन रौरवादीन् सप्तनरकानपि स्मरन्ति। ननु सप्तषु लोकेषु गच्छतां कथं यमसदनप्राप्तिः? तत्राह– तत्रापि तद्व्यापारादविरोधः। तेष्वपि सप्तषु यमाज्ञयैव गमनादविरोधः। अतः अनिष्टादिकारिणामपि यमलोकं प्राप्य स्वकर्मानुरूपं यातनाश्चानुभूय पश्चात् चन्द्रारोहावरोहौ स्तः।

इति प्राप्ते उच्यते– विद्याकर्मणोरिति तु प्रकृतत्वात्। तु शब्दः शङ्कानिवृत्त्यर्थः। देवयानपितृयाणे हि फलभूते विद्याकर्मणोरित्यवसीयते। तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति, अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते, ते धूममभिसंभवन्ति, इति विद्याकर्मणी प्रकृत्य हि देवयानपितृयाणे आम्नायेते। अतो विद्याकर्मविधुरेष्वनिष्टादिकारिषु

परिष्कारः

चन्द्रमण्डलगमनं संमन्यते, आहो नेति गौतमः संदिदेह।तत्र राज्ञा स्पष्टमुत्तरं दत्तम्, ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति इति। इष्टापूर्तादिकारिणां मध्ये केचिद् गच्छन्ति, मादृशा न गच्छन्तीति न। सर्वेऽपीष्टादिकारिणो गच्छन्त्येवेत्यर्थः। अत्र पूर्वं यागस्य प्रस्तुतत्वात्, तस्य लोकविशेषलाभार्थतायाः यस्मिन् लोके धास्यसि इत्यवगमितत्वात् लोकार्थमिष्टादिकारिणो ये, त एव सर्वे इति पदेन प्रकरणवशाद् गृह्यन्ते। न तु इष्टादिकारिव्यतिरिक्तानामप्यविशेषाद्ग्रहणम्। कतिपयेष्टादिकारिपुरुषाग्रहण शङ्कापरिहारार्थतया सर्वपदसार्थक्यात्। अर्चिरादिमार्गगामिनामिव अन्येषामपि इष्टादिकारिव्यतिरिक्तानां चन्द्रमण्डलारोहावरोहाभावाच्च। अयमर्थः अनिष्टादिकार्यधिकरणेऽपि निष्टङ्कितः। तथा च श्रीभाष्यम्,'सर्वे गच्छन्ती'त्येतदपि

Sri Venkateswara Vedic University

प्रकाशिका

देवयानपितृयाणासंभवात् न चन्द्रप्राप्तिः। ये वै के चास्मल्लोकात् प्रयन्ति इति वचनम् इष्टादिकारिसर्वविषयं नेतव्यम्।

नन्वनिष्टादिकारिणां चन्द्रप्राप्त्यभावे पञ्चमाहुत्यसंभवात् शरीरारम्भ एव नोपपद्यते। तत्राह न तृतीये तथोपलब्धेः। तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम् इति तृतीयस्थानशब्दि तानामनिष्टादिकारिणां क्षुद्रजन्तूनां न पञ्चमाहुत्यपेक्षा। तथा ह्युपलभ्यते, तेनासौ लोको न संपूर्यत इति। तृतीयस्थानेन हि(?) असौ चन्द्रलोको न प्राप्यत इति हि तस्यार्थः। स्मर्यतेऽपि च लोके। केषाञ्चित् पुण्यकर्मणामपि द्रौपदीदृष्टद्युम्नप्रभृतीनां पञ्चमाहुत्यनपेक्षयैव देहारम्भो भारतादिषु स्मर्यते।

दर्शनाच्च। तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजम् उद्भिजम् इति। श्रुत्युपात्ताण्डजजीवजोद्भिज्जलक्षणभूतजाति(तः?)मध्ये केषाञ्चिदुद्भिज्जानां वृक्षादीनां पञ्चमाहुत्यनपेक्षा लोके दृष्टा। ननु, तेषां खल्वेषां भूतानां त्रीण्येव इत्यवधारणं नोपपद्यते। स्वेदजानामत्रानुपात्तत्वात्। तत्राह– तृतीयशब्दावरोधः संशोकजस्य। संशोकजस्य स्वेदजस्यापि आण्डजम् उद्भिज्जम् इत्यत्र तृतीयेनोद्भिज्जशब्देनावरोधःसंग्रहो विद्यत इत्यर्थः। अतः केवलपापकर्मणां चन्द्रप्राप्तिर्न भवतीति स्थितम्। प्रकृतमनुसरामः।।

परिष्कारः

वचनम्, य इष्टाधिकारिणः ते सर्वे इति परिणेयम्’ इति। एवञ्चेहोपनिषद्भाष्ये, ये केचन इष्टापूर्तादिकारिणो विद्वांसश्च ते सर्वे चन्द्रमसं गच्छन्तीति विदुषामपि सर्वपदेन ग्रहणेनार्थवर्णनम्, प्रकृतस्य यष्टुश्चित्रस्य विदुषोऽपि अविद्वद्रूपेष्टादिकारिण इव सर्वपदेन ग्रहणमस्तीत्याशयेनेति द्रष्टव्यम्। इष्टादिकारिभिन्नस्य विदुषोऽपि सर्वपदग्राह्यत्वे श्रीभाष्याभिमते तु ‘विद्याकर्मणोरिति तु, प्रकृतत्वात्’ इति सूत्रस्य, विद्यायाः कर्मणश्च फलभूता चन्द्रलोकप्राप्तिः नानिष्टादिकारिणो भवति इत्येवार्थो भाषितव्यः स्यादिति ध्येयम्।

अत्रेदं बोध्यम्– उपरि, ‘तेषां प्राणैः पूर्वपक्ष आप्यायते’ इति वाक्ये

Sri Venkateswara Vedic University

परिष्कारः

तेषामिति इष्टादिकारिणामेव ग्रहणम्। न तु तद्भिन्नानां विदुषाम्; तेषामर्चिरादिमार्गे चन्द्रप्राप्तिसत्त्वेऽपि चन्द्रस्य तदा तदधीनवृद्ध्यभावात्। स्वर्गानुभवार्थं गच्छतामेव सोमराजभावस्य प्रामाणिकत्वात्। विदुषां तु आतिवाहिकान्तरैरिव चन्द्रेणापि सोपचारं स्वस्थानादतिवहनमात्रम्:न तु तत्र सर्वथा स्थापनादि। एवञ्च तत्पूर्ववाक्येऽपि ते सर्वे इति इष्टादिकारिमात्रग्रहणमेव युक्तम्। ननु तर्हि इष्टादिकारिषु केषाञ्चित् चन्द्रेण विसृज्यमानत्वमर्चिरादिगमनञ्च कथ्यमानं कथं घटत इति चेत्- उच्यते। अत्रेष्टादिकारी विद्वान् अविद्वांश्चेति द्विविधः। अविद्वानिव विद्वानपि कश्चित् चन्द्रमण्डले भोगं कञ्चित् कालमनुबुभूषुरिष्टादिकार्यपि भवति चेत्, स तद्भोगावसाने चन्द्रेण पृष्टवता मोक्षायातिसृज्यत इति। तत्रायं कर्मफलस्यानुभूतत्वात् विद्याफलानुभवायार्चिरादिमार्गे प्रविशति। न त्वयमर्चिरादिद्वारा प्राक् चन्द्रमण्डलं प्राप्तः। चन्द्रप्राप्तेर्विद्याफलत्वे हि अर्चिरादिमुखेन सा स्यात्। इष्टिफलत्वात्तु धूमादिमार्गेण चन्द्रगमनमेव युक्तम्। तत्र भोगानुभवात् पश्चादेवार्चिरादिगमनम्। तदेवोच्यते, स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति इत्यादिना। न च तर्हि, 'यथाकर्म यथाविद्यं तमागतं पृच्छति' इति विद्याफलतया चन्द्रगमनवर्णनं कथं घटत इति वाच्यम्- तस्य वाक्यस्य विद्याफलत्वप्रतिपादने तात्पर्याभावात्, केवल- कर्मी विद्वांश्च स्वकृतेष्टादिक्रियानुसारेण य आगच्छति तमित्यत्रैव तात्पर्यादित्येका निरूपणसरणिः। अन्या तु- धूमादिमार्गेणेव अर्चिरादिमार्गेणापि चन्द्रगमनसद्भावात् तदेव यथाकर्म यथाविद्यमिति विवक्षितम्। एवञ्च ते सर्वे गच्छन्तीत्येतत् इष्टादिकारिभिन्नविद्वद्विषयकमपि। ततश्च चन्द्रगमनमिदं विद्याफलभूतमेव। न चैवमर्चिरादिमार्गेण प्राप्तचन्द्रस्य पुनः, अग्निलोकमागच्छति इत्यादिना आदितो गमनावर्णनं कथं घटत इति वाच्यम्। तस्य वाक्यस्य चन्द्रप्राप्त्यनन्तरमर्चिरादिगतेरादितः प्राप्तिवर्णने तात्पर्याभावात्, केवलमर्चिरादि-मार्गसत्तामात्रे तात्पर्यात्। यथा तत्र वायुलोकवरुणलोकादीनामत्र स्थितः क्रमः अविवक्षितः, तथा चन्द्रलोकप्राप्त्यनन्तरमग्निलोकगमनवर्णनमप्यविवक्षितमेव। इष्टिविशेषं कृत्वा विद्यामनुतिष्ठन् चन्द्रमस्संवादक्रममपि करिष्यमाणं गतिमिव चिन्तयन्नास्त यः, स

Sri Venkateswara Vedic University

परिष्कारः

यथाकर्म यथाविद्यं विद्याफलतया अर्चिरादिमार्गप्रवेशमेव प्रथमं प्राप्य चन्द्रं - प्राप्नोति। स चातिसृज्यत इति। तृतीया तु- चन्द्रमस्संवादचिन्तासद्भावात् विद्याकर्मोभयफलतया अर्चिरादिमुखेनैव चन्द्रप्राप्तिरस्तु। अवश्यगन्तव्यमार्गमध्य-गतस्य मार्गान्तरेण गमनकल्पने गौरवाच्च। अथापि ते सर्वे इत्यत्र श्रीभाष्य-स्वारस्यात् इष्टादिकारिव्यतिरिक्तस्य विदुषोऽनिष्टादिकारिण इवाग्रहणमेवेति। अत्र अधिकरणसारावलिश्लोकोऽप्यनुसंधानमर्हति—

> पूर्वे धूमादिमार्गे सुकृतिषु कथिता चन्द्रमःप्राप्तिरन्या
> सायुज्यं न्यासविद्याप्रकरणपठितं चान्द्रमन्यादृगुक्तम्।
> अन्याऽत्रार्चिर्मुखानामतिवहनकृतामष्टमस्याप्तिरिन्दोः
> इत्थं सुस्था व्यवस्था प्रणिहितहृदयैरेवमन्यच्च सूह्यम्।। (५०८)

इति। अत्र चतुर्थपादान्ते प्रणिहितहृदयैरित्यादिकं नूनं प्रकृतकौषीत-क्युक्तचन्द्रमस्संवादाभिप्रायेणैवेति ज्ञायते। पूर्वदर्शितत्रिविधचन्द्रप्राप्तिप्रकारवत् अयं चतुर्थोऽपि प्रकारः इष्टिसहकृतविद्याफलभूतः, यः खलु न्यासविद्याप्रकरणपठितवत् न दक्षिणायनमृतमात्रविषयकः, किन्तु अन्यादृशः संवादपूर्वमतिसर्गसंपादकश्चेति। अत्र अर्चिरादिमार्गेण चन्द्रं गत्वा संवादो विवक्षित इति श्रीभाष्यतोऽपि ज्ञायते। तथा ह्यासृत्युपक्रमाधिकरणे, उपलभ्यते हि देवयानेन पथा गच्छतो विदुषः, तं प्रतिब्रूयात्- इति चन्द्रमसा संवादवचनेन शरीरसद्भावः इति। न ह्यत्र गच्छत इत्यस्य, गमिष्यतः स्थूलदेहात् उत्क्रान्तस्येत्यर्थवर्णनं रुचिरम्। अत इह अर्चिरादिक्रमेण चन्द्रमः प्राप्तिवर्णनं सुस्थमिति।

ननु 'यक्ष्यमाण आरुणि वव्रे' इत्युपक्रमबलात् चन्द्रलोकप्राप्ते यागफलत्वावसायात् कथमर्चिरादिना तत्प्राप्तिरिति चेत्- उपरि यथाकर्म यथाविद्यं तमागतमिति विद्याफलभूतमागमनमिति वर्णनात् तस्य चागमनस्य अर्चिरादिमार्गेणैव युक्तत्वात् उपक्रमबलेन चन्द्रलोकलभ्यफलस्य यागसाध्यत्वेऽपि तदर्थमागमनं न यष्ट्रन्तराणामिव धूमादिमार्गेण, किन्तु प्रधानभूतविद्या फलभूतमोक्षार्थोपन-तार्चिरादिमार्गेणैवेत्यवसीयत इति। अत एवोपक्रमेऽपि अध्वा वा तस्येति प्रकृतस्य

Sri Venkateswara Vedic University

तेषां प्राणैः पूर्वपक्ष आप्यायते। तानपरपक्षे न प्रजनयति। एतद्वै स्वर्गस्य लोकस्य द्वारं यश्चन्द्रमाः।

दीपिका

तेषां स्वर्गिणां कर्मिणां प्राणैरिन्द्रियैः प्राणापानादिसहितैः पूर्वपक्षे शुक्लपक्ष आप्यायत आप्यायनं गतो भवति चन्द्रमा राजभृत्यकरादिभिरिव राजा तान्कर्मिणः प्राणानपरपक्षे कृष्णपक्षे न प्रजनयति नोत्पादयति। अयमर्थः। क्षीणभृत्यश्चैवित इव राजा परिवाराणां न जनयति द्रव्यलाभम्। एवं चन्द्रः क्षीणः स्वर्गिणां तृप्तिम्।।

एतदुक्तं चन्द्रमण्डलं वै प्रसिद्धममृतरूपं स्वर्गस्य लोकस्य स्वर्गाख्यस्य स्थानस्य द्वारं गृहस्येवान्तः प्रवेशमार्गः। एतच्छब्दार्थमाह- यः प्रसिद्धश्चन्द्रमा इन्दुः।

विष्णुवेदाख्ययतिव्याख्या

स चन्द्रमास्तेषां प्राणैः पूर्वपक्ष आप्यायते पूर्वपक्षे क्रमेण कलाभिर्वर्धते। तान् जीवान् क्रमेणापरपक्षेण प्रजनयति। पर्जन्यो भूत्वा वर्षति। तत ओषधिरसं पुरुषे प्रवेश्य प्रजनयति। एतत् स्वर्गस्य लोकस्य द्वारं पितृयाणमार्ग इत्यर्थः यच्चन्द्रमाः।

प्रकाशिका

तेषां... प्रजनयति। तेषाम् इष्टादिकारिणां प्राणैः इन्द्रियैः मनोहस्तादीन्द्रियजन्यदानहोमादिभिः पूर्वपक्षे चन्द्रः आप्यायते संवर्ध्यते। ओ प्यायी वृद्धौ इति हि धातुः। अग्नौ हुतञ्च दत्तञ्च सर्वे सोमगतं भवेत् इति स्मरणात्। तान् इष्टादिकारिणः अपरपक्षेण पञ्चदशभिर्दिनैः प्रजनयति ग्राहयति। स्वावयवभूताः कलाः आशयतीत्यर्थः। कलाभिस्तर्पणं करोतीति यावत्। पुरोवातो गाः प्रजनयति इत्यत्र प्रजनयतीत्यस्य गन्धं ग्राहयतीत्यर्थपरत्वदर्शनादिहापि प्रजनयतीत्यस्य ग्राहयतीत्यर्थ उपपद्यते। अपरपक्षेनेति पाठे णत्वाभावश्छन्दसः।।

एतद्वै.... यश्चन्द्रमाः। स्वर्गस्य लोकस्य भगवल्लोकस्य द्वारं दौवारिकप्राय इत्यर्थः।।

परिष्कारः

विदुषो यष्टुः यष्ट्रन्तरगम्यादध्वनो विलक्षणोऽध्वा चन्द्रलोकफलात् प्रागेवेति ज्ञायत इति सुवचम्। न च आतिवाहिकान्तरैरिव चन्द्रेणापि सोपचारं सगौरवं प्रत्युद्गम्य

Sri Venkateswara Vedic University

तं यः प्रत्याह। तमतिसृजते। अथ य एनं न प्रत्याह। तमिह वृष्टिर्भूत्वा वर्षति।

दीपिका

संवृतं स्थानं विवक्षुराह– तं चन्द्रमसं दक्षिणमार्गाख्यं योऽधिकार्यमानित्वादिगुणः प्रत्याह निराचष्टेऽहमेतस्मिन्संततसंपाते न गमिष्यामीति तं निराकृतचन्द्रमसमतिसृजते चन्द्रमसमतीत्य विद्युदाद्यातिवाहिकेषु सृजत उत्पादयति। उपासनासंकल्पो ब्रह्मलोकं नयतीत्यर्थः। अथ पक्षान्तरे यः कर्मी स्वर्गाभिलाषवान्। एनं चन्द्रमसं न प्रत्याह न निराचष्टे गमिष्याम्यहं स्वर्गमिति संकल्पवानित्यर्थः। तं कामिनं स्वर्गनिवासम्। इहास्मिंल्लोके रमणीयारमणीयचरणफलभूते वृष्टिर्भूत्वा कर्मफलोपभोग-नियमोऽनुशयसहितो वर्षधाराभावं प्राप्य वर्षति मेघोदरेभ्यो नीरधाराभिः सहानुशयिनं मुञ्चति।।

विष्णुवेदाख्ययतिव्याख्या

तं चन्द्रमसं यः प्रतिवक्ति कोऽसीत्युक्ते सति चन्द्रस्तं त्यजति। य एनं चन्द्रमसं न प्रतिवक्ति स चन्द्रः तं जीवं वृष्टिर्भूत्वा भूमौ वर्षति। स जीव इह लोके

प्रकाशिका

तं यः प्रत्याह तमतिसृजते। **य एनं न … प्रत्याजायते।** चन्द्रः स्वप्रश्नस्य यः सदुत्तरं प्रयच्छति, तमतिसृजते भगवल्लोकगमनाय तमनुजानाति। यस्तु प्रतिवक्तुमशक्तः, तम् अविद्वांसम्, यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुम्। वायुर्भूत्वा धूमो भवति। धूमो भूत्वा अभ्रं भवति। अभ्रं भूत्वा मेघो भवति। मेघो भूत्वा प्रवर्षति।

परिष्कारः

गृहीतो मुमुक्षुः कथं तेन, कोऽसि इति पृच्छ्यत इति वाच्यम्– अमुमुक्षुवत अर्वाचीनावान्तरफलानुभवनिमग्नतादशायां कोऽसीति पृच्छ्यमानत्वे बाधकाभावात्। अमुमुक्षुतुल्यदशामुपेक्ष्य मोक्षत्वरासंपादकतयाऽनुकूलत्वाच्च। तमागतं पृच्छतीति। आगत्यानुभूतफलं तं पृच्छतीत्यर्थः। प्रतिब्रूयादित्यत्र य इति शेषः। अस्य प्रतिसंबन्धि तमतिसृजत इति वक्ष्यमाणतत्पदम्।

Sri Venkateswara Vedic University

स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परश्वा वा पुरुषो वान्यो वैषु स्थानेषु प्रत्याजायते यथाकर्म

दीपिका

स वृष्टिरूपेणाऽऽगतो भूलोकमनुशयी यदि कपूयचरणस्तदा दक्षिणोत्तरमार्गाद्भ्रष्ट इहास्मिल्लोके कीटो वा कीटो वज्रसारसमानोऽल्पकायो जीवविशेषः। वाशब्दात्पिपीलिकादिः। पतङ्गो वा पतङ्गो दीपतेजोविरोधी क्षुद्रो जीवः। वा शब्दात्खद्योतादिः। शकुनिर्वा शकुनिः पक्षी। वाशब्दाद्वानरादिः। शार्दूलो वा शार्दूलो व्याघ्रः। वाशब्दात्सूकरादिः। सिंहो वा सिंहो गजघातको जीवः। वाशब्दात्सरभादिः। मत्स्यो वा मत्स्यो मीनः। वाशब्दान्मकरादिः। परश्वा वा परश्वा दन्दशूकविशेषः। वाशब्दाद्वृश्चिकादिः। यदा कपूयरमणीयोभयचरणस्तदा पुरुषो वा पुरुषो नरः। वाशब्दन्नारी नपुंसकं च । पुरुषस्यापि रमणीयचरणबाहुल्ये ब्राह्मणत्वादिकमवगन्तव्यम्। एवं शुभाशुभचरणमभिधाय पुनः प्रकृतं कपूयचरणं संक्षेपेणाऽऽह– अन्यो वोक्तेभ्योऽन्यो दुःखभागी जङ्गमः। वाशब्दात्स्थावरः। एतेषु पूर्वोक्तेषु कीटादिषु स्थानेषु पूर्वोक्तेषु देहेषु। अनुशयवान्प्रत्याजायते स्वर्गात्प्रत्यागत्य समन्तादुत्पद्यत इत्यर्थः। उत्पत्तौ निमित्तमाह- यथाकर्म यादृशं

विष्णुवेदाख्ययतिव्याख्या

कीटादिरूपेण जायते, विद्यायाः कर्मणो वा वशात् स्वेषु स्वेषु स्थानेषु इत्युपसंहरति कर्मिणां मार्गम्। अथ ज्ञानिनाम्। तमागतं ज्ञानिनं चन्द्रः कोऽसीति पृच्छति। चन्द्रमसं प्रति ज्ञानी प्रतिब्रूयात्।।

प्रकाशिका

त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते। तद्य इह रमणीयचरणा अभ्याशो ह यत् ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा । य इह कपूयचरणा अभ्याशो ह यत् ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा इति श्रुत्यर्थोऽत्रानुसन्धेयः। परस्वान् पशुविशेषः। एतेषु स्थानेषु जायते।।

Sri Venkateswara Vedic University

यथाविद्यम्। तमागतं पृच्छति कोऽसीति। तं प्रतिब्रूयात्।। २।।

**** मुख्यफलं परमपदे ब्रह्मानुभवः ****

विचक्षणादृतवो रेत आभृतं पञ्चदशात्प्रसूतात्पित्र्यवतः।

दीपिका

शुभमशुभं व्यामिश्रं वा कर्म यथाविद्यं यादृशी शास्त्रीयाऽशास्त्रीया व्यामिश्रा वा विद्या विद्याकर्मानुसारेण शुभमशुभं व्यामिश्रं च शरीरं भवतीत्यर्थः।। २ ।।

एवं कर्मणां गतिं स्वर्गनरकोभयात्मिकां वैराग्यार्थमुपदिश्य गुरुशिष्ययोः करणीयं विवक्षुः प्रथमतो गुरोः करणीयमाह—तं नरकादिव स्वर्गादपि विरक्तं विज्ञातनरकस्वर्गगतिं त्रिविधतापसंतप्तमानसममानित्वादिगुणं शिष्यमागतं शुभाशुभाभ्यां कर्मभ्यां स्वर्गाद्भूलोकं प्राप्यात्युत्कटेन पुण्येन केनचिदात्मानं प्रत्यागतं पृच्छति करुणारसपूर्णहृदयो वेदान्तार्थयाथात्म्यविद्गुरुलक्षणसंपन्नो गुरुः प्रश्नं करोति पृच्छेदित्यर्थः। गुरोः प्रश्नमाह- कः प्रश्ने। शरीरेन्द्रियादिरूप आहोस्वित्तद्विलक्षणोऽसि भवसि। इत्यनेन प्रकारेण पृच्छतीत्यन्वयः। तमेवं पृच्छन्तं स्वगुरुं शिष्यो गुरुप्रश्नान्तरं प्रतिब्रूयात्प्रत्युत्तरं वदेत्। शिष्यो देहादि-

विष्णुवेदाख्ययतिव्याख्या

यत्रासौ भगवान् विष्णुर्यत्र गत्वा न शोचति।
तस्य मार्गे स्थितो विष्णुश्चन्द्ररूपी स एव हि।
तस्य प्रश्नोत्तरत्वेन तस्य माहात्म्यमुच्यते।
पूर्णचन्द्रात् समुत्पत्तिः कालस्यास्य निगद्यते।

विचक्षणात् पूर्णचन्द्रादित्यर्थः। सर्वज्ञात् परमात्मन ऋतवः समुत्पन्नाः ऋतुभ्यः काल उद्गतः।

प्रकाशिका

यथाकर्म.... कोसीति। इष्टादिकर्मानुसारेण वा ब्रह्मविद्यानुसारेण वा आगतं पुमांसं पृच्छति कासानि। तं प्रतिब्रूयात्। तं वक्ष्यमाणप्रकारेण यः प्रतिब्रूयात्, तमतिसृजत इत्युत्तरेणान्वयः।। २ ।।

प्रतिवचनप्रकारमाह **विचक्षणात्...तस्मात्।** मासादिकालपरिच्छेद-

Sri Venkateswara Vedic University

तन्मा पुंसि कर्तर्येरयध्वं पुंसा कर्त्रा मातरिमा निषिक्त[१]।

दीपिका

संघातमात्मानमुररीकृत्याऽऽह विचक्षणाद्बहुविधभोगदानकुशलात् सूर्यसुषुम्नानाडीरूपाच्चन्द्रमस ऋतव ऋतोर्वसन्ताद्यर्तुस्वरूपान्न हि चन्द्रमसमन्तरेण रेतः श्रद्धासोमवृष्ट्यन्नपरिणामरूपं शुक्रमाभृतं रेतःसिक्पुरुषाग्नौ देवैरन्नाहुतिप्रक्षेपेण स्थापितं पञ्चदशात्पञ्चदशकलात्म काच्छुक्लकृष्णपक्षहेतोरित्यर्थः। प्रसूतात्साय-प्रातरग्निहोत्राहुतिद्वयापूर्वापर पर्यायश्रद्धातः संजातात्सोमप्रकृतिविकाररूपाद्वा पित्र्यवतः पितृमतः पितृलोकस्वरूपादित्यर्थः। तत्, उक्तं रेतः। मा मामस्वरूपं मयाऽनुशयिना सहितमित्यर्थः। पुंसि रेतः सिचि कर्तरि ग्राम्यधर्मानुष्ठातर्येरयध्वं समन्तान्नानाङ्गेषु वर्तमानमेकत्र हृदयप्रदेशे प्रेरयत प्रेरणं कुरुतेत्यर्थः।

विष्णुवेदाख्ययतिव्याख्या

जगत्कारणतः सोमात् पितृयज्ञादिरूपिणः।
तन्मामिति गिरा तस्य स्वात्मन्यैक्यं निगद्यते।
स्वात्मनो हि समुत्पत्तिर्ब्रह्मभावेन वर्ण्यते।
प्रमात्रा परमात्माहं जातो विद्याबलेन हि।

प्रकाशिका

कत्वात् चन्द्रस्य ऋतुशब्देन संबोधनम्। एकस्मिन् औपचारिको बहुवचनप्रयोगः। दिवसपूर्वपक्षोत्तरायणादिलक्षणकालाभिमानिदेवतासाहित्याभिप्रायेण वा ऋतव इति बहुवचनप्रयोगः। हे ऋतवः! कालप्रवर्तका इत्यर्थः। पित्र्यावतः पितुः कर्म पित्र्यं निषेकादि। तद्वान्। छान्दसो मतौ दीर्घः निषेकादिकर्तुः विचक्षणात् तस्मात् प्रसूतात्। प्रसूतम् उत्पन्नम्। सुपां सुलुक् इत्यादिना आदेशः। पञ्चदशंपञ्चदशाः – अवस्थाः यस्य तत् पञ्चदशम्। श्रद्धासोमवृष्ट्यन्नरेतोरूपावस्थापञ्चकयुक्तम् आमृतं शोणितेन संभृतं रेतोऽस्मि। रेतश्शरीरकोऽहमित्यर्थः। अनेन पञ्चाग्निविद्याप्रकारोपन्यासात् स्वस्य प्रकृतिविविक्तात्मस्वरूपमुपन्यस्तं भवति।।

१.सिषिक्त इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

दीपिका

यद्यप्यत्र कर्ता कोऽपि न प्रतीयते प्रेरणे तथाऽप्यर्थलाभात्पञ्चाग्निविद्यागता देवा एवावगन्तव्याः। पुंसा रेतः सिचा निमित्तभूतेन कर्त्रा ग्राम्यधर्मानुष्ठात्रा मातरि पञ्चमाग्निरूपायां योषिति मा मां रेतसा सहितमनुशायिनं निषिक्त सेचितवन्तो देवाः स योषिति रेतोरूपेण सिक्तोऽनुशयीह जाये जनन आविर्भावनिमित्तमित्यर्थः। उपजायमानो रेतः सेकमनु स्वं कर्मसमीपे शरीरं गृह्णानो द्वादशत्रयोदशो द्वादशसंख्यया

विष्णुवेदाख्ययतिव्याख्या

रेतस्सिचा प्रमात्रा हि संबन्धोऽत्रेरणं मतम्।
गर्भिण्या विद्यया योगो मातरीत्यत्र गद्यते।
सोऽहं जातोऽद्य भगवानविद्याबाधवर्त्मना।
प्रमात्रा कालसंबन्धो नयेत्यत्र निगद्यते।
संवत्सरात्मा कालोऽयं द्वादशेति विशेष्यते।
संवत्सरस्य द्वैविध्यं सूर्यसोमसमन्वयात्।
पित्रा प्रमात्रा संबन्धो ह्युपजन्ममतं त्विदम्।
द्वादशेत्युत्तरेणात्र तद्योगत्वं विवक्षितम्।

प्रकाशिका

पुंसि... मां निषिक्तम्(क्त?)। हे ऋतवः ! यूयमितःपरं निषेककर्तरि पुंसि रेतोरूपतया अवस्थानामेरयध्वम् मा प्रेषयत। प्रेषणं मा कुरुतेत्यर्थः। उत्तरत्र मा इत्यस्य अत्राप्यनुषङ्गः। पुंसा निषेककर्त्रा मम शरीरपरिग्रहाय मातरि मा निषिक्तम्(क्त?) निषेकं मा कुरुत। छान्दसः शपो लुक्।।

परिष्कारः

उत्तरत्र मा इत्यस्येति। निषेधार्थकमाशब्दस्येव मामित्यर्थेऽपि शब्दस्यापेक्षितत्वात् उत्तरत्र श्रुतं मेतिपदं मामित्यर्थकमिहानुषञ्जनीयम्। तत्रापि निषेधार्थकमाशब्दोऽय-मनुषञ्जनीय इत्यर्थः। पूर्वत्र तस्मादिति पदस्थाने तन्मा इति पाठे तु तत्रत्यो

Sri Venkateswara Vedic University

स जाय उपजायमानो द्वादशत्रयोदश उपमासो द्वादशत्रयोदशेन पित्रा।
सं तद्विदे प्रतितद्विदेऽहं तन्म ऋतवो अमर्त्यव आभरध्वम्।

दीपिका

विशिष्टः स्वभावतः कदाचित् त्रयोदशसंख्यया विशिष्टो द्वादशत्रयोदशः। उपमासो मासानां समीपे वर्तनं यस्य सोऽयमुपमासः संवत्सरः। संवत्सरकालोपलक्षित-जीवनत्वादनुशय्यापि द्वादशत्रयोदश उपमास इत्यविरूद्धम्। द्वादशत्रयोदशेनोक्तरीत्या द्वादशत्रयोदशमासात्मकसंवत्सरोपलक्षितेन पित्रा रेतःसिचा जनकेनाऽऽसं तादात्म्यं गतोऽभूवम्। रेतःसेकात्प्राक्तद्विदे तस्य ब्रह्मणो ज्ञानार्थं सति भाग्ययोगे वैपरीत्ये तु प्रतितद्विदे तद्वेदनस्य प्रतिकूलज्ञानार्थमहं स्वर्गाद्भ्रष्टोऽनुशयी शास्त्रदृष्टिः। तत्तत्रैवं

विष्णुवेदाख्ययतिव्याख्या

व्यासोऽप्याह महाबुद्धिरस्यार्थस्य प्रसिद्धये।
सर्वकालातिगो विष्णुः कालोऽयं हृदि तिष्ठति।
कालात्मना न मे योगः कालाधीनमिदं जगत्।
द्वादशत्रयोदशेनेत्यन्तस्य व्याख्यानमिदम्।
इत्येतत् संविदे चाहं सम्यग्ज्ञानमितत्वतः।
प्रत्यात्ममेवं जानामि कालसंबन्धिनीं कृतिम्।

प्रकाशिका

स जायम्...मासः। सोऽहं जायं जनित्वा- आभीक्ष्ण्ये णमुल्– गर्भे गर्भे जनित्वा जनित्वा उपजायमानः गर्भात् निर्गच्छन् द्वादशः त्रयोदशो वा उपमासः अन्तिममासो यस्य सः द्वादशत्रयोदशोपमासः यद्यपि मनुष्याणां गर्भे दशैव मासाः, अथापि योनिविशेषेषु द्वादशत्रयोदशमासपर्यन्तस्थितिरस्तीति तथोक्तम्, द्वादश वा त्रयोदश वा मासान् गर्भे उषित्वेत्यर्थः।।

द्वादश... तद्विदेऽहम्। अहं द्वादशेन वा त्रयोदशेन वा मासेन पित्रा आसं प्रादुरासम्। पितृशब्दो मातुरप्युपलक्षकः। तद्विदे प्रति तद्विदे। अत्र तच्छब्दः पूर्वोक्तरेतः परामर्शी। तद्विदे रेतस्सिचे। तद्विदे तद्विदे प्रति=प्रतिरेतस्सिक्पुरुषमित्यर्थः। चतुर्थी

Sri Venkateswara Vedic University

तेन सत्येन तेन तपसा ऋतुरस्म्यार्तवोऽस्मि। कोऽस्मि त्वमस्मीति।

दीपिका

स्थिते तस्माद्वा मे मह्यं मदर्थमित्यर्थः। ऋतव ऋतूननेककालमाब्रह्मसाक्षात्कारं जीवनमित्यर्थः। अमर्त्यवेऽमर्त्याय ब्रह्मज्ञानपरिपूर्तये। आभरध्वम्, हे देवाः समन्ताद्धारयध्वम्।

तेन विचक्षणादित्यादिनोक्तेन सत्येन यथार्थवचनेन तेन चन्द्रनिवासमारभ्य योनिनिर्गमनान्तेन तपसा क्लेशेन। ऋतुरुक्तरीत्या संवत्सराद्यात्मिको मर्त्य इत्यर्थः। अस्मि भवामि। आर्तव ऋतुजः शुक्रशोणितशरीरात्मक इत्यर्थः। अस्मि भवामि। एवं ब्रुवाणं चेच्छिरःकम्पहस्तविधूननादिना निवारयसि तर्हि कथय कः प्रश्ने कार्यकारणविलक्षणः को नामाहमस्मि भवामि। एवमुक्ते वक्ष्यमाणाध्यायद्वयोक्त

विष्णुवेदाख्ययतिव्याख्या

तन्मां मर्तो हि गच्छध्वमृतवो मर्त्यगामिनः।
इति कालात्मकश्चन्द्रो गच्छेत्यत्र निगद्यते।
तेन ज्ञानेन सत्येन तपसा कर्मणैव च।
कालात्मानं समापन्नो विष्णुरेव जगन्मयः।

प्रकाशिका

तादर्थ्यार्था। तेषां पितॄणां शेषभूत एवासमित्यर्थः।।

तन्मा ऋतवो मर्त्यव आभरध्वम्। हे ऋतव इति पूर्ववत् संबोधनम्। तत् तस्मात् कारणात् मर्त्यवे मृत्यवे जननमरणलक्षणसंसाराय मा आभरध्वम् - इतः परं मा समर्पयत।।

तत्र हेतुमाह तेन **सत्येन.... त्वन्नस्मीति।** तस्मान्न्यासमेषां तपसामति-रिक्तमाहुरिति श्रुतेः तच्छरणवरणलक्षणेन तपसा प्रसन्नेन तेन सत्येन परमात्मना अनुग्रहीतस्सन् ऋतुरस्मि मासर्तुसंवत्सरयुगात्मककालरूपोऽहमस्मि। आर्तवोऽस्मि तत्तत्कालवर्तिपदार्थरूपोऽप्यहमस्मि। कोऽस्मि चतुर्मुखोऽप्यहमस्मि। त्वमस्मि

Sri Venkateswara Vedic University

तमतिसृजते।

दीपिका

आत्मन्युपदिष्टे पुनः कोऽसीति पृष्टे शिष्य आह– त्वं ममोपदेष्टा प्राणप्रज्ञात्माऽवस्थात्रयातीतः सगुणत्वेन पर्यङ्के समासीनोऽस्मि भवामि। विचक्षणादृतोः पञ्चशात्प्रसूतात्पितृमत आभृतं रेतो यत्तन्मां हे देवाः पुंसि कर्तरि प्रेरितवन्तः। ततः पुंसा कर्त्रा निमित्तेन मातर्यपि मां सेचितवन्तः। द्वादशत्रयोदशेन पित्रैक्यं गत आसं संवत्सरो द्वादशत्रयोदश उपमासस्तद्विदे प्रतितद्विदे जाय उपजायमानो वर्त इति यतस्ततो मेऽमर्त्याय ब्रह्मज्ञानपरिपूर्त्यर्थमृतुरूपायुराभरध्वम्। यस्मादेवं जानानो देवान्प्रार्थये तेन सत्येन तेन तपसा द्वा(च)र्तुरम्यार्तवोऽस्मीति संबन्धः। विचक्षणादित्यारम्भाऽऽभरध्वमित्यन्तं हेत्वर्थमुपोद्घातनयेनातो न व्यधिकरणत्वशङ्काऽपि। प्रार्थनायामपि शब्दतो लभ्यमानानामृतानां वा प्रार्थना। अस्मिन्पक्षे त्वेवं व्याख्येयो मन्त्रो हे विचक्षणा हे ऋतवः। यतोऽहं ब्रह्मज्ञानार्थी तन्मे मां हे ऋतवो हे मर्त्यवो मृत्युहेतवः समानमन्यद्देवपक्षेण। इत्यनेन प्रकारेण प्रतिब्रूयादित्यन्वयः। तं विचक्षणादादित्वमस्मीत्यन्तं ब्रुवाणं नरकादिव चन्द्रमसोऽपि भीतं ब्रह्मविदमतिसृजते। संसारादतीत्योत्पादयति ब्रह्मविद्यया विमोक्षयतीत्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

एवं विदं समीक्ष्यासौ चन्द्रमा दूरतो व्रजेत्।
गच्छ गच्छोर्ध्वमित्येवं वदन् हर्षपरिप्लुतः।

प्रकाशिका

त्वमप्यहमेवास्मि। अत्र अहंशब्दः, अहं मनुरभवं सूर्यश्च इति वामदेववाक्यवत्, तं मामायुरमृतमित्युपास्स्व इति इन्द्रवाक्यवच्च स्वात्मभूतपरमात्मपरः।। साक्षात्कृतसर्वैकात्म्योऽहमस्मीत्यर्थः।।

तमतिसृजते। एवं यः प्रतिब्रूयात्, तं ब्रह्मवित्त्वेन ब्रह्मलोकगमनार्हतां ज्ञात्वा गमनाय अनुजानातीत्यर्थः।।

Sri Venkateswara Vedic University

* *देवयानप्रतिपादनम्* *

स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति। स वायुलोकं स आदित्यलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्।

दीपिका

सगुणब्रह्मविदो देवयानमार्गमाह– स सगुणब्रह्मवित्पर्यङ्काद्यन्यतमविद्यावान्प्राण-प्रयाणसमये प्राज्ञेनाऽऽत्मनैकीभूतो हृदयाग्रप्रद्योतनेन प्रदर्शितसुषुम्नाद्वारः। एतं वक्ष्यमाणम्। देवयानं देवैरर्चिरादिभिरुह्यमानेनोपसकेन प्राप्यत इति देवयानस्तम्। पन्थानं मार्गमापद्य सुषुम्नाद्वारा मूर्धानं भित्त्वा निर्गतः प्राप्य प्रथममग्निलोकमग्रे देवयानमार्गोपक्रमे सगुणब्रह्मवेदो नयतीत्यग्निः स चासौ लोकः प्रकाशश्चाग्नि-लोकस्तमर्चिरभिमानिनीं देवतामित्यर्थः। आगच्छति प्राप्नोति। ततोऽहरापूर्यमाण-पक्षोदगयनषण्माससंवत्सरदेवलोकाभिमानिनीर्देवता यथाक्रमेण प्राप्यानन्तरं स

विष्णुवेदाख्ययतिव्याख्या

सोऽपि चन्द्रमसो गत्वा देवयानाख्यमार्गतः।
अग्निवायुवरुणादित्येन्द्रप्रजापतीनां लोकानतिक्रम्य ब्रह्मलोकमागच्छति।।

प्रकाशिका

एवं ब्रह्मविच्चन्द्रमस्संवादप्रकारं प्रदर्श्य आदित आरभ्य अर्चिरादि-गतिक्रममुपदिशति **स एतं.... आगच्छति।** सः ब्रह्मवित् देहवियोगकाल एव सुकृतदुष्कृते विधूय देवयानमार्गमापद्य अवलम्ब्य अग्निलोकमागच्छति। तेऽर्चिषमभिसंभवन्ति इति अर्चिश्शब्दितस्याग्नेः देवयानमार्गप्रथमपर्वत्वश्रवणात् प्रथमतः अग्निलोकप्राप्तिरुपपन्ना। स वायुलोकम्।

परिष्कारः

माशब्दो मामित्यर्थक इहान्वेतीति ध्येयम्।

ब्रह्मविदा चन्द्रप्राप्तेः प्रागेव देवयानगताग्निलोकादेः प्राप्तत्वात् प्रश्नप्रति-वचनानन्तरं देवयानोपक्रमायोगात् अग्निलोकादिकीर्तनस्यान्यमाशयं दर्शयति आ-दित आरभ्यार्चिरादीति। अत्र, मुमुक्षुरयं चन्द्रलोकफलान्तरमेव देवयानं प्रति आयाति।

Sri Venkateswara Vedic University

दीपिका

प्राप्तदेवलोको वायुलोकं वायुदेवतामागच्छतीत्येतद्वक्ष्यमाणेष्वप्यनुषज्यते। स वायुदत्तरथचक्रच्छिद्रोपममार्गो वायुलोकादनन्तरमादित्यलोकमादित्यदेवतां डम्बराकाशसमानमार्गदात्रीं चन्द्रमसः पूर्वभाविनीम्।। स आदित्यलोकात्प्राप्त-

विष्णुवेदाख्ययतिव्याख्या

चन्द्रो विष्णुरिति ज्ञेयश्चन्द्रेणैकत्वबोधनात्।
उपासकस्य तद्भावमापन्नस्याधिकारिणः।
तन्मामित्यादिभिर्वाक्यैरुत्तरत्रापि बोध्यते।
विचक्षणादिवाक्येन तन्माहात्म्यं प्रदर्श्यते।
तदुपासाविधिः सर्वोऽप्यत्रैव प्रतिपाद्यते।
चन्द्रेण सह संवादोऽप्यादरार्थोऽयमुच्यते।

प्रकाशिका

यद्यप्यत्राग्निलोकानन्तरं वायुलोकः श्रूयते तथापि श्रुत्यन्तरे, अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षात् यान् षण्मासानुदङ् आदित्य एति मासेभ्यो देवलोकम् इति देवलोक(शब्द ?)निर्दिष्टस्य वायुलोकस्य उदगयादूर्ध्वं श्रवणात् उदगयनादूर्ध्वमेव वायुलोको निवेश्यः। तत्राप्युदगयनादूर्ध्वं छान्दोग्ये, मासेभ्यः संवत्सरम् इति श्रवणात्, अधिककालानां न्यूनकालादूर्ध्वं निवेशस्य, अह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति इत्यत्र दृष्टत्वात् उदगयनापेक्षया अधिककालस्य संवत्सरस्य तदूर्ध्वनिवेशः सिद्धः।

परिष्कारः

पूर्वं तु मार्गान्तरेण चन्द्रं प्राप्तः। अतो देवयाने यावत् उपरितनलोकस्थितेन गन्तव्यम्, तावतो वर्त्मन एव तं प्रति अध्वता इति न मन्तव्यम्। अग्निलोकादि-कमप्यनेन प्रागाप्तमेवेति ज्ञापयितुमेवं वाक्यमिति भावः। तथा च आगच्छतीति वर्तमानकालो न विवक्षित इति। अत्र एतमिति देवयान विशेषणात्, अग्निलोकमागच्छति स वायुलोकं– स ब्रह्मलोकमिति श्रुतिप्रसिद्धमेतं देवयानं

Sri Venkateswara Vedic University

दीपिका

चन्द्रविद्युल्लोको विद्युल्लोकादमानवेन पुरुषेण नीयमानो वरुणलोकं वरुणदेवतां सोऽमानवेन पुरुषेण नीयमानो वरुणात्प्राप्तसहायको वरुणादनन्तरमिन्द्रलोकमिन्द्रदेवतां स प्राप्तेन्द्रसहायकस्ततः प्रजापतिलोकं प्रजापतिदेवतां विराड्रूपां स प्राप्तविराट्सहायकस्ततो ब्रह्मलोकं हिरण्य-गर्भलोकममानवपुरुषैकगम्यम्। तं ब्रह्मलोकं वर्णयति– तस्यामानवपुरुषनयनेन प्राप्तस्य ह शास्त्रप्रसिद्धस्य वै ब्रह्मविद्भिः स्मर्यमाणस्यैतस्य प्रत्यक्षस्यैव प्रकृतत्वेन ब्रह्मलोकस्य हिरण्यगर्भनिवासस्य।।

विष्णुवेदाख्ययतिव्याख्या

अग्न्यादीनां च सर्वेषां विष्ण्वात्मत्वं विवक्षितम्।
सोमस्य विष्णुभावोक्तिः प्रदर्शनपरा यतः।
ब्रह्मलोकं क्रमाद् गत्वा ब्रह्मभूतोपि...र्हितः।
ब्रह्मलोकगतान् भोगान् पश्यन्नूर्ध्वं व्रजत्यसौ।

प्रकाशिका

स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकमितीदं वाक्यम् अर्चिरादिपादे चिन्तितम्। संवत्सरात् आदित्यमादित्याच्चन्द्रमसम् इति छान्दोग्ये, यदा वै पुरुषोऽऽस्माल्लोकात् प्रैति स वायुलोकमागच्छति। स तत्र विजिहीते, यथा रथचक्रस्य खम्। तेन स ऊर्ध्वमाक्रमते। स आदित्यमागच्छति। तस्मै स तत्र विजिहीते यथा डम्बरस्य खम्। तेन स ऊर्ध्वमाक्रमते। स चन्द्रमसमागच्छति इति बृहदारण्यके च श्रुतत्वात् संवत्सरादूर्ध्वं चन्द्रमसः प्रा आदित्यस्य निवेशः सिद्धः।

परिष्कारः

पन्थानं स आपद्य इत्यन्वयोऽपि स्यात्। तदा एतदुपरि,वर्तत इति शेषो वा,

प्रकाशिका

तत्र च वरुणेन्द्रप्राजापतीनामपि पठितानां पाठार्थवत्त्वाय क्वचिन्निवेशे कर्तव्ये, वायुलोकं वरुणलोकमिति पाठक्रमानुसारेण वायोरूर्ध्वं वरुणो निवेशयितव्यः। इन्द्रप्रजापती अपि तदनन्तरं निवेशयितव्यौ। न च, आदित्यलोकम्, इन्द्रलोकं प्रजापतिलोकमिति पाठक्रमादित्यादूर्ध्वं चन्द्रात् प्रागेव निवेशोऽस्त्विति वाच्यम्– आदित्याच्चन्द्रमसम् इति आदित्यादूर्ध्वं चन्द्रस्य श्रवणेन तत्क्रमबाधप्रसङ्गात्। न च चन्द्रादूर्ध्वं तयोर्निवेशोऽस्त्विति वाच्यम्– चन्द्रमसो विद्युतम् इति श्रुतिक्रमबाधप्रसङ्गात्। ननु देवलोकादादित्यम् इति देवलोकशब्दितवायोरादित्यस्य च क्रमस्य श्रुतत्वात् तत्रेन्द्रप्रजापत्योर्निवेशे तत्क्रमभङ्गः स्यादिति चेन्न– वाय्वादित्ययोरन्तरालेवरुणस्य निवेशनीयतया तेनैव वाय्वादित्ययोरानन्तर्यस्य तत्रैवेन्द्रप्रजापत्योरपि निवेशः। अतश्च वरुणेन्द्रप्रजापतीनां त्रयाणामपि वाय्वादित्ययोरन्तराल एव निवेशोऽस्त्विति प्राप्ते—उच्यते–

तटितोऽधि वरुणः संबन्धात्। तटित ऊर्ध्वं वरुणस्य निवेशः। कुतः ?संबन्धात्। विद्युद्वरुणयोः द्वयोरपि मेघोदरवर्तित्वरूपसंबन्धसत्त्वात् विद्युत ऊर्ध्वं वरुणस्य निवेशः। ततः परस्तात् इन्द्रप्रजापत्योर्निवेशः। तथा हि सति, देवलोकादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतम् इति निबद्धोऽपि क्रमो न बाधितो भवति। न चैवं विद्युत ऊर्ध्वे वरुणेन्द्रप्रजापतीनां निवेशे तेषामेव ब्रह्मगमयितृत्वेन, तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति इति वैद्युतपुरुषस्य गमयितृत्वं श्रुतं विरुद्ध्येतेति वाच्यम्– वरुणेन्द्रप्रजापतीनाम(त्र?) गमयितृत्वेऽपि वैद्युतपुरुषस्याप्यनुग्राहकतया गमयितृत्वसंभवादिति स्थितम्। प्रकृतमनुसरामः।।

परिष्कारः

वाक्यस्यास्य तमित्थंवित् आगच्छतीति वक्ष्यमाणेनैकवाक्यता वा भवितुमर्हति। अत्रोपनिषदि यथायथमन्वयकल्पनं छन्दत उभयाविरोधात् इति सूत्रेण दर्शितमेव। अर्चिरादिमार्गे कतिपयपात्रनिर्देशोऽयमन्योपलक्षकः। तथा च अग्निलोकानन्तरं वायुलोकात् प्राक् दिवसज्योत्स्नापक्षोत्तरायणवत्सराणां ग्रहणम्। वायोरनन्तरं

Sri Venkateswara Vedic University

तस्य ह वा एतस्य ब्रह्मलोकस्य[1] आरो ह्रदो मुहूर्ता येष्टिहा[2] विजरा नदील्यो

दीपिका

आरो ह्रदः प्रथमं ब्रह्मलोकप्रवेशे ब्रह्मलोकमार्गनिरोधकः समुद्रशत-समानगाम्भीर्योऽजस्रनीलजलोऽरिभिः कामक्रोधादिभिर्विरचितत्वेनाऽऽरेतिनामा ह्रदः। तस्येत्यादि वक्ष्यमाणेष्वप्यनुवर्तते। आरह्रदस्य परपारे वर्तमाना मुहूर्ता घटिकाद्वयकालाभिमानिनो देवाः। तान्विशिनष्टि– येष्टिहाः। य इष्टिमिष्टं

परिष्कारः

वरुणात् प्राक् आदित्यचन्द्रवैद्युतानां ग्रहणम्। एवञ्च वरुणलोकानन्तर-मादित्यलोकपाठोऽत्र कृतो नैव क्रमसाधकः।

स पूर्वमाक्रष्टव्यः, प्रमाणान्तरानुसारात्। अत्रैवम्, स आदित्यलोकमिति पाठः किं सर्वकोशेषु, उतान्यथाऽपि पाठ इति विचारो वर्तितो भावप्रकाशिकायाम्। वरुणाधिकरणे तु श्रीभाष्ये अत्र श्रुतानां निवेशक्रमयाथात्म्यं यथापाठं प्रकृतवाक्यग्रहणेनेत्थं शोधितमस्ति, अत्राग्निलोकशब्दस्यार्चिः पर्यायत्वेन प्राथम्यमविगीतम्। वायोश्च संवत्सरादूर्ध्वं निवेश उक्तः। आदित्यस्याप्यत्र प्राप्तपाठक्रमबाधेन, देवलोकादादित्यम् इति वाजसनेयकोक्तश्रुतिक्रमात् देवलोकशब्दाभिहितात् वायोरुपरि निवेशः सिद्धः। इदानीं वरुणेन्द्रप्रजापतिषु चिन्ता इति। तत् सिद्धम्– उपासकस्य चन्द्रलोकात् प्रागेव देवयानमार्गे प्रविष्टतया नेदं चन्द्रकृतातिसर्गानन्तरं देवयानप्रथमप्रवेशबोधकमिति, नापि यथावस्थितातिवाहिकक्रममनुरुध्य प्रवृत्तमिति च।

उपासकस्योपासनफलं ब्रह्मलोकप्राप्तिपर्यन्तमेतावतोक्तम्, अथ ब्रह्म-

---

१. 'ब्रह्मलोकस्य' इति विष्णुवेदयतिपाठे नास्ति । २. यष्टिहा इति दीपिकापाठः

३. सारज्जं इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

वृक्षः सालज्यं[3] संस्थानमपराजितमायतनमिन्द्रप्रजापती द्वारगोपौ विभु प्रमितं

दीपिका

ब्रह्मलोकानुकूलमुपासनं कामक्रोधादिप्रवृत्त्युत्पादनेन घ्नन्तीति येष्टिहाः। विजरा नदी विगता जरा यस्या दर्शनादिना सेयमुपासनक्रियैव तन्नाम्नी नदी। इल्यो वृक्षः, इला पृथिवी तद्रूपत्वेनेल्येतिनामातरूः। अयमन्यत्राश्वत्थः सोमवसन इत्याचक्षते। सालज्यं संस्थानं, सालवृक्षसमाना ज्या धनुषां गुणा इव वस्तु यत्रोपतीरं तत्सालज्यम्। अनेकसुरसेव्यमानारामवापीकूपतटाकसरिदादिविविधजलपरिपूर्णमित्यर्थः। संस्थानम्, अनेकजननिवासरूपं पत्तनमित्यर्थः।

विष्णुवेदाख्ययतिव्याख्या

ब्रह्मलोके आर इति ह्रदः, मुहूर्ता येष्टिहा, विजरा नदील्यो वृक्षः,सारज्यं संस्थानम्।

दिव्यवृक्षवनं ह्यत्र सारज्यमिति शब्दितम्।

अपराजितं नामायतनं द्वारपालाविन्द्रप्रजापती प्रमितं विभु आसन्दी विचक्षणा पर्यङ्कः अमितौजाः।

प्रकाशिका

तस्यारो ह्रदो मुहूर्ता यष्टिहाः। तस्य ब्रह्मलोकस्य समीपे अरसंज्ञको ह्रदः। छान्दोग्ये, अरश्च ण्यश्चार्णवौ ब्रह्मलोके ऐरम्मदीयं सरः इति सरस्त्रयमुक्तम्। ततः परस्तादविदूरे मुहूर्तसंज्ञकाः यष्टिहाः। यष्टिभिः अब्रह्मविदो गन्तॄन् घ्नन्तीति यष्टिहाः।।विजरा नदी। विजरेति संज्ञावती नदी। विरजा नदीत्यपि पाठोऽस्ति। जरारजोविरोधित्वात् विजरा विरजेत्यु(ति चो?) च्यते।। तिल्यो वृक्षः। ततोऽविदूरे तिल्यसंज्ञिको वृक्षः। छान्दोग्ये, तदश्वत्थः

परिष्कारः

पर्यङ्कारोहणान्तं तद् वक्ष्यते; यदनन्तरमेवास्य परिपूर्णब्रह्मानुभवः। तदर्थमत्र स्थितान् विशेषान् निर्दिशति तस्येत्यादिना।

Sri Venkateswara Vedic University

विचक्षणाऽऽसन्द्यमितौजाः पर्यङ्कः। प्रिया च मानसी प्रतिरूपा च

दीपिका

अपराजितमायतनं न केनचित्पराजितमनेकसूर्यसमानत्वेनेत्यपराजितं ब्रह्मणो निवासस्थलम्। हिरण्यगर्भस्य राजमन्दिरमित्यर्थः। तस्मिन्नपराजितनाम्न्यायतन इन्द्रप्रजापती स्तनयित्नुयज्ञत्वेनोपलक्षितौ वाय्वाकाशाविन्द्रप्रजापतिनामानौ द्वारगोपौ द्वाररक्षकौ द्वास्थावित्यर्थः।।

विभुप्रमितमत्यन्तमप्यविकमहंकारस्वरूपमहमित्येव सामान्येन प्रमितं विभुप्रमितं ब्रह्मणः सभास्थानमेतन्नाम। विचक्षणाऽऽसन्दी विचक्षणा कुशला बुद्धिमहत्तत्त्वेत्यादिशब्दाभिधेयाऽऽसन्दी सभा मध्यवेदिः। अमितौजाः पर्यङ्कः, अमितमपरिमितं प्राणसंवादादौ प्रसिद्धमोजो बलं यस्य सोऽमितौजाः प्राणः पर्यङ्को ब्रह्मण आसनभूतो मञ्चकः। प्रिया च मानसी मनसः कारणभूता प्रकृतिर्मनो-गताह्लादकारिणी भार्या। चकारस्तस्या अलंकरणादिकमपि सैवेत्येतदर्थः। प्रतिरूपा च चाक्षुषी चक्षुष्प्रकृतिभूता तैजसी प्रतिरूपा प्रतिच्छाया। चकारः प्रतिरूपालङ्क-रणादेरपि चाक्षुषीत्वसंग्रहार्थः।

विष्णुवेदाख्ययतिव्याख्या

ब्रह्मलोकगतानां हि मनोवृत्तिः प्रिया भवेत्।
मनसेति गिराप्येतत् सूचितं काण्वशाखिभिः।
चाक्षुषीवृत्तिरप्येवं पापकारणनिह्नुतेः।

प्रकाशिका

तत् सालज्यम्।। अपराजितमायतनम्। अपराजिता पूः ब्रह्मण इति श्रवणात् अपराजितसंज्ञकमायतनं पुरमित्यर्थः। अब्रह्मविद्भिर्न जीयत इत्यपराजितम्।। इन्द्रप्रजापती द्वारगोपौ। इन्द्रप्रजापतिसंज्ञकौ पट्टणद्वारपालकौ।।

विभुप्रमितम्। अत्र मण्टपमिति शेषः। विभुत्वेन अतिविस्तृतत्वेन प्रमितं हिरण्मयमण्टपमित्यर्थः। प्रभुविमितं हिरण्मयम् इति छान्दोग्योक्तेः।। विचक्षणा सोमसवनः इति सोमसवनसंज्ञकोऽश्वत्थो वृक्षः उक्तः।।

सालज्यं संस्थानम्। सालज्यनामकं संस्थानं स्थानीयम्। स्थानीयं

Sri Venkateswara Vedic University

चाक्षुषी। पुष्पाण्यावयतौ वै च जगानि। अम्बाश्चाम्बायवीश्चा[१]प्सरसः।

दीपिका

पुष्पाण्यावयतौ वै च जगानि जगानि जगन्ति चतुर्विधानि भूतानि सलोकसंस्थानानि पुष्पाणि कुसुमानि वै प्रसिद्धानि पुष्पसमानधर्मत्वेन केवलं पुष्पाणि जगानि किंत्वावयतौ च आ समन्तात्तन्तुसंतानेन निष्पादितौ षटावप्याच्छादनपरिधानरूपौ। अनयोरपि भूतैः संकोचविकासादिसामान्यमवगन्तव्यम्। अम्बाश्चाम्बायवीश्चाप्सरसः, अम्बा जगज्जनन्यः श्रुतयः। अम्बायवो न विद्यतेऽम्बोऽभ्यधिकोऽयवश्च न्यूनो यासां ता अम्बायवा बुद्धयोऽम्बायवा एवाम्बायव्यः श्रुतिबुद्धयोऽप्सरसः साधारण्यो योषितः। चकारावुभयोरपि प्रत्येकमप्सरस्त्वयोगार्थौ।।

विष्णुवेदाख्ययतिव्याख्या

दिव्यपुष्पसमाकीर्णो ब्रह्मलोक इतीर्यते।
पुष्पाणीति गिरा पूर्वहेतुत्वेन स्वभावतः।
इतस्ततोऽपगच्छन्ति पुष्पाण्यानन्दवायुना।
आवेत इति वायूक्तिसौरभ्यादिसमन्वयात्।
अम्बाम्बायीति शब्दाभ्यां मातृसाम्यं विवक्षितम्।

प्रकाशिका

निगमोऽन्यत्तु यन्मूलनगराद्बहिः इत्यमरः। सालेषु प्राकारेषु ज्या युद्धसाधनं यस्य आसन्दी। विचक्षणसंज्ञिका आसन्दी धर्मादिपीठमित्यर्थः।। अमितौजाः पर्यङ्कः। अमितौजा नाम योगपर्यङ्कः।। **प्रिया च... अपचयतः?।** मनोधिष्ठात्री नाम्ना प्रिया च, चक्षुरधिष्ठात्री नाम्ना प्रतिरूपा च पुष्पाणि अपचयतः(?) कुसुमानि देव्यौ।।

परिष्कारः

अपचयत इतिः चिञ् चयने। चुरादिः। ञित्करणसामर्थ्यात् णिज्विकल्पः। यतो वै इत्यादिभागस्य भाष्यं न दृश्यते। तदर्थश्च प्रियादिवत् यत्र सर्वजगदम्बाभूता अन्याश्च

१. अम्बायवश्च इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

अम्बया नद्यः। तमित्थंविदागच्छति। तं ब्रह्माऽऽहाभिधावत मम यशसा।

दीपिका

अम्बया नद्यः, अम्बमम्बकं लोचनं ब्रह्मज्ञानं यान्तीत्यम्बया उपासनाः। नद्यो वारां प्रवाहधारिण्यः पुरायतनादिवासिलोकभोग्याः। तमुक्तं ब्रह्मलोकमारो ह्रद इत्यादिनाऽम्बया नद्य इत्यन्तेन। इत्थंविदुक्तेन वक्ष्यमाणेन वा प्रकारेण पर्यङ्कस्थब्रह्मवित्। आ गच्छति समन्तात्प्राप्नोति। तममानवेन पुरुषेणाऽऽनीयमानमुद्दिश्य ब्रह्मा हिरण्यगर्भ आह ब्रूते स्वपरिचारकानप्सरसश्च। ब्रह्मोक्तिमाह– अभिधावत

विष्णुवेदाख्ययतिव्याख्या

मातृवद्धितकारिण्यः प्रमदा अपि तत्रगाः।
अम्बया सदृशा नद्यो भोगानन्दकरा अपि।
ब्रह्मलोकस्थभोगानामपराणां समं त्विदम्।
कार्यं सर्वं परित्यज्य कारणात्मा भवत्यसौ।
एषोऽर्थो वर्ण्यते ह्यत्र प्राणभावातिवर्तनम्।
यतस्तत्रैव भोगोक्तिः कार्यब्रह्मविदामिह।
एवं विद् ज्ञानी तमागच्छति तद् ब्रह्म प्राप्नोति।

तमागतं ब्रह्म आह अभिधावत मम यशसेति। इति संक्षेपेणोक्त्वा विस्तरेणाह। विजरानदीन्य इत्यादिकान् सर्वान् विवृणोति। तस्यां नद्यां प्राप्तायामयं न जरिष्यतीति नदीं प्रापत्।।

प्रकाशिका

तमित्थंविदागच्छति। तादृशब्रह्मलोकमेतादृशस्वरूपविदागच्छति।।

तं ब्रह्माह... जिगीष्य(?)तीति। यूयं तं ब्रह्मविदमागच्छन्तमभिधावत अभिगच्छत प्रत्युत्थानं कुरुत। मम यशसा ममानुग्रहेणायं ब्रह्मवित् विरजां नदीं विरजानदीसमीपं प्राप्तवान्। विरजानदी (समीपदेश?) संबन्धात् इतःपरं विरजामेष्यतीति परमात्मा अप्सरसः प्रतिवदतीत्यर्थः।।

परिष्कारः

स्त्रियः सन्ति, तथा तदंशभूताः अम्बया मुख्यभूतया नद्यः प्रमोदकोलाहलं कुर्वत्यः

Sri Venkateswara Vedic University

विजरां वा अयं नदीं प्रापत्। न वा अयं जरयिष्यतीति।। ३ ।।

दीपिका

पर्यङ्कविद्याविदमभितः संमुखं धावत गच्छत। मम यशसा मदीयकीर्त्या ममार्हं संभारं स्वीकृत्यमत्प्रतिपत्त्या पूजां कुरुतेत्यर्थः। ननु भवानजरोऽयं भवतो विपरीतः कथं भवतः पूजामर्हतीत्यत आह– विजरां जराहारिणीं सार्थनामधारिणीं वै प्रसिद्धामस्मदादीनामयं पर्यङ्कविद्याविन्नदीं सिन्धुं प्रापदवाप्तः। न वै नैव। अयं प्राप्तविजरो जरयिष्यति वयोहानिमवाप्स्यति। इत्यनेन प्रकारेणाऽऽहेत्यन्वयः।। ३ ।।

परिष्कारः

अप्सरसश्च सन्तीति। तमित्यादि। तमित्यस्य तं प्रति-तद्विषये इत्यर्थ उचितः। अन्यथा अभिधावतेममिति स्यात्। अत्र नदीं प्रापदिति प्रयोगात् मुक्तस्य विरजानदीप्राप्त्यनन्तरमेव ब्रह्मणा अप्सरसां प्रेरणमिति ज्ञायते। अप्सरोभिः क्रियमाणोऽलङ्कारश्च मुक्तस्याप्राकृतविग्रहे, न तु प्राकृतभूतसूक्ष्मे। एवं ब्रह्मालङ्कारेणालङ्कृतो ब्रह्मैवाभिप्रैतीत्युक्तम्; न तु अलङ्कृतआगच्छत्यरं ह्रदमिति। अतः तं ब्रह्माहेत्यतः प्रागेव , आगच्छत्यरं ह्रदमित्यादिः तां मनसैवात्येति इत्यन्तो भागो योज्यः, अर्थक्रमानुसारात्। यस्तु तदुपरि तत् सुकृतदुष्कृते धूनुते इत्यादिः, विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैतीति भागः, स स्वस्थानेऽनन्वितः; सुकृतदुष्कृतधूननादेः विरजानद्यतिक्रमणपश्चाद्भाषित्वाभावात्; स्थूलदेह-वियोगकालिकत्वात्, स एतं देवयानं पन्थानमापद्येति प्रथमश्रुतवाक्यात् प्राक् स घटनीय इति साम्परायाधिकरणे, 'छन्दत उभयाविरोधात्' इति सूत्र एव स्थितम्। स आगच्छति तिल्यं वृक्षमिति तदनन्तरश्रुतवाक्यार्थस्तावत् ब्रह्मालङ्कारेणा-लङ्कारणानन्तरमेव भवतु। अस्तु वा तिल्यवृक्षप्राप्त्यनन्तरमेव अप्सरसां प्रत्युद्गतानां प्राप्तिः। अत्र छान्दोग्योक्तयोरैरम्मदीयसरस्सोमसवनाख्याश्वत्थयोरपि यथायथं घटनं युक्तम्। सोऽश्वत्थ एवायं तिल्य इत्यपि विमृश्यम्। सर्वमिदं सूक्ष्मं विभाव्यैव श्रीमति रहस्यत्रयसारे, गतिविशेषाधिकारे, विरजापारं प्रापय्य अप्राकृतशरीरं प्रदाय ऐरम्मदीयं सरः संगमय्य सोमसवनाख्यमश्वत्थमुपगमय्य मालाञ्जनादिहस्ता अप्सरसः

Sri Venkateswara Vedic University

** परंब्रह्मप्राप्नुवानस्य मुक्तजीवस्य ब्रह्मालङ्कारप्राप्त्यादिवैभवम् **

तं पञ्च शतान्यप्सरसां प्रतियन्ति। शतं चूर्णहस्ताः शतं वासोहस्ताः शतं फलहस्ताः। शतमाञ्जनहस्ताः। शतं माल्यहस्ताः।

दीपिका

एवं ब्रह्मण उक्त्यनन्तरमनेकब्रह्मसभास्थजनैः समं तं ब्रह्मलोकमागतं प्रर्यङ्कविद्याविदं पञ्च शतानि पञ्चसंख्याकानि शतानि। अप्सरसां रूपयौवनसंपन्नानां मनोरमाणां स्तनजघनभारवशीकृतमध्यदेशानां मदनमदमोमुह्यमानदिगन्तराणां साधारणस्त्रीणां प्रतियन्ति संमुखमागच्छन्ति तद्दर्शनलालसानाम्। संविभागेन संभारानाह- शतं शतसंख्याकाश्चूर्णहस्ता हरिद्राकेसरकुङ्कुमचन्दनादिचूर्णकराः। शतं शतसंख्याका वासोहस्ता विविधदुकूलकराः।। शतं शतसंख्याकाः फलहस्ताः शतं शतसंख्याका आञ्जनहस्ता अञ्जनोपयोगिद्रव्यमाञ्जनं कर्पूरकस्तूरीकङ्कोलकतैलादिकराः

विष्णुवेदाख्ययतिव्याख्या

अप्सरसां पञ्चशतानि तमनुधावन्ति मालाञ्जनचूर्णवासः फणहस्तानि पृष्ठतो धावन्ति।

स्थूलमुक्ताफलान्यत्र फणशब्दोदितानि हि।
वासो गन्धादिभोगानामुपलक्षणमत्र हि।
स्थूलभोगैरलंकृत्य ब्रह्माभिप्रस्थितो भवेत्।

अप्सरसः स्थूलभोगैरलंकुर्वन्ति।

प्रकाशिका

तं पञ्च शतानि... अभिप्रैति। फणः भूषणम्। ब्रह्मैवाभिप्रैति। ब्रह्मदर्शनोत्सुक एव भवति; नाप्सरसंभाषणवासोभूषणादिषु सादर इत्यर्थः। शिष्टं स्पष्टम्।।

परिष्कारः

प्रत्युद्गमय्य ब्रह्मालङ्कारेणालङ्कार्यब्रह्मगन्धरसतेजांसि प्रवेश्य इति क्रमः श्रीदेशिकचरणैर्दर्शित इति तदवधानेनेहार्थक्रमविन्यासो भाव्यः। विरजां नदीं प्रापदित्यस्य प्रकृतभाष्योक्तरीत्या विरजानदीसमीपं प्राप्तवानिति समीपदेशप्राप्तिरूपार्थविवक्षया स आगच्छति विरजां नदीमित्यादिवक्ष्यमाणवाक्यसामञ्जस्यसंपादनेऽपि अत्राप्सरः

Sri Venkateswara Vedic University

तं ब्रह्मालंकारेणालंकुर्वन्ति। स ब्रह्मालंकारेणालंकृतो ब्रह्म विद्वान्ब्रह्माभिप्रैति।

∗ आरह्रदप्राप्तिः ∗

स आगच्छत्यारं ह्रदम्। तं मनसाऽत्येति। तमित्वा संप्रतिविदो मज्जन्ति। स आगच्छति मुहूर्तान्येष्टिहान्।

दीपिका

विविधाभरणहस्ताः शतं शतसंख्याका माल्यहस्ता। अनेकवर्णविचित्रगन्धपुष्पदामकराः, तमनुतीर्णारह्रदं प्राप्तब्रह्मलोकं ब्रह्मालंकारेणालंकुर्वन्ति हिरण्यगर्भयोग्येन मण्डनेन मण्डयन्ति। स पर्यङ्कविद्यावित्। अप्सरोभिर्ब्रह्मालंकारेणालंकृतः, स्पष्टम्। ब्रह्म-विद्वान्हिरण्यगर्भज्ञानवान्ब्रह्मैवाभिप्रैति हिरण्यगर्भरूपमेव सर्वतः प्राप्नोति न त्वन्यत्।

ब्रह्मप्राप्तौ क्रममाह– स प्राप्तब्रह्मलोकोऽप्सरोभिर्ब्रह्मालंकारेणालंकृतस्ताभिः सभाजनैश्चाऽऽगच्छति। प्राप्नोति। आरं ह्रदमारनामानं ह्रदम्। तमारं ह्रदं मनसा

विष्णुवेदाख्ययतिव्याख्या

स आरं ह्रदमागच्छति। तं ह्रदं प्राप्य ये ब्रह्मज्ञानरहिता असंप्रतिविदः ते तस्मिन् मज्जन्ति।

प्रकाशिका

स आगच्छति...मज्जन्ति। तमृत्वा तं ह्रद प्राप्य संप्रति इदानीमपि विदः ज्ञानिनः मज्जन्ति स्नान्तीत्यर्थः।।

परिष्कारः

क्रियमाणालङ्कारादिवर्णनं हि न प्राकृतशरीरे घटते इति ध्येयम्।

संप्रतिविदो मज्जन्तीति। सम्प्रतिशब्दस्य सम्यगित्यर्थः श्रुतिप्रसिद्धः; छान्दोग्ये वैश्वानरादिविद्यासु दृष्टश्च। अतो यथावस्थितपरावरतत्त्ववेदिन इति संप्रतिविद इत्यस्यार्थः स्यात्। अस्तु तावत् कोऽप्यर्थः। के ते मज्जनकर्तारः। न हि नित्यमुक्तानां मज्जनं पावनमपेक्षितम्; न च विरजादिनेदिष्ठं विहायात्र मज्जने विशेषगमकं किञ्चिदिति चेत्- सन्त्वेति संप्रतिविदः सनकसनन्दनादिसमाः महात्म्यबलात्

Sri Venkateswara Vedic University

* *विरजाप्राप्तिः* *

तेऽस्मादपद्रवन्ति। स आगच्छति विजरां नदीम्। तां मनसैवात्येति। तत्सुकृतदुष्कृते धुनुते।

दीपिका

नावाद्यनपेक्षः केवलेनान्तःकरणेनात्येति, अतीत्य गच्छति। युक्तं ह्येतत्। न ह्यारो ह्रदः कामक्रोधादिवृत्तिभेदः स्वातिक्रमणे मनोव्यतिरिक्तं साधनान्तरमपेक्षते।।

ये हि ब्रह्मविद्याशून्यास्तेषामनर्थमाह तमारं ह्रदमित्वा केनचित्कर्मणा प्राप्य संप्रतिविद आत्मनः प्रतिकूलं वैषयिकं सुखं तत्सम्यक्त्वेनानुकूलत्वेन जानन्तीति संप्रतिविदोऽज्ञा इत्यर्थः। मज्जन्ति भिन्ननौका इव समुद्रे पान्था अपुनरुद्धारं मग्ना भवन्ति। सोऽतिक्रान्तारह्रद आगच्छति प्राप्नोति। मुहूर्तान्योष्टिहान्येष्टिहेतिनाम-कान्मुहूर्तांस्ते मुहूर्ताः कामक्रोधादिवृत्त्युत्पादका अस्मान्मनसाऽतिक्रान्तारादपद्रवन्ति, अपगच्छन्ति स्वप्राणपरीप्सवोहतहिरण्यकशिपोर्नृसिंहादिव विप्रचित्तिप्रभृतयः। स स्वदर्शनेनापद्रावितमुहूर्त आगच्छति प्राप्नोति। विजरां नदीं विजरेतिनाम्नीं नदीं तां विजरां नदीं मनसैव साधनान्तरनिरपेक्षेणान्तःकरणेनैव। अत्येत्यतीत्य गच्छत्येव न त्वारह्रदोत्तारवन्मुहूर्तादिद्रावणं किञ्चित्करोति।

विष्णुवेदाख्ययतिव्याख्या

ततः।

मुहूर्तानि हि दिव्यानि ततो गच्छन्ति दूरतः।
परिच्छिन्नानि कालानि घ्नन्ति यानि स्वरूपतः।

प्रकाशिका

स आगच्छति मुहूर्तान्... अपद्रवन्ति। तमनिरुन्धानाः दूरतो गच्छन्तीत्यर्थः।।

परिष्कारः

केनापि मार्गेण प्रकृतिमण्डलमतिक्रम्य तत्संनिहितेऽत्रारेशुद्ध्यर्थे तदा तदा समागत्य मज्जनकर्तारः। ततः परं तु परमपदे न ते गन्तुं प्रभवन्ति, यत्र मुहूर्ताः यष्टिहा अमानवानानीतप्रतिषेद्धारो जाग्रति। पञ्चाग्निविद्यानिष्ठा वा ब्रह्मप्राप्तेः प्राक् कञ्चित्

Sri Venkateswara Vedic University

* सुकृतदुष्कृतधूननम् *

तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम्। तद्यथा रथेन धावयन्रथचक्रे पर्यवेक्षते। एवमहोरात्रे पर्यवेक्षते। एवं सुकृतदुष्कृते। सर्वाणि च द्वन्द्वानि।

दीपिका

ननु सुकृतमप्यस्ति सहायमस्य विजरोत्तार इत्यत आह–

तत्तत्र शरीरपरित्यागावसर उपास्यमानब्रह्मसाक्षात्कारावसरे वा सुकृतदुष्कृते पुण्यपापे धुनुतेऽश्व इव रोमाणि कम्पनेन सुकृतदुष्कृतयोः परिपाकज्ञानेन परित्यजति।

ननु सुकृतदुष्कृतयोः सतोः कथं परित्याग इत्याशङ्क्य यथाऽग्निना सतां काष्ठानां दाहस्तथेति परमं परिहारं परित्यज्य प्रसङ्गाद्ब्रह्मविदुषि प्रीतिद्वेषयोः फलं विवक्षुर्ब्रह्मविद्यां स्तौति–

तस्य ब्रह्मविदुषः शत्रुमित्रादिसमबुद्धेः प्रियाः प्रीतिं कुर्वाणा ज्ञातयो ज्ञात्युपलक्षिता मनुष्याः सुकृतं पुण्यमुपयन्ति प्राप्नुवन्ति विष्णोरिव प्रियाः। अप्रिया ब्रह्मविदुषि विद्वेषं कुर्वाणा दुष्कृतं पापमुपयन्तीत्यनुवर्तते। नन्विदमतिचित्रं यो हि यत्करोति न स तत्प्राप्नोतीत्याशङ्क्य दृष्टान्तेन समाधानमाह- तत्तत्र कारयितुरलेपे यथा दृष्टान्ते।

विष्णुवेदाख्ययतिव्याख्या

दिव्यकालानवच्छिन्नो भवेदित्यत्र गद्यते।

तां नदीं मनसैवात्येति तदा सुकृतदुष्कृतरहितः । तस्य सुकृतं प्रिया ज्ञातय उपगच्छन्ति दुष्कृतमप्रियाः।

प्रकाशिका

तत् सुकृतदुष्कृते धूनुते। तत् तदैवेत्यर्थः। अयञ्च तच्छब्दः नाव्यवहित-विरजानद्यतिक्रमणकालवाची। अपि तु, ये वै के चास्माल्लोकात् प्रयन्ति इति वाक्यनिर्दिष्टप्रयाणकालवाची।

परिष्कारः

कालं कैवल्यभुजस्तत्र गन्तुं शक्ताः। तत् सुकृतदुष्कृते धूनुत इत्यादिकं, स एतं देवयानमिति वाक्यात् प्राक् योजनीयमिति प्रागेवोक्तम्। अस्यात्र पाठस्तु, विरजाति-

Sri Venkateswara Vedic University

स एष विसुकृतो विदुष्कृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति।। ४ ।।

दीपिका

अयं दृष्टान्तः– रथेन निमित्तभूतेन कारणेन धावयन्भूमौ प्रेरयन् रथचक्रे रथाङ्गे पर्यवेक्षते भूमौ संयोगवियोगफलवती रथचक्रे समन्तादवलोकयते न तु तत्फलं प्राप्नोति। एवमनेन प्रकारेणान्तःकरणशरीरादिकृतादृष्टानिमित्तं प्रवर्तमाने अहोरात्रे रात्र्यहनी पर्यवेक्षते समन्तादवल्लोकयति । एवं यथा रात्र्यहनी पर्यवेक्षते तथा सुकृतदुष्कृते पुण्यपापे न केवलं ते एव किन्तु सर्वाणि च द्वन्द्वानि च्छायात-पशीतोष्णसुखदुःखादीनि निखिलान्यपि द्वंद्वानि पर्यवेक्षते न तु तत्फलभाग्भवति। न हीक्षितुः फलं कलहादेर्द्रष्टुर्मध्यस्थस्य दुःखस्यादर्शनात्। स उपासक एष प्राप्तब्रह्मलोको ब्रह्मलोकप्राप्तेः पूर्वमेव विसुकृतो विदुष्कृतोऽपगतपुण्योऽपगतपापो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति व्याख्यातम्।। ४।।

विष्णुवेदाख्ययतिव्याख्या

यथा रथेन धावयन् रथचक्रे पर्यवेक्षेत तथैव अहोरात्रे पर्यवेक्षते। विरहिते सुकृतदुष्कृते अपि त्यक्तानि द्वन्द्वानि सर्वाणि च।

सर्वा भूतानि कालेन परिच्छिन्नान्युदीक्ष्य सः।
सर्वदुःखविनिर्मुक्तो ब्रह्माभि प्रस्थितो भवेत्।। ४।।

प्रकाशिका

इदञ्च वाक्यं गुणोपसंहारपादे चिन्तितम्– कौषीतकिनामुपनिषदि, विरजां नदीं मनसा अत्येति तत् सुकृतदुष्कृते धूनुते इति विरजानद्यतिक्रमणहेतुतया तदनन्तरभाविसुकृतदुष्कृतधूननश्रवणात्, अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानि इति, तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम् इति च श्रुत्या देहवियोगसमकालतया सुकृतदुष्कृतहानसंक्रमणयोः श्रवणात् कर्मैकदेशस्य

परिष्कारः

क्रमणानन्तरभाविब्रह्मालङ्कारार्हमस्य शरीरं न कर्माधीनम्, किन्तु अप्राकृतमिति ज्ञापनार्थः।

Sri Venkateswara Vedic University

प्रकाशिका

देहवियोगकाले नाशः, शेषस्य विरजानद्यतिक्रमणानन्तरं नाश इति प्राप्ते उच्यते- –सांपराये तर्तव्याभावात् तथा ह्यन्ये। सांपराये– देहापक्रमणकाल एव सुकृतदुष्कृतविनाशः। ततः ऊर्ध्वं तत्साध्यस्य तर्तव्यस्य– प्राप्तव्यस्य सुखदुःखानुस्वरूप फलस्याभावत्। तथा ह्यन्ये शाखिनः ब्रह्मविदः शरीरपरित्यागानन्तरं ब्रह्मप्राप्तिव्यतिरेकेण कर्मफलानुभवाभावमधीयते, तस्य तावदेव चिरम्, यावन्न विमोक्ष्येऽथ संपत्स्ये इति। छन्दत उभयाविरोधात्। अर्थस्वाभाव्यात् देहवियोगकाल एव कर्मनाश इति निश्चिते तयोरविरोधाय, विरजां नदीं मनसा अत्येति तत् सुकृतदुष्कृते धूनुते इत्यस्य वाक्यस्य तच्छब्दस्य छन्दतः यथेष्टमन्वयोऽङ्गीकर्तव्यः। [शङ्कते?] गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः। सुकृतदुष्कृतैकदेशस्य देहवियोगकाले हानिः, शेषस्याध्वनि हानिरित्यभ्युपगम एव देवयानगतिश्रुतेरर्थवत्त्वम्। इतरथा हि देहवियोगकाल एव सर्वकर्मक्षये सूक्ष्मशरीरस्यापि नाशेन केवलस्याऽऽत्मनो देवयानासंभवेन देवयानश्रुतेरर्थशून्यत्वमेव स्यादित्यर्थः। [अत्र?] उत्तरमाह– उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्। देहोत्क्रान्तिकाल एव सर्वकर्मक्षय उपपन्नः। क्षीणकर्मणोऽपि विदुषो विद्यामाहात्म्यात् सूक्ष्मदेहानुवृत्तिसंभवेन देवयानगमनसंभवात्। यथा लोके सस्यादि समृद्ध्यर्थमारब्धेऽपि तटाकादिके, सस्यादिसमृद्धीच्छायां तटाकादिनिर्माणहेतुभूतायां नष्टायामपि, पानीयपानाद्यर्थतया तटाकादिः स्थाप्यते, एवं कर्महेतुकसूक्ष्मदेहो नष्टेऽपि कर्मणि विद्याफलाय स्थाप्यत इत्यर्थः।

परिष्कारः

सूक्ष्मदेहानुवृत्तीति। ननु सस्याद्यर्थतया समारब्धस्य तटाकस्य पानीयाद्यर्थतया पश्चात् स्थापनवत् किमर्थमारब्धः सूक्ष्मदेहोविद्यामाहात्म्यात् स्थाप्यते? न च वेदान्तिमते सांख्यमत इव सकलसृष्टिकालिकशरीरानुवृत्तं सूक्ष्मशरीरं किञ्चिदस्ति, तदभावस्याधिकरणसारावलौ स्पष्टमुक्तेः। यथा,

> कल्पादौ भूतसूक्ष्मप्रभृतिभिरुदितं वर्ष्म कल्पान्तनाश्यं
> प्रत्येकं प्राणिभेदे नियतमनियतस्थूलदेहानुयायि।
> लिङ्गाख्यं भस्त्रिकान्तः परुवकवदवस्थायि सांख्यैः प्रगीतं

Sri Venkateswara Vedic University

प्रकाशिका

ननु देहवियोगकाल एव कर्मनाशे ब्रह्मविदां वसिष्ठावान्तरतपः प्रभृतीनां पुत्रजन्मादिनिमित्तसुखदुःखानुभवो न स्यादित्यत्राह– यावदधिकारमवस्थितिराधिकारिकाणाम् आधिकारिकाणां वसिष्ठादीनां यावदधिकारं कर्मावतिष्ठते; प्रारब्धस्य भोगैकनाश्यत्वादिति स्थितिः (तम्?)। प्रकृतमनुसरामः। **तस्य.... दुष्कृतम्।** ब्रह्मविदः इष्टानिष्टफलदित्सालक्षणपरमात्मप्रीत्यप्रीतिरूपसुकृतदुष्कृतयोश्चतस्रोऽवस्थाः श्रुताः विनाशः अश्लेषः धूननम् उपायनञ्चेति। विनाशः पूर्वाघविषयः। कर्मफलदित्साप्रतिबन्धलक्षणोऽश्लेष उत्तराघविषयः। तौ च– यद्ययमुपासकः प्रक्रान्तमुपासनं समापयेत्, पूर्वोत्तरयोः कर्मणोः फलं न दास्यामीत्येवं भगवत्संकल्परूपौ। उत्तरपूर्वाघाश्लेषविनाशौ दर्शनसमानाकारज्ञानारम्भ एव तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ... इति सूत्रोक्तन्यायेन भवतः। अन्तिमप्रत्ययपर्यन्तोपासननिवृत्त्यनन्तरम्, विनष्टाश्लिष्टयोरेव कर्मणोः, फलं नैव दास्यामीति संकल्परूपं विधूननं देहवियोगकाले भवति; तस्मिन्नेव समये एतदीयप्रियाप्रियजनेषु एतदीयसुकृतदुष्कृतानुरूपेष्टानिष्टफलदित्सालक्षणमुपायनं च भवति।।

यथा.... द्वन्द्वानि। यथा रथेन धावन् पुरुषः स्वयं निर्व्यापार एव सन् व्याप्रियमाणरथचक्रादिकं साक्षितया पश्यन् गमनक्रियाजनितशरीरायासादिशून्यस्सन् हृष्टो भवति। एवं प्रवर्तमानकालचक्रं सुकृतदुष्कृततत्साध्यद्वन्द्वपरम्परां स्वानन्वितामेव

परिष्कारः

सूक्ष्मांशः पूर्वमूर्तेरुपरितनतनोर्बीजमत्रेष्यते तत्।। (४८६) इति;

इति चेत्–उच्यते। कर्मफलानुभवार्थे कल्पितं यत् चरमं स्थूलशरीरं मुमुक्षोः प्रस्थानात् पश्चाद् भस्मादिभावमापत्स्यमानम्, तस्य कश्चिदंशः पूर्वं स्थूलशरीरे फलानुभवायतनतयोपयुक्तः संप्रतिगत्याद्यौपयिकतया विद्यया स्थाप्यते स्थूलदेहेन सह भस्मताद्यनापादनेन। अयञ्च चरमशरीरांशः न कस्यचिद्देहस्य बीजभूतः, उपरि प्राकृतदेहप्रसक्त्यभावात्। अतोऽयं सूक्ष्मांशो न भाविफलानुभवोपयोगीति।

एवमहोरात्रे इति। रथेन गच्छतः रथचक्राधीनभ्रमणानाश्रयत्ववत् अहोरात्रादिद्वन्द्वव्यापारानालीढत्वमस्येति भावः।

* इल्यवृक्षप्राप्तिः, ब्रह्मगन्धप्रवेशश्च *

स आगच्छतील्यं वृक्षम्। तं ब्रह्मगन्धः प्रविशति। स आगच्छति सालज्यं संस्थानम्। तं ब्रह्मरसः प्रविशति।

दीपिका

स उपासक उत्तीर्णविजर आगच्छति प्राप्नोति। इल्यं वृक्षमिल्यनामानं वृक्षं तं प्राप्तेल्यवृक्षं ब्रह्मगन्धोऽननुभूतपूर्वः सर्वसुरभिगन्धातिशयी ब्रह्मगन्धो येनाऽऽघ्रातेन ब्रह्मलोकव्यतिरिक्तलोकेषु सुगन्धेष्वपि दुर्गन्धबुद्धिर्भवति तादृशो विड्वराहाणामिव मनुष्यजन्मन्याघ्रातश्चम्पकादिगन्धो विड्गन्धे दुर्गन्धबुद्धिजनकः प्रविशति घ्राणद्वारेणान्तर्हृदयकमलमुकुलमागच्छति। स आघ्रातब्रह्मगन्ध आगच्छति प्राप्नोति सालज्यं संस्थानं सालज्यनामकं पत्तनम्। तं प्राप्तसालज्यम्। ब्रह्मरसोऽनास्वादितपूर्वोऽन्यरसहेयताबुद्धिजनको ब्रह्मलोक एवाऽऽसक्तिजनकोऽपूर्वो रसो रसनाद्वारेण प्रविशति। व्याख्यातम्। स आस्वादितब्रह्मरस आगच्छति प्राप्नोति। अपराजितमायतनमपराजितनामकं ब्रह्मगृहम्। तं प्राप्तापराजितं ब्रह्मतेजोऽदृष्टपूर्वं सर्वतेजसां न्यक्कारकारकं ब्रह्मलोक एवाऽऽसक्तिकारकं चक्षुर्द्वारा प्रविशति

विष्णुवेदाख्ययतिव्याख्या

गच्छन्नेव ततो गन्धानैश्वरान् प्राप्य निर्वृतः।
सप्तान्यानि रसादीनि भुञ्जन् गच्छति निर्वृतः।
ततो गन्धादयो ह्यत्र स्पर्शशब्दोपलक्षणाः।

प्रकाशिका

पश्यन् निर्दुःखसुखमास्ते।।

स एषः... अभिप्रैति। स्पष्टोऽर्थः।।

स आगच्छति...। यथा प्रभाते अनुकूलं आदित्यादिसामीप्यातिशयकृतं प्रकाशाधिक्यम्, एवं देशविशेषविशिष्टब्रह्मसान्निध्यातिशयानुकलसमेधमानविकासावस्थाविशेषाः ब्रह्मगन्ध-ब्रह्मरसादिशब्दैरभिलप्यन्ते। ब्रह्मणः सर्वगन्धत्वादेः, सर्वगन्धस्सर्वरसः इति प्रतिपन्नत्वात् यथाश्रुतार्थग्रहणेऽपि न दोषः। अपद्रवतः तस्मै मार्गं प्रयच्छत इत्यर्थः।।

Sri Venkateswara Vedic University

*** *अपराजितायतनप्राप्तिः* ***

स आगच्छत्यपराजितमायतनम्। तं ब्रह्मतेजः प्रविशति।

*** *इन्द्रप्रजापत्योः अपद्रवणम्* ***

स आगच्छतीन्द्रप्रजापती द्वारगोपौ। तावस्मादपद्रवतः।

*** *विभुप्रमितप्राप्तिः* ***

स आगच्छति विभुप्रमितम्। तं ब्रह्मतेजः प्रविशति।

*** *विचक्षणामासन्दीप्राप्तिः* ***

स आगच्छति विचक्षणामासन्दीम्। बृहद्रथन्तरे सामनी पूर्वौ पादौ।

दीपिका

व्याख्यातम्। स प्रविष्टब्रह्मतेजा आगच्छति प्राप्नोति।। इन्द्रप्रजापतीद्वार-गोपाविन्द्रप्रजापतिनामानौ द्वाररक्षाकारकौ द्वारस्थौ ताविन्द्रप्रजापतिद्वारस्थौ। अस्मात्प्राप्तब्रह्मगन्धरसतेजसो ब्रह्मण एव दर्शनमात्रेण बद्धाञ्जलीपरित्यक्तासनौ द्वारप्रदेशात्सरभसं जय जयेति शब्दमुच्चारयन्तौ। अपद्रवतोऽपसरतः। सोऽपद्रावितेन्द्रप्रजापतिरागच्छति प्राप्नोति। विभुप्रमितं विभुनामकं प्रमितं सभास्थलम्। तं प्राप्तविभुप्रमितं ब्रह्मतेजो ब्रह्माहमस्मीति प्रकृतेरहंकारो मनसा द्वारेण प्रविशति, व्याख्यातम्। स प्राप्तब्रह्मतेजा आगच्छति प्राप्नोति विचक्षणामासन्दीं विचक्षणेतिनामिकाम् । तस्या आसान्द्याः प्रकारमाह–बृहद्रथन्तरे सामनी अस्याः पूर्वौ पादौ श्यैतनौधसे सामनी अस्या अपरौ पादौ

विष्णुवेदाख्ययतिव्याख्या

वृक्षादीनि पर्यङ्कान्तानि गच्छन् दिव्यगन्धरसस्पर्शान् यशश्चाप्नोति। ह्रदे नद्यां च स्पर्शः वृक्षे गन्धः संस्थाने रसः आयतने तेजः प्रमिते यशः। मुहूर्तानि द्वारगोपौ च तं दृष्ट्वा दूरतो गच्छन्ति।

Sri Venkateswara Vedic University

श्यैतनौधसे चापरौ वैरूपवैराजे। अनूच्ये शाक्वररैवते। तिरश्ची सा प्रज्ञा। प्रज्ञया हि विपश्यति।

*** *अमितौजसपर्यङ्कप्राप्तिः* ***

स आगच्छत्यमितौजसं पर्यङ्कम्। स प्राणः।

*** *पर्यङ्कस्वरूपनिरूपणम्* ***

तस्य भूतं च भविष्यच्च पूर्वौ पादौ। श्रीश्चेरा चापरौ।

दीपिका

वैरूपवैराजे सामनी अस्या अनूच्ये दक्षिणोत्तरे अस्त्रे शाक्वररैवते सामनी अस्यास्तिरश्ची पूर्वपश्चिमे सा चतुरस्रा वेदी प्रज्ञा। सा विचक्षणाऽऽसन्दी प्रज्ञा महत्तत्त्वरूपिणी बुद्धिः। तत्राऽऽगतस्य फलमाह– प्रज्ञया हि विपश्यति हि यस्माद्विचक्षणां प्राप्तस्तस्मात्प्रज्ञयाऽऽत्मबुद्ध्या विविधं विश्वं पश्यति। स प्राप्तप्रज्ञः। आगच्छति प्राप्नोति। अमितौजसं पर्यङ्कम्। अमितौजोनामकं पर्यङ्कम्। स प्राणः पञ्चवृत्तिः सर्वेन्द्रियेभ्योऽभ्यधिकः क्रियाशक्तिः। तस्यामितौजसः पर्यङ्कस्य भूतं च भविष्यच्च पूर्वौ पादौ मस्तकाधारगात्रस्याध-स्ताद्वर्तमानौ प्राच्यां दिशि चरणातीतं भावि च विश्वम्। चकारावेकैकस्यैकैकपादत्वार्थौ। श्रीश्चेरा चापरौ, इरा इला। पादगात्रस्याधस्ताद्वर्तमानौ पश्चिमायां दिश्यन्यौ चरणौ लक्ष्मीर्धरणी च। चकारौ पूर्ववत्।।

विष्णुवेदाख्ययतिव्याख्या

आसन्दी दिव्यदृष्टिर्हि सप्तमी तस्य जायते।

द्वारपालानुरोधोऽत्र षष्ठो भोगः प्रकीर्तितः।

सा आसन्दी प्रज्ञारूपा प्रज्ञया हि विपश्यतीति विचक्षणा। ततोऽमितौजसं पर्यङ्कमागच्छति।

प्रकाशिका

सा प्रज्ञा प्रज्ञाधिष्ठत्री देवता। तत्संबन्धादयं सर्वं पश्यतीत्यर्थः।। प्राणः प्राणाभि-

Sri Venkateswara Vedic University

बृहद्रथन्तरे अनूच्ये। भद्रयज्ञायज्ञीये शीर्षण्ये। ऋचश्च सामानि च प्राचीनातानानि यजूंषि तिरश्चीनानि। सोमांश्च उपस्तरणम्। उद्गीथ उपश्रीः।

दीपिका

बृहद्रथन्तरे अनूच्ये दक्षिणोत्तरयोर्दीर्घे खट्वाङ्गे अनूच्यसंज्ञे बृहद्रथन्तरसामनी भद्रयज्ञायज्ञीय शीर्षण्ये पूर्वपश्चिमयोर्हस्वे खट्वाङ्गे पादाधारे शीर्षण्ये शीर्षपादस्थले भद्रयज्ञायज्ञीयसामनी। एवं कोष्ठचतुष्टये पादचतुष्टेन निष्पन्ने पट्टिकामाह- ऋचश्च सामानि च प्राचीनातानानि। प्राक्प्रत्यगुपर्यधोभागेन वर्तमाना दीर्घाः पट्टिकाः प्राचीनातानानि तदृचश्च सामानि च । चकारावृक्सामयोरध-ऊर्ध्वभागनियमार्थौ। यजूंषि तिरश्चीनानि यजूंषि प्रसिद्धानि दक्षिणोत्तरयोस्तिर्यक्पट्टिकारूपाणि। सोमांशव उपस्तरणं सोमकिरणाः सुकोमलकशिपुस्वरूपम्। उद्गीथ उपश्रीः, उद्गीथः

विष्णुवेदाख्ययतिव्याख्या

एवमीश्वररूपोऽयं पर्यङ्कमधिगच्छति।
स पर्यङ्कः प्राण एव ब्रह्माधिष्ठानभूतः।
सर्वात्मा प्राण एवात्ता पर्यङ्क इति शब्दितः।
विज्ञानशक्त्युपहिते कार्ये ब्रह्मणि शाश्वते।
कारणात्मा स्थितो विष्णुरित्येतदिह वर्ण्यते।
यः प्राणे तिष्ठन्नित्यादावेषोऽर्थः प्रतिपाद्यते।

तस्य पर्यङ्कस्य भूतकालो भविष्यत्कालश्च पूर्वौ पादौ। श्रीश्च इरा चापरौ पादौ। बृहद्रथन्तरसामनी अनूच्ये। भद्रयज्ञायज्ञीयसामनी शीर्षण्ये। ऋचः

प्रकाशिका

मानीत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्।। तस्य पर्यङ्कस्य चतुरोऽपि पादानाह **तस्य... अपरौ।** भूतभविष्यत्कालैश्वर्यान्नाभिमानिदेवताश्चत्वारः पादाः।। बृहद्रथन्तरे अनूच्ये। बृहद्रथन्तराख्ये सामनी अनूचीनदारूणीं इत्यर्थः।।

भद्र... शीर्षण्ये। भद्रयज्ञायज्ञीयाख्ये सामनी तिरश्चीनदारुणी।। प्राचीनाततं पर्यङ्कातता दीर्घाः तान्तवरज्जुविशेषाः।। तिरश्चीनानि तिर्यक्तरज्जुविशेषाः। सोमांशवउपस्तरणम्। चन्द्रकिरणा एवाऽऽस्तरणम्।।

Sri Venkateswara Vedic University

श्रीरुपबर्हणम्। तस्मिन्ब्रह्माऽऽस्ते।

पर्यङ्कारोहणम्, ब्रह्मणा साकं संवादश्च

तमित्थंवित्पादेनैवाग्र आरोहति। तं ब्रह्मा पृच्छति कोऽसीति। तं

दीपिका

सामभक्तिविशेषः। उपस्तरणस्योपर्यापादमस्तकं प्रक्षिप्यमाणं क्षीरगौरं मृदुतरं वस्त्रमुपश्रीस्तदुद्गीथः। श्रीरुपबर्हणमुच्छीर्षकं लक्ष्मीः। यद्यपीयं पादत्वेन पूर्वमुक्ता तथाऽपि पूर्वा लौकिक्युत्तरा तु वैदिकीति विभागात्पुनरुक्तिर्न दोषः। तस्मिन्प्राणपर्यङ्के भूतं चेत्यारम्भ श्रीरुपबर्हणमित्यन्तेनोक्ते। ब्रह्माऽऽस्ते हिरण्यगर्भस्वरूपं स्वतादात्म्येनोपास्यमानमुपविष्टं वर्तते।

तं ब्रह्मण आसनभूतं पर्यङ्कमुक्तमित्थं विदुक्तपर्यङ्कस्थेन ब्रह्मणा तादात्म्यवित्पादेनैव चरणेनैव न तु पादावधस्तात्प्रक्षिप्य जघनकराद्यारोपणेनाग्रे प्रथमत आरोहत्यारोहणं करोति।।

तं पादेनैवोक्तपर्यङ्कमारोहन्तं प्रियं पुत्रमिव पिता ब्रह्मा पृच्छति हिरण्यगर्भो ब्रूते। ब्रह्मोक्तिमाह– कः प्रश्नेऽसि भवसीत्यनेन प्रकारेण श्रुतिः शिक्षयति तं कोऽसीति ब्रुवाणं ब्रह्माणं प्रतिब्रूयात्प्रत्युत्तरं वदेत्।

विष्णुवेदाख्ययतिव्याख्या

सामानि च प्राचीनातानम्। तिरश्चीनानि आतानानि यजूंषि। उपस्तरणं सोमांशवः। उपश्रीरुद्गीथः। उपबर्हणं श्रीः। एवं भूते पर्यङ्के ब्रह्म आस्ते। इत्थंवित् तं पर्यङ्कं पादेनैवाग्र आरोहति । तं कोऽसीति ब्रह्माह। तं विष्णुं प्रतिब्रूयात्।

तमागतं समीक्ष्यासौ परमात्मा जगन्मयः।
कस्त्वमित्याह सोऽप्याह पूर्वोक्तं सर्वमादरात्।

प्रकाशिका

उद्गीथ उपश्रीः श्रीसमीपे वर्तमानमास्तरणमुद्गीथः।। उपबर्हणं पादोपधानम्।। **तस्मिन्.... प्रतिब्रूयात्।** स्पष्टोऽर्थः।।

परिष्कारः

तं प्रतिब्रूयादिति। एवं प्रतिब्रुवतः

Sri Venkateswara Vedic University

प्रतिब्रूयात्। ऋतुरस्म्यार्तवोऽस्मि। आकाशाद्योने: संभूत:। भाया[१] एतत्संवत्सरस्य तेजो भूतस्य भूतस्य। भूतस्य भूत स्याऽऽत्मा[२]।

दीपिका

वक्तव्यं प्रत्युत्तरमाह ऋतुरस्मि वसन्ताद्यृतुस्वरूपो भवामि। कालात्मकत्व उपपत्तिमाह- आर्तवोऽस्मि, ऋतुसंबन्धी भवामि। कालात्मकेन मया संबन्धात्। मम कालात्मनस्त्वया तादृशेनाभेदप्राप्तिर्यतस्तत: काल: कालसंबन्धी चाहं भवामीत्यर्थ:। तर्हि किं यथा चन्द्रमस: समागत ऋतुरार्तवश्च तथेत्याशङ्क्य नेत्याह– आकाशादव्याकृताद्योनेरुपादानकारणात्संभूत उत्पन्नो भाया: स्वयंप्रकाशाद्ब्रह्मण:। अयमर्थ:।

न केवलं जडमुपादानकारणं किन्तु स्वयंप्राकाशं ब्रह्म शबलमिति। एतत्संवत्सरस्य तेजो भूतस्य भूतस्य भूतस्य भूतस्य। ननु कथं भाया आकाशाद्योने: संभूत: कथमृतुरार्तवश्चेत्यत आह– भूतस्यातीतस्य भूतस्य यथार्थस्य कारणरूपस्य भूतस्य चतुर्विधचेतनाचेतनात्मकस्य भूतस्य पञ्चमहाभूतात्मकस्य। न हि संवत्सरमन्तरेण चतुर्विधानि भूतानि पञ्च भूतानि चोत्पद्यन्ते। संवत्सरस्य वसन्ताद्यनेकर्तुस्वरूपस्यैतत्संवत्सरप्रवर्तकमन्तर्बहिर्वर्तमानं तेजो दीप्तिस्वरूपं मद्बुद्धिप्रकाशकमात्माऽऽत्मेति प्रत्ययव्यवहारयोग्यम्।

विष्णुवेदाख्ययतिव्याख्या

स्थूलदेहोपभोगोक्त्या स्थूलदेहोऽपि चापतेत्।
ब्रह्मलोकं गते तस्मात् स्थूलदेहोऽस्य जायते।
संकल्पात् परमेशस्य दिव्यदृष्ट्यादिसंभव:।
आकाशादिति वाक्येन परंब्रह्म निगद्यते।

प्रकाशिका

ऋतु:...अस्मि। अयञ्च मन्त्रखण्ड: प्राग्व्याकृत:।।

आकाशात् योने:.... अस्मीति। अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशम् आकाशाद्वायुम्। वायुर्भूत्वा धूमो भवति इति श्रुत्युक्तरीत्या

१. उभायै इति विष्णुवेदयतिपाठ:

Sri Venkateswara Vedic University

त्वमात्माऽसि यस्त्वमसि सोऽहमस्मीति। तमाह कोऽहमस्मीति।। ५।।

दीपिका

संवत्सरस्य च तत्कार्यस्य च मयि स्वयंप्रकाशस्वरूपेऽध्यस्तत्वात्। यदाऽप्येतत्संवत्सरस्यास्य तेजोभूतस्य तेजः स्वरूपस्याऽऽदित्यादितेजसः प्रवर्तमानत्वाद्भूतस्य व्यवहारयोग्यस्य चेतनाचेतनात्मकप्रपञ्चस्य भूतस्य कारणस्य भूतस्य कार्यस्याऽऽत्माऽधिष्ठानभूत इति व्याख्येयम्। तदाऽपि ॠतुत्वमार्तवत्वं चाविरुद्धं कालस्यापि कारणस्य समत्वात्।

ननु कोऽयमात्मात्मेत्यत आहत्वं पर्यङ्कस्थो ब्रह्माऽऽत्माऽस्यात्मशब्दप्रत्ययभाग्भवति। यद्येवं तर्हि किं तवेत्यत आह– यः प्रसिद्धः पर्यङ्कस्थस्त्वमसि ब्रह्मा मत्पुरतस्थितोऽसि स युष्मच्छब्दप्रत्ययालम्बन उक्तोऽहमस्म्यस्मच्छब्दप्रत्ययालम्बनो भवामि। इत्यनेन प्रकारेण प्रतिब्रूयादित्यन्वयः। तमेवं वदन्तमुपासकमाह ब्रूते पर्यङ्कस्थो ब्रह्मा। कः प्रश्ने। अहमस्मि यस्त्वमात्माऽसीति भवतोक्तः स कोऽहं ब्रह्मा भवामि।। ५ ।।

विष्णुवेदाख्ययतिव्याख्या

ततोऽस्य जन्म तद्रूपप्रतिभानमिहोच्यते।
संवत्सरात्मा कालोऽयमभयात्मा हि संस्थितः।
तस्यापि कारणत्वेन स्थितोऽहं परमात्मवित्।
सर्वान्तर्यामिभावेन स्थितोऽहं सर्वसारवित्।
किमत्र बहुनोक्तेन यस्त्वमात्मा जगन्मयः।
स एवाहं न संदेहः सत्यमेतद् ब्रवीम्यहम्।

प्रकाशिका

आकाशवाय्वादिक्रमेणावरुह्य योनेश्शरीरम् इति सूत्रोक्तरीत्या योनेस्संभूतोऽस्मि। भयायैतत्। एतत् भवनमयं(भवनं?) भयहेतुः। संवत्सरस्य-संवत्सरे, तेजोभूतस्य

परिष्कारः

'अनयाऽहं वशीभूतः कालमेतं न बुद्धवान्। उच्चमध्यमनीचान्तां तामहं कथमावसे।।
अपेत्याहमिमां हित्वा संश्रयिष्ये निरामयम्। अनेन साम्यं यास्यामि नानयाऽहमचेतसा।।

Sri Venkateswara Vedic University

सत्यमिति ब्रूयात्। किं तद्यत्सत्यमिति। यदन्यद्देवेभ्यश्च प्राणेभ्यश्च

दीपिका

इत्यनेन प्रकारेण ब्रह्मणा पुनः पृष्ट उपासको ब्रह्माणं प्रति सत्यं सत्यशब्दाभिधेयाधिष्ठानम्। इति ब्रूयादनेन प्रकारेण वदेत्। एवमुक्ते पुनर्ब्रह्मा पृच्छति-- किं प्रश्ने। तद्भवतोक्तं यद्भवतः प्रसिद्धं सत्यं सत्यशब्दाभिधेयम्। इत्यनेन प्रकारेण ब्रह्मणा पृष्टः पुनः प्रत्युत्तरं ब्रूयात्। यत्प्रसिद्धम्। अन्यद्देवेभ्यश्च प्राणेभ्यश्चेन्द्रियाधिष्ठातृभ्योऽग्न्यादिभ्य इन्द्रियेभ्यः सप्रमाणेभ्यो व्यतिरिक्तम्।

विष्णुवेदाख्ययतिव्याख्या

चन्द्रेण सह संवादे यदुक्तं पूर्वमेव हि।

तदेवात्रापि निर्वक्ति विष्णुमाहात्म्यमुत्तमम्।
विष्णुना सह संवादच्छलेन पुरुहूतवत्।
इन्द्रेण सह संवादच्छलेनात्र यथोच्यते।
ब्रह्मात्मत्वं हि जीवस्य तथेदमपि गृह्यताम्।
अविवक्षितमप्येतत् प्रत्ययार्थं हि वर्ण्यते।
तत्सन्निधौ हि वक्तव्यमिति मत्वा स्थिरो भवेत्।

तं ब्रह्माह कोऽहमस्मीति।। ५ ।।

त्वं सत्यमिति ब्रूयात्। यत् सत्यमिति तत् किम्।

सत्त्वनिर्वचनद्वारा ह्येषोऽर्थः प्रतिपाद्यते।
विष्णुरेव जगत् सर्वमिति बुद्धिर्यथा भवेत्।

प्रकाशिका

रेतोभूतस्य भूतस्य भूतस्य सर्वभूतस्य त्वमात्मा पौनःपुन्येन श्रद्धासोमवृष्ट्यन्नरेतोरूपशरीरयुक्तस्य सर्वस्यापि जीवजातस्य त्वमात्मा। [अतश्च प्रकृतिवियुक्तत्वं ब्रह्मात्मकत्वञ्च स्वस्योपन्यस्तं भवति।] वदात्मकोऽहमियन्तं कालम्,

परिष्कारः

क्षमं मम सहानेन ह्येकत्वं नानया सह'। इति श्रीमद्रहस्यत्रयसारोद्धृतवचनार्थो मनसि विपरिवर्तत इति मन्तव्यम्।

Sri Venkateswara Vedic University

तत्सत्। अथ यद्देवाश्च प्राणाश्च तत् त्यम्। तदेतया वाचाऽभिव्याह्रियते

दीपिका

चकारौ वाय्वाकाशाभ्यामप्यन्यदित्येतदर्थौ। तदुक्तमिन्द्रियप्राणव्यतिरिक्तं सत्सच्छब्दालम्बनम्। अथ पक्षान्तरे यत्प्रसिद्धं देवाश्च प्राणाश्चाग्न्यादय इन्द्रियाणि सप्राणकानि वाय्वाकाशौ च पूर्ववत्। तदुक्तं देवादिकं त्यं त्यच्छब्दालम्बनं तदुक्तं सचराचरं विश्वमेतयोक्तया सत्यरूपया वाचा वचनेनाभिव्याह्रियते सर्वत उच्यते। एतच्छब्दार्थमाह-- सत्यमिति। सत्यं सत्यशब्दरूपमित्यनुकरणार्थः। एतावद्यत्परिमाणमिदं प्रत्य-क्षादिप्रमाणगम्यं सर्वं निखिलं जगत्। इदानीं श्रुतिराह-

विष्णुवेदाख्ययतिव्याख्या

तथा सत्यपदस्यार्थो वर्ण्यते मुक्तिसिद्धये।
देवेभ्यश्च प्राणेभ्यश्च यदन्यत् तत् सदुच्यते।
अधिदैविकमध्यात्ममधिभूतमिति त्रिधा।
स्थितं जगत्यशब्दार्थः कारणं सदितीरितम्।
एष सत्यपदस्यार्थो वर्णितः स्वयमेव च ।
वर्ण्यते परमात्मा त्वं सर्वमेतदितीरितम्।
तदेतया वाचाभिव्याह्रियते सत्यमिति।

प्रकाशिका

अनेकजन्मसाहस्रीं संसार पदवीं व्रजन्।
मोहश्रमं प्रयातोऽसौ वासनारेणुकुण्ठितः ।।

इति न्यायेन संसारे पतितोऽस्मीत्यर्थः। मम कथमात्मत्वमित्यत्राह—आत्मासि व्यापकोऽसीत्यर्थः। व्यापकत्वादात्मत्वमुपपद्यत इति भावः। तमाह— ।यस्त्वमसि सोऽहमस्मीत्युक्तम्। अहं त्वा क इति पृच्छतीत्यर्थः। उत्तरमाह— सत्यमिति। पुनः पृच्छति किं तत् यत् सत्यामिति।

यदन्यत्... तदाह। सदित्यनेन देवप्राणव्यतिरिक्तमुच्यते। त्यमित्यनेन देवप्राणाः। अतः सत्यमित्युक्त्या सर्वं सगृहीतं भवति। ततश्च सत्यमस्मीत्युक्ते सर्वमस्मीत्युक्तं स्यादित्यर्थः। ततश्च सर्वेषामात्मैवमदात्मेत्यर्थः।

Sri Venkateswara Vedic University

सत्यमिति। एतावदिदं सर्वम्। इदं सर्वमसि इत्येवैनं तदाऽऽह। [तदेतदृक् श्लोकेनाभ्युक्तम्। यजूदरः सामशिरा असावृङ्मूर्तिरव्ययः। स ब्रह्मेति स विज्ञेय ऋषिर्ब्रह्ममयो महानिति।] तमाह केन मे पौंस्यानि नामान्याप्नोषीति।

दीपिका

इदं सर्वमसि, इदं प्रत्यक्षादिप्रमाणगम्यं सर्वं निखिलं भूतभौतिकात्मकं जगद्ब्रह्म त्वं भवसि।।

इत्येवैनं तदाऽऽह तदा तस्मिन्ब्रह्मणो मञ्चकसमीपागमनकाले इत्येवोक्तेनैव प्रकारेण न त्वन्येन। एनं ब्रह्माणम्। आहोपासकः समागतो ब्रूते। तमुपासकं स्वात्मनः सर्वात्मत्वं ब्रुवाणमाह ब्रूते ब्रह्मा। केन करणभूतेन रूपेण वा मे मम ब्रह्मणः सर्वात्मनः पौंस्यानि पुंलिङ्गसंबन्धीनि नामानि नामधेयानि। आप्नोषि प्राप्नोति। इत्यनेन प्रकारेण ब्रह्मणा पृष्टे प्राणेन पञ्चवृत्त्यात्मकेन साधिदैविकेन करणेन रूपेण वा। इति ब्रूयात्, अनेन प्रकारेण प्रत्युत्तरं वदेदुपासकः।।

विष्णुवेदाख्ययतिव्याख्या

इदं जगत् सर्वमेतावदेव। तदिदं सर्वं त्वमसीत्याहैनम्। तमाह–

प्रकाशिका

देहेन्द्रियमनः प्राणज्ञानव्यतिरेकं प्रश्नोत्तरव्याजेन स्पष्टयति तमाह केन मे..। नपुंसकत्वादीनि गुणत्रयोन्मेषविशेषरूपाणि; न तु आत्मस्वरूपगतानि। ततश्च तादृशधर्मयुक्तमनोवाक्प्राणनिष्ठान्येव नपुंसकत्वस्त्रीत्वपुंस्त्वानि। अतः तत्संबन्धा-दात्मनि लिङ्गसंबन्ध इति भावः।

परिष्कारः

तादृशेति। ननु प्राणादिषु देहातिरिक्तेषु कथं पुंस्त्वादिकम्। प्राणादिशब्द-गतमिति चेत्- तथा आत्मज्ञानादिपदेष्वपि सुवचमिति चेन्न; लोके स्त्रीषु वाचः, पुरुषेषु प्राणाख्यबलस्य, क्लीबे अशक्तमनसश्चोद्रेकदर्शनात् तादृशस्त्रीपुरुषादिविव-क्षया वागादिपदप्रयोगात्।

Sri Venkateswara Vedic University

प्राणेनेति ब्रूयात्। केन स्त्रीनामानीति वाचेति। केन नपुंसकानीति मनसेति। केन गन्धानिति घ्राणेनेत्येव[१] ब्रूयात्। केन रूपाणीति चक्षुषेति। केन

दीपिका

पुनर्ब्रह्मा पृच्छति—केन करणेन रूपेण वा स्त्रीनामानि स्त्रीलिङ्गनामधेयानि। आप्नोषीत्यत्र वक्ष्यमाणेषु चानुवर्तते। इत्यनेन प्रकारेण पृष्टे। वाचा प्राणनिष्पाद्यया-वर्णाभिव्यक्तिहेतुभूतया। इत्यनेन प्रकारेण ब्रूयादित्यनुवर्ततेऽत्र वक्ष्यमाणेषु च । पुनः पृच्छति–केन करणेन रूपेण वा नपुंसकानि नपुंसकलिङ्गनामानि। इत्यनेन प्रकारेण पृष्ट उत्तरमाह-मनसान्तःकरणेन साधिदैविकेन इत्यनेन प्रकारेण पुनः पृच्छति केन करणेन गन्धान् पृथिव्येकगुणान् इत्यनेन प्रकारेण। उत्तरमाह– प्राणेन साधिदैविकेनेत्येव ब्रूयात्, अनेनैव प्रकारेण वदेत्। ब्रूयादित्यनुवर्तत इत्येतदर्थं मध्ये च ग्रहणमन्तेऽपि ग्रहीष्यति। एवकारः प्राणशब्दस्य द्विरभिधानं कथं करणीय-मिति शङ्कानिवारणार्थः।

विष्णुवेदाख्ययतिव्याख्या

तं ब्रह्म पुनरप्याह तस्य बुद्धिपरीक्षया।
त्रिधा स्थितस्य सर्वस्य त्रिष्वन्तर्भावसिद्धये।

नामपदानां त्रयाणां पौंस्नानि पुंलिङ्गानि केनाप्नोषि इति । प्राणेन पौंस्नानि नामान्याप्नवानीत्येव ब्रूयात्।

प्राणेनेत्यादिकं वाक्यं तथोपास्तिविवक्षया।
प्राणे वस्त्वात्मके बुद्धौ वाचि सर्वमिदं जगत्।

केन पदेन स्त्रीनामान्याप्नोषि। स्त्रीनामानि सर्वाणि वाचाप्नवानीति

प्रकाशिका

प्राणादीनां तृतीयानिर्देशेन करणत्वप्रतीतेः स्वस्य कर्तृत्वप्रतीतेश्च मनोवाक्प्राणव्यतिरेकः सिद्धः। एवमुत्तरत्रापि द्रष्टव्यम्।। घ्राणेनेति। घ्राणेन गन्धान् जानामीति ब्रूयादित्यर्थः। एवमुत्तरत्रापि यथायोग्यमन्वयः तत्तदिन्द्रियव्यतिरेकश्च बोध्यः।।

१.प्राणेन इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

शब्दानिति श्रोत्रेणेति। केनान्नरसानिति जिह्वयेति। केन कर्माणीति हस्ताभ्यामिति। केन सुखदुःखे इति शरीरेणेति। केनाऽऽनन्दं रतिं

दीपिका

पुनः पृच्छति केन करणेन रूपाणि तेजोवन्नगुणभूतानीत्यनेन प्रकारेण। उत्तरमाह-- चक्षुषा नेत्रेण साधिदैविकेन करणेन। इत्यनेन प्रकारेण। केन स्पर्शास्त्वचेति प्रश्नोत्तरे बहिरेवावगन्तव्ये। पुनः पृच्छति–केन करणेन शब्दान्ध्वनिवर्णपद-वाक्यादिरूपान्। इत्यनेन प्रकारेण। उत्तरमाह–श्रोत्रेण शब्दोपलब्धिकरणेन साधिदैविकेन। इत्यनेन प्रकारेण। पुनः पृच्छति– केन करणेनान्नरसानन्नस्यादनीयस्य लेह्यपेयचोष्यभोज्यस्य रसान्कटुकाम्ललवणतीक्ष्णकषायमधुररसान्। इत्यनेन प्रकारेण। उत्तरमाह– जिह्वया रसनेन्द्रियेण साधिदैविकेन। इत्यनेन प्रकारेण। पुनः पृच्छति-- केन करणेन कर्माण्यादातव्यानि। इत्यनेन प्रकारेण। उत्तरमाह– हस्ताभ्यां हस्तद्वयरूपेण करणेन साधिदैविकेन। इत्यनेन प्रकारेण। पृच्छति– केन करणेन

विष्णुवेदाख्ययतिव्याख्या

ब्रूयात्। केन पदेन नपुंसकान्याप्नोषि। मनसा नपुंसकान्याप्नवानीति ब्रूयात्।

तथा सर्वात्मकत्वं हि प्राणादीनामिहोच्यते।
विष्णुस्त्रयात्मा संवृत्तः सोऽहमस्मीत्युपासना।

गन्धान् केनाप्नोषि। एवं सर्वत्र योज्यम्। कारणे हि यथा लोके कार्यं तिष्ठति संवृतम्।

यथा तन्मयमेवेदमित्युक्तं काण्वशाखिभिः।
पुंलिङ्गानि हि नामानि प्राणनाम्नि स्थितानि हि।
सामान्ये हि विशेषाणामन्तर्भावोऽत्र दृश्यते।
प्राणानामपि सामान्यं विशेषाणीतराणि तु।
यथा गोत्वं हि सामान्यं विशेषा व्यक्तयः स्मृताः।

प्रकाशिका

शरीरेणेति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति श्रुतेः वैषयिकसुखदुःखयोः

Sri Venkateswara Vedic University

प्रजातिमित्युपस्थेनेति। केनेत्या इति पादाभ्यामिति। केन धियो विज्ञातव्यं कामानिति प्रज्ञयेति ब्रूयात्। तमाहापो वै खलु मे ह्यसावयं त लोक इति।

दीपिका

सुखदुःखे अनुकूल-प्रतिकूलवेदनीये। इत्यनेन प्रकारेण। उत्तरमाह– शरीरेण स्थूलसूक्ष्माख्येण पुण्यापुण्यसहकृताज्ञानहेतुना देहेन। इत्यनेन प्रकारेण। पुनः पृच्छति– केन करणेनाऽऽनन्दं मैथुनावसानसमुत्थं सुखं रतिमैथुनरागजं सुखमा-मैथुनावसानं योषिदालिङ्गनमारभ्य। प्रजातिं प्रजाः कन्यासुतादिरूपाः। इत्यनेन प्रकारेण। उत्तरमाह- उपस्थेनोपस्थाख्येन करणेन स्त्रीपुंसलिङ्गभेदभिन्नेन साधिदैविकेन। इत्यनेन प्रकारेण।।

पुनः पृच्छति केन करणेनेत्या गतीः। इत्यनेन प्रकारेण। उत्तरमाह– पादाभ्यां पादद्वयाख्येन करणेन साधिदैविकेन। इत्यनेन प्रकारणेन। पृच्छति– केन करणेन धियो बुद्धिवृत्तीः। विज्ञातव्यं धियां विषयज्ञानं कामान्विविधेच्छापरपर्याय-रूपान्। इत्यनेन प्रकारेण।

विष्णुवेदाख्ययतिव्याख्या

यतः प्राण इति ह्युक्ते सर्वाणि प्रतिभान्ति हि।

पुंलिङ्गान्यपि नामानि पुंलिङ्गैकत्वहेतुतः।
यथाकथंचित् प्राणस्य सर्वात्मत्वोपपत्तये।
श्रुत्यैव दर्शितो न्यायस्तथोपास्ति विवक्षया।।

तथा पूर्ववत् स्त्रीनामानि वाचि स्थितानि नपुंसकानि मनसि स्थितानि। केन गन्धानित्युक्ते प्राणेनेत्येव ब्रूयात्।

तथेन्द्रियेषु विषयानन्तर्भावयति श्रुतिः।

प्रकाशिका

शरीरहेतुकत्वात् शरीरस्य च करणतया निर्देशः।। प्रजातिः प्रजननम्।। इत्याः गमनानीत्यर्थः।। ज्ञातव्यं कामान्– ज्ञानविषयान् इच्छाविषयांश्चेत्यर्थः। ज्ञानेच्छा-दिकं केनाप्नोषीति पर्यवसितोऽर्थः।।

Sri Venkateswara Vedic University

सा या ब्रह्मणो जितिर्या व्यष्टिः। तां जितिं जयति तां व्यष्टिं व्यश्नुते य एवं वेद य एवं वेद।। ६ ।।

इति ऋग्वेदान्तर्गतकौषीतकिब्राह्मणारण्यकोपनिषदि प्रथमोऽध्यायः।। १।।

कौषीतकिब्राह्मणारण्यकक्रमेण षष्ठोऽध्यायः।। ६।।

दीपिका

उत्तरमाह– प्रज्ञया स्वयंप्रकाशेनाऽऽत्मबोधेन। यद्यपि सर्वमिदमनयैवाऽऽप्यते तथाऽपि वागादिकं नामाद्यवाप्तौ साक्षात्करणमस्ति व्यवधायकं नत्वेवं बुद्ध्यादौ किंचिदस्ति। यद्यपि सुखदुःखे अपि प्रज्ञैकवेद्ये तथाऽपि मम पादे सुखं शिरसि च दुःखमित्यादिप्रत्ययानुसारेण शरीरेणेत्युक्तम्। यद्यपि नाममात्राप्तौ करणं वाक्प्राणश्च जीवनमन्तरेण न करणम्। मनश्च सर्वोपलब्धिसाधारणं करणम्। तथाऽपि स्त्रीपुंसव्यक्तिवज्झटित्येव नपुंसकव्यक्तेर्बाह्यकरणैः प्रत्ययानुदयादस्ति नपुंसकाधिगमे मनसोऽभ्यधिको व्यापारो यतस्तत उक्तं मनसा नपुंसकानीति। प्राणस्य जीवनमन्तरेणाकरणस्यापि वाग्व्यापारसहकारित्वाद्वाक्प्राणौ नामाप्तौ करणं भवतः।

स्थिते च करणत्वे प्राणस्य पुरुषत्वाद्वाचः स्त्रीत्वाच्च वाक्प्राणयोर्विभागेन करणत्वमविरुद्धम्। प्रतर्दनाग्निहोत्रे च वाक्प्राणयोर्नामाप्तौ करणत्वमर्थाद्वक्ष्यति यावद्वा इत्यादिना। इति ब्रूयात्। व्याख्यातम्। तं पादेन पर्यङ्कमारूढमुक्तोत्तरवादिनमाह पर्यङ्कस्थो ब्रह्मा ब्रूते।।

विष्णुवेदाख्ययतिव्याख्या

तथैतान्युत्तराणि वाक्यानि चक्षुरादिषु रूपादीनन्तर्भावयन्ति दशसु दशविषयान्। केन धियो विज्ञातव्यमित्यत्र प्रज्ञयेति ब्रूयात्। तं ब्रह्माह आपो वै खलु मा प्राप्तोऽसीत्यर्थः। एत्यसावयं ते लोके इति। लोकोऽयं मे तवास्तु भोः।

प्रकाशिका

प्रज्ञया मनसेत्यर्थः। तमाह... लोकोऽसौ अमृतस्य(?) आपो भुज्यन्ते। तवाप्यसौ लोको भोग्य इत्यर्थः।। **सा या... य एवं वेद।** अत्र वेदशब्दः उपासनपरः। उक्तपर्यङ्कविद्यानिष्ठो यः, स जितिं जयं व्यष्टिं योगञ्च लभते इत्यर्थः।

Sri Venkateswara Vedic University

दीपिका

ब्रह्मोक्तिमाह आपोऽप्शब्दाभिधेयान्यप्रधानानि पञ्चीकृतपञ्चमहाभूतानि सभौतिकानि वै प्रसिद्धानि लोकवेदयोः खलु निश्चितमनुपचरितमित्यर्थः। मे मम सर्वस्रष्टुर्हिरण्यगर्भस्य परब्रह्माभिन्नस्य हि यस्मादापो मम तस्मादसावम्मयो मदीयोऽनेककोटियोजनविस्तीर्णः सर्वसुखभूमिरयं प्रत्यक्षो मन्निवासस्ते तव मदुपासकस्य मदभिन्नस्य लोको ब्रह्मलोको यावन्मदीयं तावत्त्वदीयमित्यर्थः। इत्यनेन प्रकारेण तमाहेत्यन्वयः। इदानीमुक्तोपासनस्य फलं संक्षेपेण श्रुतिराह– सा शास्त्रैकवेद्याऽऽप इत्यादिना प्रकृता या प्रसिद्धा ब्रह्मविदां ब्रह्मणः पर्यङ्कस्थस्य हिरण्यगर्भस्य जितिर्जयरूपा सर्वनियन्तृत्वमित्यर्थः। या प्रसिद्धा व्यष्टिर्व्याप्तिः सर्वात्मकत्वमित्यर्थः। तामुक्तां जितिं जयरूपां जयति स्वाधीनां करोति। तामुक्तां व्यष्टिं व्याप्तिं व्यश्नुते व्याप्नोति। व्याप्तारमाह– यः प्रसिद्धः उपासक एवं वेद, उक्तेन प्रकारेण पर्यङ्कस्थं ब्रह्मोपास्ते। य एवं वेद। व्याख्यातम्। वाक्याभ्यासोऽध्यायपरिसमाप्त्यर्थः।। ६ ।।

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यशङ्करानन्दभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां प्रथमोऽध्यायः।। १ ।।

विष्णुवेदाख्ययतिव्याख्या

पश्चात्तु स्वयमेवाह पूर्वोक्तं फलमादरात्।

ब्रह्मणो विजयो ज्ञानं व्यष्टिरानन्दभोगोऽत्र तां व्यष्टि व्यश्नुते। य एवं पर्यङ्कविद्यां वेद स ब्रह्मज्ञानं जयति आनन्दभोगं वाप्यश्नुते।।

इति प्रथमोऽध्यायः।

प्रकाशिका

यत्त्वत्र परे– पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति इति श्रुतायां परमसाम्यापत्तौ निरञ्जनस्य गमनासंभवात् परमसाम्यापत्तेः देशान्तरप्राप्त्यनपेक्षत्वाच्च देवयानस्य पथो नार्थवत्त्वम्। आत्मैकत्वदर्शिनामाप्तकामानामिहैव दग्धाशेषक्लेशबीजानाम्

Sri Venkateswara Vedic University

प्रकाशिका

आरब्धदेहकर्माशयक्षपणव्यतिरेकेणापेक्षितव्याभावात्। पर्यङ्कविद्यादिषु तु पर्यङ्कारोहणब्रह्मगन्धप्रवेशादीनां विशिष्टदेशान्तरप्राप्तिसापेक्षत्वात् तत्रैव पन्था अपेक्षितः। न हि ग्रामप्राप्तावपेक्षितः पन्था आरोग्यप्राप्तावपेक्षितः इति, गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः, उत्पन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् इति सूत्राभ्यां प्रतिपादितमिति। तथा, एवमेवास्य परिद्रष्टुः इमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति इति श्रुतेः ब्रह्मविदः प्राणानां ब्रह्मण्येव लयः। गताः कलाः पञ्चदश प्रतिष्ठा इति कलानां पृथिव्यादिस्वप्रकृतौ लयप्रतिपादनं तु लौकिकदृष्ट्यभिप्रायमिति कलाप्रलयाधिकरणे स्थितम्। सोऽपि कलाप्रलयो निरवशेष इति, भिद्येते तासां नामरूपे पुरुषे, स एषोऽकलोऽमृतो भवति इति, अविभागो वचनात् इत्यत्र प्रतिपादितम्। अतो न मुक्तस्यार्चिरादिमार्गेण गमनमित्युक्तम्-

तन्न– तथा सति, अनियमः सर्वेषामविरोधः इत्यधिकरणे– उपकोसलविद्यायां पञ्चाग्निविद्यायाञ्चार्चिरादिगतेराम्नानात् तद्विद्यानिष्ठानामेवार्चिरा- दिगतिः; नान्येषामिति पूर्वपक्षं कृत्वा, तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते, इति श्रद्धातपश्शब्दलक्षितब्रह्मविद्यान्तरनिष्ठानामप्यर्चिरादियतिश्रवणात्, 'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः' इति अनुमान शब्दितात् स्मरणाच्च सर्वविद्यासाधारण्यमाश्रय णीयम्; उपकोसलविद्यायां पञ्चाग्निविद्यायाञ्च द्विराम्नानस्योभयत्रानुचिन्तनार्थत्वेनाप्युपपत्तेरिति अर्चिरादिगतेः सर्वविद्यासाधारण्यम्, 'अनियमः सर्वेषामविरोधश्शब्दानुमानाभ्याम् इत्यधिकरणे प्रतिपादितमिति परैरप्युक्तत्वात् तद्विरोधः। न च सकलसगुणविद्यासाधारण्यमेवास्मिन्नधिकरणे प्रतिपादितम्; न तु निर्गुणविद्यासाधारण्यमिति वाच्यम्; निर्गुणविद्याया एवाप्रामाणिकत्वात्। स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोन्तर्हृदय आकाशस्तस्मिन् छेते इति बृहदारण्यकषष्ठाध्यायगतायाः निर्गुणविद्यात्वेन पराभिमतायाः दहरविद्यायाः छान्दोग्यगतसगुणविद्यैक्यस्य हृदयायतनत्वसेतुत्वलोकासंभेदहेतुत्वादिसामान्येन, कामादीतरत्र तत्र चायतनादिभ्यः' इत्यधिकरणे सूत्रकृतैव समर्थितत्वात्। परैरपि तथा व्याख्याततत्वाच्च। न च निर्गुणायामपि

Sri Venkateswara Vedic University

प्रकाशिका

विद्यायां ब्रह्मस्तुत्यर्थमेव सगुणविद्यासंबन्धिगुणोपसंहारः संभवतीति वाच्यम्– निर्गुणस्य परस्य ब्रह्मणो गुणवत्त्वेन अवरब्रह्मत्वेन प्रतिपादनस्य प्रत्युतनिन्दात्वेन स्तुतित्वासंभवात्। अत एव, 'व्यतिहारो विशिंषन्ति हीतरवत्' इत्यत्र 'तद्योऽहं सोऽसौ योऽसौ सोऽहं त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' इत्यत्र संसारिण ईश्वरत्व चिन्तने, ब्रह्मदृष्टिरुत्कर्षात् इति न्यायोऽनुगृहीतो भवति। ईश्वरस्य संसार्यात्मत्वचिन्तने निकर्षः प्रसज्येत। अतो द्विरूपा मतिर्न कर्तव्येति पूर्वपक्षं कृत्वा, आम्नानबलात् द्विरूपाऽपि मतिः कर्तव्या।। नन्वेवमुत्कृष्टस्यापि निकर्षप्रसङ्ग इत्युक्तम्।। तत् किमिदानीं सगुणे ब्रह्मण्युपास्यमाने तस्य वस्तुतो निर्गुणस्य निकृष्टता भवति।। ननु कस्मैचित् फलाय निर्गुणस्य गुणवत्तया ध्यानमात्रं क्रियते। न तावता तस्य निकृष्टता भवतीति चेत् इहापि व्यतिहारानुचिन्तनमात्रमुपदिश्यते फलाय; न तु निकृष्टता भवत्युत्कृष्टस्य इत्येवं निर्गुणस्य सगुणत्वे निकर्षप्रसक्तिमभ्युपेत्य, वस्तुतो निकर्षो नास्तीति शङ्कर-भाष्यवाचस्पत्ययोर्व्याहतत्वेन निन्दावहस्य गुणकीर्तनस्य स्तुत्यर्थत्वासंभवात्। किञ्च लोके हि स्तुतिर्विधेयरुच्युत्पादनेन सप्रयोजना। न चात्र निर्गुणस्य तज्ज्ञानस्य वा विधेयत्वमस्ति। न वा गुणवत्त्वेन स्तुतेर्निर्गुणप्रतिपत्त्युपयोगोऽस्ति। किञ्च निर्गुणविद्याम्नातवशित्वादिगुणानां न छान्दोग्यगतसगुणविद्यायाम् आध्यानायोप-संहारसंभवः। यत्र वशित्वादयः श्रूयन्ते, तत्रापि तेषां ध्येयत्वेना(त्वान?) भिधानात् अन्यत्र गतानामपि न ध्येयत्वं संभवति इति तैरेवोक्तत्वात्। स्तुत्यर्थत्वमपि न संभवति; सत्यकामत्वादिसामर्थ्यादेव सर्वेश्वरत्वसिद्ध्या स्तुतेः सिद्धत्वेन सत्यकामत्वान्तर्भूतवशित्वकीर्तनेन स्तुतेरसंभवात्। कठवल्लीषु पराभिमतनिर्गुण-ब्रह्मप्रकरणे, शतञ्चेका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमध्य-न्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति इति उत्क्रान्तिगत्योः प्रतिपादनात्। निर्गुणविद्यात्वेन पराभिमतायां भूमविद्यायाम्, 'स एकधा भवति त्रिधा भवति' इति अनेकशरीरपरिग्रहश्रवणेन निर्विशेषब्रह्मभावापत्तेरप्रतिपादनात्। न चास्य वाक्यस्य सगुणविद्यासु उत्कर्षः कल्पनीय इति वाच्यम्– 'सर्वं ह पश्यः पश्यति सर्वमाप्नोति

Sri Venkateswara Vedic University

प्रकाशिका

सर्वशः' इति प्राक्प्रस्तुतस्यैव, स एकधा भवति इति तच्छब्देन परामर्शेन तथोत्कर्षकल्पने प्रमाणाभावात्। तथा निर्गुणविद्यात्वेन पराभिमतप्राजापतिविद्यायाम्, एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, इति शरीरादुत्क्रान्तेः श्रवणात्. न च शरीरात् समुत्थानं शरीरविवक्तात्मसाक्षात्कार इति वाच्यम्— अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुः अशरीराणि। यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते इति दृष्टान्तानुगुण्येनैव दार्ष्टान्तिकेऽप्यर्थस्य वर्णनीयत्वात् शरीरविविक्तात्म-साक्षात्कारस्यापदार्थत्वादवाक्यार्थत्वात्। तथा निर्गुणविद्या-त्वेनाभिमतसद्विद्यायाम्, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति प्रारब्धावसाने ब्रह्मसंपत्तिमुक्त्वा तदुत्तरखण्डे, यदाऽस्य वाङ्मनसि संपद्येत मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् इति ब्रह्मसंपत्त्यर्थतया उत्क्रान्तेः प्रतिपादितत्वाच्च। तथा वाजसनेयके षष्ठे तदभिमतनिर्गुणविद्यायामेव, अणुः पन्था विततः पुराणो मां स्पष्टोऽनुवित्तो मयैव। तेन धीरा उपयन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः इति गतिप्रतिपादनाच्च। समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य इति विद्वद-विदुषोरुत्क्रान्तिसाम्यस्य सूत्रकृता कण्ठत एव प्रतिपादिततत्वाच्च अर्चिरादिगतिः सगुणविद्याविषयेत्येतन्न प्रामाणिकानां हृदयमधिरोहति। कार्यं बादरिरस्य गत्युपपत्तेः इति नित्यपरब्रह्मविद् एवार्चिरादिगतिरिति बादिररस्य, परं जैमिनिर्मुख्यत्वात् इति परब्रह्मोपासकानामर्चिरादिगतिरिति जैमिनिमतापेक्षयाप्राङ्निर्दिष्टस्य सिद्धान्त-सूत्रत्वायोगात्। चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः, सुकृतदुष्कृते एवेति तु बादरिः, उत्क्रमिष्यत एवभ्यावादित्यौडुलोमिः, अवस्थितेरिति काशकृत्स्नः, स्वामिनः फलश्रुतेरित्यात्रेयः, आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते इत्यादिषु सर्वत्र पाश्चात्यस्यैव सूत्रकृदभिमतत्वदर्शनेन, कार्यं बादरिरस्य गत्युपपत्तेः इति बादरिमतस्य सिद्धान्तसूत्रत्वाभ्युपगमस्यासंगतत्वात्। निर्विशेषब्रह्मभावस्यैव मुक्तिरूपत्वे, संकल्पादेव तच्छ्रुतेः अभावं बादरिराह ह्येवम्, भावं जैमिनि-र्विकल्पामननात्, द्वादशाहवदुभयविधं बादरायणोतः इत्यादीनाम्, अनावृत्तिश्शब्दात्

Sri Venkateswara Vedic University

प्रकाशिका

इत्यन्तानामर्थशून्यतैव स्यात्। न च, 'संकल्पादेव तच्छ्रुतेः' इति सूत्रे, इत उपरि सगुणविद्याफलप्रपञ्चः इति कल्पतरुकारेणोक्तत्वात् सर्वं सगुणविद्या-फलभूतावान्तरमुक्तिविषयमिति वाच्यम्– यदि हि मुक्तिद्वैविध्यं सूत्रकृदभिमतं स्यात्, तर्हि, य आत्मा अपहतपाप्मा इत्यादिमुक्तौ ब्राह्मरूपाविर्भाववाक्यमवान्तरमुक्तिपरम्, एवं वा अरेऽयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव इति निरस्ता-शेषप्रपञ्चबोधात्मकत्वेन स्वेन रूपेण निष्पत्तिप्रतिपादकं वाक्यं तु परममुक्तिपरमिति व्यवस्थायाः सुवचतया व्यावहारिकपारमार्थिकत्वाभ्यां व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य, एवमप्युपन्यासात् पूर्वभावादविरोध बादरायणः इति सूत्रस्या-संगतिप्रसङ्गात्। तथा, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इति अशरीरत्वप्रतिपादकं वाक्यं परममुक्तिपरम्; स एकधा भवति त्रिधा भवति इति शरीरयोगप्रतिपादकं वाक्यमवान्तरमुक्तिपरमिति व्यवस्थाया वक्तुं सुशकत्वेन सत्यामिच्छायां सशरीरत्वम्, अन्यदा अशरीरत्वमिति व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य द्वादशाहवदुभयविधं बादरायणोऽतः इति सूत्रस्यासंगतिप्रसङ्गात्। अत एव चानन्याधिपतिः इति सूत्रे, अत एव सत्यसङ्कल्पत्वात् च शब्दोक्तायाः, स स्वराड्भवति इति श्रुतेश्चानन्याधिपतिर्मुक्तो भवति; नास्यान्योऽधिपतिर्भवतीत्यर्थः। इदमपि सगुणोपासनया हिरण्यगर्भप्राप्तस्य इति यत् परैरुक्तम्– तत् अत्यन्तासंगतम्-तस्य हिरण्यगर्भेश्वररूपाधिपतिसत्त्वेननान्याधिपतित्वस्य वक्तुमशक्यत्वादि-त्यलमतिचर्चया। प्रकृतमनुसरामः।।

इति कौषीतक्युपनिषत्प्रथमाध्यायप्रकाशिका।

❖❖❖❖❖

Sri Venkateswara Vedic University

अथ द्वितीयोऽध्यायः

* *प्राणब्रह्मोपासनं, तत्फलं च* *

प्राणो ब्रह्मेति ह स्माऽऽह कौषीतकिः। तस्य ह वा एतस्य प्राणस्य

दीपिका

प्रथमेऽध्याये पर्यङ्कविद्योक्ता। तत्र चोक्तं स आगच्छत्यमितौजसं पर्यङ्कं स प्राणस्तस्येत्यादिना प्राणस्य महाप्रभावत्वम्। उपासकश्च मन्दमध्यमोत्तमभेदेन त्रिविधो भवति। तत्र यः सकृदुक्तं सोपपत्तिकं गृह्णाति स उत्तमः। यस्त्वनेकश उच्यमानमात्मानं गुरुं च संक्लेश्य गृह्णाति स मन्दः। यस्तु गुरूक्तं गृह्णन्स्वचित्तं निरोद्धुमशक्तः स तु मध्यमः। स तु गुरुणोक्तस्य वाऽन्यस्य वोपदेशेन चित्तधैर्यं विविधैर्वैदिकैरुपायैर्नेतव्य इति न्यायमाश्रयन्ती भगवती श्रुतिः प्राणोपासनं चित्तस्थैर्यकरमनेकफलकल्पद्रुमरूपं तद्विदश्च बाह्याध्यात्मिककर्माणि विविधफलानि वक्तुं द्वितीयाध्यायमारभ्यते—

तत्र प्राणो ब्रह्मेत्युपासनं विवक्षुः प्रसिद्धस्यर्षेर्मतमाह– प्राणो योऽयमास्येऽन्तः पञ्चवृत्तिर्ब्रह्म सत्यज्ञानानन्दादिरूपं जगत्कारणमिति ह स्माऽऽह, ह ऐतिह्ये स्म प्रसिद्धौ। इत्याहैवमुक्तवान्कौषीतकिः कुत्सितं निन्द्यं हेयमित्यर्थः। सीतं सीतलं सांसारिकं सुखं यस्य स कुषीतः कुषीत एव कुषीतकस्तस्यापत्यं कौषीतकिः।

विष्णुवेदाख्ययतिव्याख्या

पुनरपि प्राणोपासा विधीयते। स प्राण इति प्राणस्य पर्यङ्कत्वमुक्तं पूर्वम्। तस्योपासा कर्तव्येति। अथवा पर्यङ्कस्थं ब्रह्म वा इति कौषीतकिराह।

प्राणो भोक्ता स विज्ञेयः शरीरे पुरराजवत्।
तस्योपकरणं सर्वं मन आदिचतुष्टयम्।।

परिष्कारः

{द्वितीयाध्यायस्य भाष्याभावात् मूलमात्रस्य परिष्कारः क्रियते।}

प्राणप्राशस्त्यमत्र द्वितीयेऽध्याये प्रतिपाद्यते। वाक्प्राणमनश्चक्षुःश्रोत्राणां पञ्चानामुपासनोपकरणतया प्राधान्येन परिग्रहः केनाद्युपनिषत्सु प्रसिद्ध इति

Sri Venkateswara Vedic University

ब्रह्मणो मनो दूतं वाक्परिवेष्ट्री चक्षुर्गोप्तृ श्रोत्रं संश्रावयितृ। तस्मै ह वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति।

दीपिका

ननु ब्रह्म महाराजोपचारार्हं प्राणश्च न तथेत्याशङ्क्य प्राणेऽपि महाराजचिह्नानि कानिचित्संपादयति– तस्योक्तस्य ह प्रसिद्धस्य वै स्मर्यमाणस्यैतस्य प्रत्यक्षस्यैव मुखबिले वर्तमानस्य प्राणस्य पञ्चवृत्तेर्ब्रह्मणो ब्रह्माभिन्नस्य मनः संकल्प-विकल्पात्मकमन्तःकरणं दूतं महाराजस्येव सन्धिविग्रहकारिभृत्यवद्वर्तमानम्। वाक्ताल्वादिस्थानस्थमिन्द्रियं परिवेष्ट्री परिवेषणस्य कर्त्री महाराजस्य विश्वासनीया योषिदिव। चक्षू रूपोपलब्धिकरणमिन्द्रियं गोप्तृ गोशब्दवाच्यानामिन्द्रियाणां रक्षकं महाराजस्येव गोर्भूमे रक्षको मन्त्री। श्रोत्रं शब्दोपलब्धिकरणं संश्रावयितृ, सम्यक्श्रवणकारकं प्रतीहाररूपम्। तस्मै वा एतस्मै प्राणाय ब्रह्मणे कृतं व्याख्यानम्। हकारषष्ठ्योरभावो विशेषः। अत्र चतुर्थी तु बलिशब्दयोगार्था। एता उक्ता मन आद्याः सर्वा निखिला देवता देवताशब्दवाच्या अयाचमानायेदं मह्यमाहरन्त्विति प्रार्थनामकुर्वाणाय बलिं गर्भदासा इव राज्ञः करमपेक्षितमर्थजातमित्यर्थः। हरन्त्याहरन्त्यर्पयन्तीत्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

तस्य मनो दूतवद् वर्तते। वाचः परिवेष्टृत्वं चक्षुषो गोप्तृत्वं श्रोत्रस्य संश्रावयितृत्वम्। एवं चतुर्णां व्यापारः। तस्मै भोक्त्रे प्राणाय ब्रह्मणे एताः देवताश्चक्षुरादयोऽन्तःकरणयुक्ता आदाय विषयानस्मै बलिं हरन्ति अयाचिता अनेन।

परिष्कारः

बहुत्रास्माभिर्दर्शितमस्ति। इहापि कौषीतक्युपनिषदि तत्परिग्रहेण तत्र प्राणस्य प्राधान्यमन्यत्रेव प्रतिपाद्यते। तद्ग्रहणानुगुणं काम्यानि कानिचिदुपासनान्युपदिश्यन्ते। तत्र प्राणवत् बलिहरणेन आराध्यत्वसिद्धिफलकं प्राणे ब्रह्मदृष्टिरूपमुपासनं तत्तन्मुनिमतं द्विप्रकारमुच्यते प्राणो ब्रह्मेतीति। प्राणो राजस्थानापन्नः; मन आदि च तत्परिजनस्थानापन्नमिति ब्रह्मत्वेन दृश्यस्य प्राणस्य मन आदिर्दूतत्वादिना द्रष्टव्यः। परिवेष्ट्री परिवेषणकर्त्री। बलिं हरन्तीति।

Sri Venkateswara Vedic University

तथो[1] एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति य एवं वेद। तस्योपनिषन्न याचेदिति। तद्यथा ग्रामं भिक्षित्वाऽलब्ध्वोपविशेन्नाहमतो

दीपिका

तथो एव उ अपि तथैव न त्वन्यथाऽस्मै प्राणोपासकाय सर्वाणि निखिलानि भूतानि स्थिरजङ्गमानि अयाचमानायैवेदं मे प्रयच्छन्त्विति प्रार्थनामकुर्वाणायैव न तु कुर्वाणायापि बलिं हरन्ति। व्याख्यातम्। अस्मा इति यदुक्तस्तमाह– यः प्रसिद्ध उपासक एवं वेदोक्तेन प्रकारेणोपास्ते तस्य प्राणस्य ब्रह्मणो मनो दूतमित्यादिनोपासकस्योपनिषद्रहस्यव्रतं न याचेत्प्राणात्ययेऽपि याचनां न कुर्यात्। इत्युपनिषत्कथनसमाप्त्यर्थम्।।

अयाच्ञायां दृष्टान्तमाह– तत्तत्रायच्ञायां दृष्टान्तः। यथा दृष्टान्ते। ग्रामं ब्राह्मणादिसमाकीर्णं देशविशेषं भिक्षित्वा भिक्षार्थं प्रतिगृहं गत्वाऽलब्ध्वैकमपि सिक्थमप्राप्योपविशेत्ततो भिक्षाप्राप्तौ निराशः सन्नुपवेशनं कुर्यात्तदप्राप्तौ संजातक्रोध एवं संकल्पवान्। भिक्षुकस्य संकल्पमाह– नाहमतो दत्तमश्नीयामतोऽनेन ग्रामेण

विष्णुवेदाख्ययतिव्याख्या

ततो विद्वत्प्रशंसा। तथो एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति य एवं वेद। एवं विदोऽप्ययाचमानाय सर्वाणि भूतानि बलिं हरन्ति। न याचेदिति रहस्यव्रतं कार्यम्।

यदृच्छालाभसंतुष्टो भवामीति दृढा मतिः।
तस्योपनिषदित्युक्त्या संन्यासोऽत्र विवक्षितः।।

यथा ग्रामं भिक्षित्वा अलब्ध्वा तूष्णीमुपविशेत् अहमितः प्रभृत्यन्यैर्दत्तं नाश्नीयामिति निश्चित्योपविशति।

परिष्कारः

छान्दोग्यादौ(५) यदहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसि इत्येवं वागादिभिः स्वस्वगतगुणार्पणं प्राणे क्रियमाणं द्रष्टव्यम्। (१)

१.एवं इति परिष्कारपाठः

दत्तमश्नीयामिति। य एवैनं पुरस्तात्प्रत्याचक्षीरन्। त एवैनमुपमन्त्रयन्ते ददाम त इति। एष धर्मोऽयाचितो भवति। अन्यतस्त्वेवैनमुपमन्त्रयन्ते ददाम त इति। प्राणो ब्रह्मेति ह स्माऽऽह पैङ्ग्यः। तस्य ह वा एतस्य

दीपिका

मिलितेनामिलितेन वा दत्तं समर्पितं नाश्नीयामहं भोजनं न करवाण्यहं भिक्षुकः। इत्यनेन प्रकारेण संकल्पः।

य एवादातृत्वेन प्रसिद्धा एव न त्वन्ये। एनं स्वस्मादप्राप्तभिक्षं स्वेभ्यो विगतस्पृहं पुरास्तात्पूर्वमस्मात्संकल्पात्प्रत्याचक्षीरन्गच्छास्मत्तो न दास्याम इति निराकरणं कुर्युस्त एव प्रत्याख्यातार एव न त्वन्ये। एनमयाचकं तन्मुखावलोकनपराङ्मुख-मुपमन्त्रयन्त उपमन्त्रणं कुर्वन्ति।

ददाम दानं करवाम ते तुभ्यं पूर्वमस्मत्प्रार्थकायेदानीमपगताशाय। इत्यनेन प्रकारेण। एष प्रत्यक्षो दीनवक्त्रत्वादिलक्षणो धर्मो गुणविशेषः। याचितो याचको याचकस्य। भवति स्पष्टम्।।

अन्यतस्त्वेव तु शब्दः पक्षान्तरेऽन्यस्मान्निस्पृहः प्रसन्नवदनोऽन्य एवायाच्ञायमेव न तु याच्ञायां यदि वर्तते तदैवैनमुपमन्त्रयन्ते ददाम त इति व्याख्यातम्। एवं याच्ञायाच्ञयोर्गुणदोषान्पर्यालोच्य न याचेदित्यर्थः। यथा कौषीतकिस्तद्वत्पैङ्ग्यनामाऽप्यृषिरित्याह– प्राणो ब्रह्मेति ह स्माऽऽह पैङ्ग्यस्तस्य ह वा एतस्य प्राणस्य ब्रह्मणः पैङ्ग्यनामा पैङ्ग्यगोत्रो वा व्याख्यातमन्यत्।

विष्णुवेदाख्ययतिव्याख्या

ये पूर्वं ग्रामे एनं प्रति प्रत्याख्यानं कृतवन्तः त एवैनमयाचिनं धान्यहस्ता उपमन्त्रयन्ते ते ददाम इत्युक्त्वा। अयाचितधर्म एवंभूतः प्रत्याख्यानभयादिति चेत्तन्न। ग्रामान्तरादप्यागत्य ते ददाम इत्युपमन्त्रयन्ते इति कौषीतकिपक्षः। अथ पैङ्ग्यपक्षः। पैङ्ग्योऽपि तथैवाह यथा पूर्वम कौषीतकिः। तत्र विशेषो नास्ति।

प्राणो ब्रह्मेति वाक्यस्य स एवार्थः पुरेरितः।
व्रतान्यपि तथैवात्र प्राणमाहात्म्यमन्यथा।।

Sri Venkateswara Vedic University

प्राणस्य ब्रह्मणो वाक्परस्ताच्चक्षुरारुन्धे। चक्षुः परस्ताच्छोत्रमारुन्धे। श्रोत्रं परस्तान्मन आरुन्धे। मनः परस्तात्प्राण आरुन्धे। तस्मै ह वा एतस्मै

दीपिका

ननु मनोदूतत्वादिलक्षणेन ब्रह्मत्वं प्राणस्य यद्यपि तथाऽप्यप्रत्यक्त्वादब्रह्मत्वमपीत्यत आह– वाग्वागिन्द्रियात्परस्तात्परतश्चक्षुश्चक्षुरिन्द्रियमारुन्धे समन्तादावृत्य तिष्ठति। वाचश्चक्षुरान्तरमुक्तिवद्दृष्टे प्रायेण विसंवादाभावात्। चक्षुश्चक्षुरिन्द्रियात्परस्ताच्छ्रोत्रमारुन्धे श्रोत्रं श्रवणेन्द्रियम्। व्याख्यातमन्यत्। चक्षुषा शुक्तिकां रजतवत्पश्यति नत्वेवं श्रोत्रमविद्यमानं श्रृणोति। ततो युक्तं चक्षुष आन्तरत्वं श्रोत्रस्य। श्रोत्रं श्रोत्रेन्द्रियात्परस्तान्मनः संकल्पविकल्पात्मकमन्तःकरणम्। आरुन्धे व्याख्यातम्।

विष्णुवेदाख्ययतिव्याख्या

तस्य वाक् प्रथमा मनश्चतुर्थं तदनन्तरं प्राणः। अत्र वागादीनां परस्तादवरोधः।

परस्परप्रवेशोऽत्र प्राणानामुपवर्ण्यते।
शरीरे हीन्द्रियाण्यत्र प्रतितिष्ठन्ति सर्वदा।
शरीरमिन्द्रियेष्वेव प्रतितिष्ठत्यसंशयम्।
परस्पराश्रयत्वेन प्राणास्तिष्ठन्त्यगारवत्।
इत्येतदुच्यते श्रुत्या तद्वैराग्यविवक्षया।
प्राणमाहात्म्यच्छलेनात्रोपासकस्य हि।
प्राणो वाचि निबद्धस्तु वाक् च चक्षुषि निष्ठिता।
चक्षुः श्रोत्रे निबद्धं तु श्रोत्रं मनसि निष्ठितम्।

परिष्कारः

कौषीतकिकृता ब्रह्मदृष्टिरुक्ता। पैङ्ग्यकृता सा तत्फलिका प्रदर्श्यते। वाक्परस्तादित्यादौ विभक्तिव्यत्ययो द्रष्टव्यः। वाचमतिशेते चक्षुः; वाचोक्तेऽर्थे चक्षुषा दृष्ट एव प्रत्ययदार्ढ्यात्; वाचः कर्मेन्द्रियत्वात् अस्य ज्ञानेन्द्रियत्वाच्च। चक्षुरतिशेते श्रोत्रम्।

चक्षुर्वित्तं मानुषम्, श्रोत्रं दैवम् इत्युक्तरीत्या आमुष्मिकस्य सर्वस्य श्रोत्रग्राह्यवेदैकवेद्यत्वात् । मनस्तु सर्वग्राहि ततोऽधिकम्। इन्द्रियाणां प्राणाधीनस्थिति-

Sri Venkateswara Vedic University

प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति। तथो एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति य एवं वेद। तस्योपनिषन्न याचेदिति। तद्यथा ग्रामं भिक्षित्वाऽलब्ध्वोपविशेत्। नाहमतो दत्तम-श्नीयामिति। य एवैनं पुरस्तात्प्रत्याचक्षीरन्। त एवैनमुपमन्त्रयन्ते ददाम त इति। एषधर्मो ऽयाचितो भवति। अन्यतस्त्वेवैनमुपमन्त्रयन्ते ददाम त इति।। १ ।।

* *दुर्लभार्थसाधकम् एकधनावरोधनकर्म* *

अथात एकधनावरोधनम्। यदेकधनमभिध्यायात्। पौर्णमास्यां

दीपिका

मनसः सावधानत्वे श्रोत्रेण श्रवणं ततो युक्तं श्रोत्रादान्तरत्वं मनसः। मनो मनसः परस्तात्परत आन्तरः प्राणः पञ्चवृत्तिः। प्राणबन्धनं हि मनः प्रसिद्धम्। आरुन्धे समन्तादावृत्य तिष्ठतीत्यवगम्यते पण्डितरूपैः। एवमान्तरत्वेन ब्रह्मत्वं युक्तम्। तस्मै वा इत्यादि व्याख्यातं पूर्ववत्।। १ ।।

प्राणविदोऽर्थेच्छायां सत्यां कर्तव्यतामाह—अथ प्राणब्रह्मज्ञानानन्तरम्। अतो यस्मादिच्छा जातैतस्मात्करणादेकधनावरोधनमेकधन इति प्राणस्य नामधेयं जगत्यस्मिन्नेक एव धनरूप एकधनः। प्राणांस्तु सततं रक्षेद्दारैरपि धनैरपीति न्यायेन प्राणस्य परमधनत्वात्। तस्यावरोधनमेकत्र स्थापनमेकधनावरोधनम् । अयमर्थः।

विष्णुवेदाख्ययतिव्याख्या

मनः प्राणेन संरुद्धमेवमन्योन्यसंश्रयः।
द्वितीयेऽपि च पर्याये तदेवानूद्य तद्गतः।
विशेषो वर्ण्यते श्रुत्या प्राणानां प्राणबन्धनः।। १ ।।

एकस्माद् धनावरोधनमिच्छेद्यदि तर्हीदं कर्म कर्तव्यम्।

परिष्कारः

प्रवृत्तिकत्वात् प्राणः श्रेष्ठः।। १ ।।

Sri Venkateswara Vedic University

वाऽमावास्यायां वा शुद्धपक्षे वा पुण्ये नक्षत्रेऽग्निमुपसमाधाय परिसमू(मु)ह्य परिस्तीर्य पर्युक्ष्योत्पूय दक्षिणं जान्वाच्य स्रुवेण वा चमसेन वा कंसेन

दीपिका

सत्यामर्थेच्छायामर्थाप्राप्तौ व्याक्षिप्तचेतसो न प्राणब्रह्मचिन्तनं वक्ष्यमाणेनोपायेनार्थप्राप्तौ प्रसन्नचेतसः प्राणचिन्तनस्य संभवादिदमेकधनावरोधनं स्यात्। यद्यद्येकधनं प्राणमभिध्यायात्सर्वतो ध्यानं कुर्यादर्थेप्सुस्तदाऽर्थावाप्त्या इदं कुर्यादिति शेषः। अथवैकधनमनन्यलभ्यं धनं तस्यावरोधनं प्राप्त्युपायस्तच्च नोचितम्। एवमपि यद्येकधनमभिध्यायात्प्राणोपासकस्तदा पौर्णमास्यां वाऽमावास्यायां वा वाशब्दाविच्छाविकल्पार्थौ स्पष्टमन्यत्। शुद्धपक्षे वा शुक्लपक्षे। वाशब्दः कृष्णपक्षार्थः। तत्रापि पुण्ये धन्य आत्मनोऽनुकूल इत्यर्थः। नक्षत्रेऽश्विन्यादौ शास्त्रविहिते। अग्निमुपसमाधायाग्निं श्रौतं स्मार्तं वा स्वशाखोक्तक्रमेण कुण्डस्थण्डिलादौ प्रतिष्ठाप्य परिसमू(मु)ह्य समन्तात्तृणादिकमपनीय परिस्तीर्य समन्ताद्दर्भानवकीर्य पर्युक्ष्य मन्त्रपूतेन वारिणा समन्तात्परिषिच्योत्पूयाऽऽज्यं स्वगृह्योक्तप्रकारेणोत्पवन

विष्णुवेदाख्ययतिव्याख्या

कर्माणि धनसाध्यानि धर्माभावे धनं कुतः।
याचना च न कर्तव्या कथमेतद् भवेदिति।
वीक्ष्यमाणस्य मनसा धनार्थमिदमुच्यते।
अत्यल्पवित्तसाध्येन कर्मणात्र महद्धनम्।
प्राप्नोति पुरुषो येन तदर्थैषोत्तरा श्रुतिः।

परिष्कारः

प्राणादिदेवतोद्देश्यकहोमाद्यनुष्ठानेन रिक्तस्य धनिकधनप्राप्तिसौलभ्यमुपवर्ण्यते अथात एकधनावरोधनमिति। एकस्य कस्यचिदन्यस्य यत् धनम्, तस्यावरोधनम् स्वप्रयत्नेन संग्रहः। अत्र प्रागुक्तेन वागादिना सह प्रज्ञाऽपि काचिद् देवतात्वेनोक्ता। एतेषामेवैकस्मिन् पर्वणि इति। उक्तानां मध्ये कस्मिंश्चित् काले इत्यर्थः। अर्थं ब्रूयात् इति। साक्षादिति शेषः। स्वयं वा साक्षात् धनिकसविधे ब्रूयात् दूतं वा

Sri Venkateswara Vedic University

वैता आज्याहुतीर्जुहोति। वाङ्नाम देवताऽवरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यै स्वाहा। प्राणो नाम देवताऽवरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यै स्वाहा। चक्षुर्नाम देवताऽवरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यै स्वाहा। श्रोत्रं नाम देवताऽवरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यै स्वाहा ।

दीपिका

संस्कारेण संस्कृत्य दक्षिणं जान्वाच्य दक्षिणं जान्वधो निपात्य स्रुवेण वा चमसेन वा कंसेन वा। स्रुवचमसौ प्रसिद्धौ याज्ञिकानाम्। कंसं कांस्यदर्व्यादिकं तेन करणेन वा । त्रयं तु प्राप्तीच्छयोरनियत्यर्थम्। एता वक्ष्यमाणा आज्याहुतीराज्यविभागविशेषाञ्जुहोति जुहुयात्।। होममन्त्रानाह वाङ्नाम देवता वागभिधाना देवताऽवरोधिनी, उपासकाभीष्टार्थसंपादिका। सोक्ता देवता मे मम प्राणोपासकस्यार्थेच्छोरमुष्मान्मदभीष्टार्थस्वामिनः सकाशादिदं मदभीष्टमर्थजातमवरुन्धामवरोधनं कुरुतां संपादयत्वित्यर्थः। तस्या उक्तनाम्न्यै देवतायै स्वाहा होमाहुतिमतदर्थप्रधानां स्वीकरोतु स्वाहुतं स्वीकरोतु। प्राणो नाम

विष्णुवेदाख्ययतिव्याख्या

कर्मण्येव स्थितस्यास्य प्राणविद्याधिकारिणः।

वैराग्याभावतो यस्य कर्म त्यक्तुं न शक्यते।
देवतानुग्रहादेव मुक्त्यादिफलमिष्यते।

यदा एकस्माद्धनमभिध्यायाद् आहर्तुमिच्छेत् पौर्णमास्याममावास्यायां वै तत् कर्म कुर्यात्। शुक्लपक्षे पुष्यनक्षत्रे वा इतिकर्तव्यतोच्यते। अग्निमुपसमाधाय इत्यादि। स्पष्टोऽर्थः।वागित्यग्निरुच्यते।

ततो वाग्देवताग्निस्तु प्रार्थ्यते भक्तिपूर्वकम्।
एवं सर्वेषु मन्त्रेषु योज्योऽर्थः फलसिद्धये।
दैवं कर्मवशादेव फलिष्यति न संशयः।
इति प्रदर्श्यते श्रुत्या पुनर्यत्रं ब्रुवाणया।

मन्त्रार्थः किंचिदुच्यते धनावरोधनी धनावरोधनसमर्था धनप्रापणसमर्थेत्यर्थः।

Sri Venkateswara Vedic University

मनो नाम देवताऽवरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यै स्वाहा। प्रज्ञा नाम देवताऽवरोधिनी सा मेऽमुष्मादिदमवरुन्धां तस्यै स्वाहेति। अथ धूमगन्धं प्रजिघ्रायाऽऽज्यलेपेनाङ्गान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्यार्थं ब्रुवीत[1]। दूतं वा प्रहिणुयाल्लभते हैव।। २ ।।

दीपिका

प्राणाभिधाना। प्राणग्रहणं च तन्त्रेणावगन्तव्यम्। तेन घ्राणाभिधानेति मन्त्रान्तर-मनुक्तमपि सिद्धं भवति। श्रोत्रं नाम श्रोत्राभिधाना। प्राणचक्षुःश्रोत्रमनःप्रज्ञामन्त्रा वाङ्मन्त्रवद्व्याख्येयाः। प्रज्ञया ब्रह्मत्वं चोक्तम्। इति मन्त्रपरिसमाप्त्यर्थः।

अथ होमानन्तरं धूमगन्धं होमधूमगन्धं प्रजिघ्राय प्रतिघ्रायाऽऽघ्राणं कृत्वाऽऽज्यलेपेन होमावशिष्टाज्यलेपेनाङ्गान्यनु विमृज्य होमधूमघ्राणमनु सर्वगात्राण्युपलिप्य वाचंयमो मौन्यभिप्रवज्य होमप्रदेशाद्यत्र क्वाप्यवस्थितमर्थस्वामिनं गत्वाऽर्थं स्वाभीष्टमर्थं ब्रुवीतेदं मे त्वत्तो भूयादिति वदेत्।

अर्थस्वामिनो दूरदेशावस्थाने दूतं वा प्रहिणुयात्स्वभृत्यसुतादिकं दूतं प्रेरयेत्। भृत्याद्यभावे वाचं वेति बहिरेवावगन्तव्यम्। लभते हैव प्रसिद्धमर्थं स्वाभीष्टं स्वात्म(ज)दूतवाक्यानामन्यतमेन गतेन प्राप्नोत्येव न तु न प्राप्नोति।। २ ।।

विष्णुवेदाख्ययतिव्याख्या

सा वाङ्मह्यं देवदत्तादिदं धनमवरुन्धां प्रापयतु वाग्रूपोऽग्निरित्यर्थः। तस्यै वाचे स्वाहा इत्येका आहुतिः। प्राणो वायुरूपः सा प्राणदेवता अमुष्माद्देवदत्तादिदं धनमवरुन्धां प्रापयतु। तस्यै प्राणद्देवतायै स्वाहेति द्वितीया। चक्षुर्नाम इति तृतीया। सर्वत्रादित्यादयस्तत्तद्देवताः प्रार्थ्यन्ते। श्रोत्रं नाम इति चतुर्थी। मनो नाम इति पञ्चमी। प्रज्ञा नाम इति षष्ठ्यैषा। एताः षडाहुतयः । होमशेषं समाप्य अनन्तरं धूमगन्धं प्रजिघ्राय आज्यस्थाल्यामाज्यलेपेन स्वाङ्गान्यनुविमृज्य वाचंयमो भूत्वा तस्य गृहं प्रव्रज्य गत्वार्थं प्रयोजनं ब्रूयात्। दूतं वा प्रहिणुयात् कंचित्। तत् सिध्यति न संशयः।। २ ।।

---

१. ब्रूयात् इति परिष्कारपाठः

Sri Venkateswara Vedic University

* सर्वार्थसिद्धिसाधकं दैवं कर्म *

अथातो दैवः स्मरः। यस्य प्रियो बुभूषेद्यस्यै वा एषां वै। तेषामेवैकस्मिन्पर्वण्यग्निमुपसमाधायैतयैवाऽऽवृतैता आज्याहुतीर्जुहोति। वाचं ते मयि जुहोम्यसौ स्वाहा। प्राणं ते मयि जुहोम्यसौ स्वाहा। चक्षुस्ते मयि जुहोम्यसौ स्वाहा। श्रोत्रं ते मयि जुहोम्यसौ स्वाहा। मनस्ते मयि जुहोम्यसौ

दीपिका

एवमर्थोपायमुक्त्वा वश्योपायमाहोपासकस्य अथ प्राणब्रह्मज्ञानानन्तरम्। अतो यस्मादात्मनः प्रियस्येच्छैतस्मात्कारणात्। दैवो देवैर्वागादिभिः संपाद्यः स्मरोऽभिलाषः संपन्नो भवति यथा तथा कथ्यत इति शेषः। यस्य पुरुषस्य व्यक्तिविशेषस्याऽऽत्मन्यनुरागशून्यस्य प्रियो बुभूषेत्प्राणवित्प्रियो भवितुमिच्छेत्। यस्यै यस्याः स्त्रिया वै प्रसिद्धाया राजादिपत्न्याः। एषां प्रत्यक्षाणां राजादिनां श्रीमतां सर्वस्नेहशून्यानां वै प्रसिद्धानां तेषामेव वागाद्यधिष्ठातॄणामग्न्यादीनां न त्वन्येषाम्। अत्र वाशब्दाध्याहारेण योजनीयम्। यस्यै वा प्रियो बुभूषेदेषां वा प्रियो बुभूषेत्तेषामेव प्रियो बुभूषते। एकस्मिन् पर्वणि दर्शपूर्णमासयोरन्यतरस्मिञ्शुक्लपक्षात्मके

विष्णुवेदाख्ययतिव्याख्या

देवानां स्मरणं यद्वत् फले नियतहेतुकम्।
तथास्य स्मरणं येन कर्मणा तदिहोच्यते।

यथा देवताः स्मरणेन प्रीताः फलदा भवन्ति तथा मनुष्या अपि स्मरणेन फलदा भवन्ति। यस्य पुरुषस्य स्वयं प्रीतो भवितुमिच्छति यस्यै स्त्रियै वा प्रियो बुभूषेद् येषां बहूनां वा प्रियो बुभूषेत्।

परिष्कारः

प्राणादिदेवतोद्देश्यकहोमबलेन परेषां स्वस्मिन् प्रीतिपूर्वकस्मरणसिद्धिरुच्यते। अथातो दैवः स्मर इति। परैः स्वस्मिन् स्वयं प्रीत्यकरणेऽपि प्राणादिदेवकल्पिता भवति प्रीतिरिति अयं दैवः स्मरः। कामो वा काममूलकस्मरणं वा। आवृता उक्तप्रकारेण वाचं ते इति। ते इति वशीकार्यः पर उच्यते।

स्वाहा। प्रज्ञां ते मयि जुहोम्यसौ स्वाहा। अथ धूमगन्धं प्रजिघ्रायाऽऽज्यलेपेनाङ्गान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्य संस्पर्शं

दीपिका

वा पुण्ये नक्षत्रे पर्वदिवसेऽग्निमुपसमाधाय व्याख्यातम्। एतयैवाऽऽवृतोक्तेनैव प्रकारेण परिसमू(मु)ह्येत्यादिनैता वक्ष्यमाणसंख्याका आज्याहुतीर्जुहोति व्याख्यातम्। वाचं वागिन्द्रियरूपां ते तव मयि प्रीतिं करिष्यतो मयि प्रीतिविषये तवा-प्रीत्यौदासीन्ययोरन्यतरेन्धनसंदीप्तेऽग्नौ जुहोमि प्रक्षिपामि। असावेतन्नामाऽहमयं कामो वा मम संपन्नो भवतु। स्वाहा मदीया वाङ्ममैतत्कामिन आज्याहुतेरनुज्ञां प्रयच्छतु। प्राणं ते मयि जुहोमीत्यादिप्रज्ञां त इत्यन्तं प्राणचक्षुःश्रोत्रमनःप्रज्ञामन्त्रा वाङ्मन्त्रवद्व्याख्येयाः। इत्यथेत्यादिप्रव्रज्येत्यन्तं व्याख्यातम्।

एवं कृते फलमाह संस्पर्शं जिगमिषेत्। स्वसाध्यस्य संस्पर्शं गन्तुमिच्छेत्। गच्छेदित्यर्थः। अथ स्वसाध्यस्य महाविभूत्यादिमत्त्वेन स्पर्शः कर्तुमशक्यस्तदा

विष्णुवेदाख्ययतिव्याख्या

एकस्य वा बहूनां वा स्त्रियो वा येन वल्लभः।
भविष्यति पुमान् सद्यस्तत्फलं कर्म वर्ण्यते।
प्रासङ्गिकमिदं कर्म तत्कामस्येह वर्ण्यते।
देवतानुग्रहात् सिद्धिः प्रसक्ता पूर्ववाक्यतः।
अथवा पूर्ववाक्योक्तधनकामस्य वर्ण्यते।
सर्वभूताप्रियत्वेऽपि न किंचित् कर्म युज्यते।
एतेषामिति वाक्येन सर्वभूतप्रियात्मता।

एतेषां पूर्वोक्तानामेवैकस्मिन् पर्वणि कर्म कर्तव्यम्। पूर्व एवात्र कालः पर्वेति लक्षितः। पूर्ववदग्निमुपसमाधाय पूर्वेणैव कर्मणा एता वक्ष्यमाणा आज्याहुतीर्जुहोति।

वागप्यग्निर्हि विज्ञेयस्तन्नामत इतीर्यते।
सर्वभूतस्य वागग्निः प्रियत्वं मे प्रयच्छतु।

Sri Venkateswara Vedic University

जिगमिषेत्। अपि वाताद्वा संभाषमाणस्तिष्ठेत्। प्रियो हैव भवति स्मरन्ति हैव स्यात्।। ३ ।।

दीपिका

पक्षान्तरमाह– अपि वाताद्वा संभाषमाणस्तिष्ठेत्। अपिशब्दः पक्षान्तरे। साध्यस्य स्पर्शाभावे तेन सह वार्तां कुर्वंस्तिष्ठेत्। संभाषणस्यापि कर्तुमशक्यत्वे वाशब्दः पक्षान्तरमाह। वातात्तिष्ठेत्स्वशरीरवायुसंस्पर्शो यथा भवति तथाऽवस्थानं कुर्यादित्यर्थः। अथवा वातात्मसंभाषमाणस्तिष्ठेत्स्वकीयाः शब्दा यथा वायुनाऽस्य कर्णरन्ध्रेऽवस्थानं कुर्वन्ति तथा कुर्यादित्यर्थः। प्रियो हैव भवति, ह प्रसिद्धः सर्वत्र स साध्यस्य प्रिय एव भवति न त्वप्रियः। न केवलं प्रियत्वमात्रं स्वसंनिधौ किन्तु स्मरन्ति हैवास्मिन्ग्रामान्तरादिगते ह प्रसिद्धा राजादयोऽस्य साध्याः। अस्य स्मरन्त्येव न तु विस्मिरन्ति पित्रादेरिव पुत्रादयः। अयं च तान्सर्वान्हन्तुकामानिवाऽऽसक्ति-शून्योऽस्मात्प्रक्षिपेद्यत्र क्वाप्यस्य विधेयाश्च भवन्तीत्यर्थः।। ३ ।।

विष्णुवेदाख्ययतिव्याख्या

सर्वभूतस्थितो वह्निर्वाचि तिष्ठत्यभेदतः।
असाविति स्वनामोक्तिर्देवदत्ते मयीति हि।

वाचं मयि जुहोमि देवदत्ते स्वाहा। इत्यादि सर्वत्र योज्यम्।

व्याख्या ह्येषैव सर्वत्र सम्यक् स्पृष्टोऽत्र गच्छतु।

प्राणं ते इति द्वितीया। चक्षुस्ते इति तृतीया। श्रोत्रं ते इति चतुर्थी। मनस्ते इति पञ्चमी। प्रज्ञां ते इति षष्ठ्यैषा। अन्यत् पूर्ववत्।

गत्वा भूतानि याचेत प्रियो भूयादसाविति।
अथवा स्वयमेवात्र तिष्ठेन्मौनपरो गृहे।
यावत् सर्वस्य भूतस्य प्रियो भवति स स्वयम्।
संकल्पशुद्धिमुद्दिश्य यदि कुर्यादिदं पुनः।
संकल्पितार्थसिद्धिश्च भवेदिह न संशयः।

पुमांश्चेत् प्रियो भवति स्त्री च सर्वदा तं स्मरन्ती भवति। न संशयः।

Sri Venkateswara Vedic University

* प्राणब्रह्मप्रापकम् अग्निहोत्रोपासनम् *

अथातः सांयमनं[1] प्रातर्दनमान्तरमग्निहोत्रमिति चाऽऽचक्षते। यावद्वै पुरुषो भाषते। न तावत्प्राणितुं शक्नोति। प्राणं तदा वाचि जुहोति। यावद्वै

दीपिका

इदानीं प्राणोपासकस्याग्निहोत्रफलं विवक्षुराध्यात्मिकमग्निहोत्रमाह—
अथ प्राणब्रह्मोपासनानन्तरम्। अतो यस्मादग्निहोत्रफलस्येच्छावान्बाह्यमग्निहोत्रमनुष्ठातुमशक्तोऽनिच्छुर्वाऽस्मात्कारणात्सांयमनं सम्यग्यमनमहिंसादिकं यत्संबन्धि तत्सांयमनं प्रातर्दनं प्रतर्दनेन दैवोदासिनाऽनुष्ठितत्वेन तन्नामाङ्कितं प्रातर्दनमान्तरमग्निहोत्रमिति चाऽऽचक्षते। आन्तरं बाह्यसाधननिरपेक्षमग्निहोत्रनामाङ्कितं कर्मेत्याचक्षतेऽनेन प्रकारेण कथयन्ति। चकारोऽग्निहोत्रान्तरत्वयोः प्रत्येकं मिलितयोरपि संज्ञात्वसमुच्चयार्थः। विद्वांसो यदान्तरमित्याचक्षते तद्वक्तुं वाक्प्राणयोरमितव्यापारकर्तृत्वमाह– यावद्यत्परिमाणं वै प्रसिद्धम्। पुरुषः पुरुषाकारशरीरधारी जन्तुर्भाषते वाग्व्यापारं करोति न तावत्प्राणितुं शक्नोति वाग्व्यापारपरिमाणं प्राणव्यापारं कर्तुं

विष्णुवेदाख्ययतिव्याख्या

देवस्मरणपक्षे तु मन्त्रार्थो वर्ण्यतेऽधुना।
सर्वभूतस्थितो वन्हिः स्मृतं मे संप्रयच्छतु।
विशेषाभावतो नात्र विशेषो नामनीष्यते।
आज्यलेपादिकं सर्वमस्मिन् पक्षे न युज्यते।
यतस्तात्कालिकं तद्धि स्मरणं सार्वकालिकम्।

देवतानां प्रासादार्थमप्येतत् कर्म कुर्यादित्यर्थः।अथातो दैवस्मर इत्यारम्भात्।।३
अथानन्तफलं कर्म हाग्निहोत्रमिहोच्यते। अनन्तरं सांयमनं च प्रातर्दनं च आन्तरं चैतदग्निहोत्रमाचक्षते। कथम्–

परिष्कारः

अथोक्तप्राणादिपञ्चकमध्ये प्राणस्य वाचश्च परस्परस्मिन् होमभावनया

१. संयमनं इति परिष्कारपाठः

Sri Venkateswara Vedic University

पुरुषः प्राणिति। न तावद्भाषितुं शक्नोति। वाचं तदा प्राणे जुहोति। एते अनन्ते[२] अमृताहुती जाग्रच्च स्वपंश्च संततमव्यवच्छिन्नं जुहोति।

दीपिका

न शक्नोति। अथवा वाक्प्राणयोः समकालव्यापारं वारयति– यावदित्यादिना। अस्मिन्पक्षे यावत्तावच्छब्दौ कालपरौ व्याख्येयौ। प्राणं वाग्व्यापारे सति स्वव्यापारशून्यं वाचो न्यूनव्यापारं दधिपयःसमानं तदा तस्मिन्वाग्व्यापारकाले वाचि व्यापारत्वेनाधिकायमग्निसमानायां जुहोति होमं करोति। वाक्समानधर्मत्वं प्राणस्य प्राणसमानधर्मत्वं वाचश्चाऽऽह–

यावद्वै पुरुषः प्राणिति न तावद्भाषितुं शक्नोति वाचं तदा प्राणे जुहोति। स्पष्टम्। प्रसिद्धं हि सर्वजनीनं वदन्न श्वसिति श्वसन्न ब्रूते चेति।।

इदानीमग्निहोत्रमाह एते वाक्प्राणरूपे उक्ते अनन्ते असंख्यातव्यापाराधारे परस्पराग्नौ प्रविशन्त्यावप्यक्षीणे वा। अमृताहुती अन्तवद्धि म्रियते यतोऽन्तशून्ये

विष्णुवेदाख्ययतिव्याख्या

अनित्यफलसंबन्धो बाह्यस्यैवेह युज्यते।
बाह्यस्याग्निहोत्रहोमस्यानित्यफलसंबन्ध एव युक्तो भवति।
आन्तरस्याग्निहोत्रस्य नानित्यफलसंगतिः।
अन्तरमिति आन्तरमित्यर्थः। तस्य नित्यफलसंगतिरेव।
सायंप्रातर्दिवा रात्रौ क्रियमाणमिदं भवेत्।
अतः सांयमनं प्रातर्दनं कर्मेह कीर्त्यते।
सांयमनं प्रातर्दनमिति दिवारात्रं क्रियमाणमुच्यते।
अन्तवत्यः क्रियाः सर्वा याः पुनर्बाह्यगोचराः।
एतन्मनसैव द्रव्यदेवतासंबन्धेन सर्वं कर्तव्यम्।
क्रियात्मकं हि लोकेऽस्मिन्नन्तवद् दृश्यते यतः।
प्रसङ्गिकमिदं सर्वमिति पूर्वं मयोदितम्।
तत्कामस्य तत्सिध्यै निष्कामस्य विमुक्तये।

२. अनते इति परिष्कारपाठः

Sri Venkateswara Vedic University

विष्णुवेदाख्ययतिव्याख्या

प्राणो ब्रह्मेति प्रसङ्गे याच्ञा न कर्तव्येति। उच्यते। याच्ञाभावे धनं न ददति चेदेतत् कर्म एकधनावरोधनं नाम कुर्यात्। सर्वलोकप्रियत्वे तत् कर्म न फलजनकमिति चेदत्र दैवः स्मर इत्यनेन कर्मणा सर्वलोकप्रियत्वं भवति। देवतानां प्रसादो वा। एतदान्तरमग्निहोत्रं निष्कामस्य विमुक्त्यर्थमेव।

इदं तु मुक्त्यैकफलं विज्ञानोत्पत्तिहेतुतः।

विज्ञानोत्पत्या मुक्तिरेव भवतीत्यर्थः।

कथमेतदग्निहोत्रं जुहोतीत्यत आह। अग्निहोत्रस्य सायंप्रातर्द्वे द्वे आहुती। अत्रापि द्वे एव सर्वकालिकत्वात्। तत् कथम्? यावत् पुरुषो भाषते न तावत् प्रणितुं शक्नोति। प्राणं तदा वाचि जुहोति। यथा सायमादित्यमग्नौ जुहोति. यथा प्रातरग्निमादित्ये जुहोति।

अनन्ते अमृते एते इति वाक्यबलेन हि।
अमृतत्वैकहेतुत्वादमृते इत्युदीरितम्।
तदेव बाह्यव्यावृत्त्या अनन्ते इत्युदीरितम्।
एते संतानरूपेण स्थिते नैव कदाचन।
विच्छिद्येते शरीरेऽस्मिन् जीवे तिष्ठति जाग्रति।
प्राणनं वचनं चापि सव्येतरविषाणवत्।
न ह्येकस्यैव दृश्येते परस्परविरोधितः।
एतेनान्यप्रदेशोऽयं होम इत्युच्यतेऽत्र हि।
उभयोरेकमेकस्य वर्तते स्वपनेऽपि च।
तेन संततिरूपे ते इत्युक्तिर्जीविते सति।
बाह्याग्निहोत्रसादृश्यादग्निहोत्रमितीरणम्।
कालद्वयेन संबन्धादग्निहोत्री भवेच्च सः।

एवं दर्शनमात्रेण स्वापे चास्य क्रिया भवेत्। अमृतत्वैकहेतुत्वादमृते। बाह्यव्यावृत्या अनन्ते संतानरूपेण स्थितत्वात्। एते शरीरेऽस्मिन्न कदाचन विच्छिद्येते। यावज्जीवति प्राणनं वचनं चापि समे विषाणद्वयवान् परस्परविरोधतः एकैकस्य न सह

Sri Venkateswara Vedic University

अथ या अन्या आहुतयोऽन्तवत्यः। ताः कर्ममय्यो हि भवन्ति। एतद्ध वै पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रुः। उक्थं ब्रह्मेति ह स्माऽऽह शुष्क-

दीपिका

ततोऽमृतरूपे आहुती अमृतत्वफलहेतुत्वाद्वाऽमृताहुती। जाग्रच्च स्वपंश्च जाग्रति स्वप्ने च । चकारौ जाग्रत्स्वप्नयोरितरेतरयोगार्थौ। संततं निरन्तरमागर्भनिर्गमना-दोत्तरश्वासमव्यवच्छिन्नं भोजनाच्छादनादिव्यवधानशून्यम्। न हि वाक्श्वसनयोरन्यतरेण शून्यः कालो जीवतो जुहोति होमं करोति होमबुद्धिं कुर्यादित्यर्थः। एतदग्निहोत्रं स्तोतुमन्यं निन्दति। अथ पक्षान्तरे। याः प्रसिद्धाः पयोदध्यादिद्रव्यसाध्या अन्या वाक्प्राणाहुतिभ्यां व्यतिरिक्ता आहुतय आसेचनान्ता देवतामुद्दिश्य द्रव्यत्यागा अन्तवत्यः स्वरूपेण फलतोऽपि नाशवत्यः। तत्र हेतुमाह– ता वाक्प्राणाहुति-भ्यामन्यत्वेन प्रसिद्धाः कर्ममय्यः शरीरव्यापारसाध्याः कृतकाः फलतः स्वरूपतश्च हि यस्मात्तस्मादन्तवत्यो भवन्ति स्पष्टम्। अस्याग्निहोत्रस्य ज्ञाने सर्वसङ्ग-परित्यागलक्षणं संन्यासमाह– एतद्ध वै पूर्वे विद्वांसः। ह प्रसिद्धाः। वै स्मर्यमाणाः पूर्वेऽतीताः। एतद्विद्वांसो वाच्यग्नौ भाषणव्यापारवत्यां प्राण आज्यं निःश्वा-सोच्छ्वासव्यापारशून्यो हूयते। प्राणे चाग्नौ निःश्वासोच्छ्वासव्यापारवति वागाज्यं भाषणव्यापारशून्या हूयत इत्येतज्ज्ञानवन्तोऽग्निहोत्रं न जुहवांचक्रुरग्निहोत्रहोमं न कृतवन्तः। सर्वसङ्ग-परित्यागलक्षणं संन्यासं कृतवन्त इत्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

वर्तेते। अन्योन्यप्रवशादग्निहोत्रहोम इत्युच्यते। जाग्रच्च स्वपंश्चेत्यादि। एकस्य स्वपनेऽपि उभयोरेकमेव वर्तते। अतः संततिरूपे इत्युच्येते। जीविते सति सदा क्रियत इत्यर्थः। अग्निहोत्रसादृश्यादग्निहोत्रमिति।

एवं दर्शनमात्रत्वात् स्वपनेऽपि क्रिया भवेत्।

एवं सततमग्निहोत्रं जुहोति। या अन्या बाह्या आहुतयः ता अन्तवत्यः विच्छेदवत्यः कर्ममय्यश्च बाह्यकरणसाधनाः।

एतस्य प्रतिपत्त्यर्थमेतध्देति वचोऽत्र हि।

Sri Venkateswara Vedic University

भृङ्गारः। तद्दगित्युपासीत। सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते।

दीपिका

प्राणो वा उक्थमिति काण्वादिशाखासूक्थशब्दस्य प्राणे प्रसिद्धत्वात्तां प्रसिद्धिमनुरुन्धाना श्रुतिः प्राणमुक्थशब्देन निर्दिश्य तत्र ऋगादिदृष्टीर्विधातुमस्य ब्रह्मत्वे कौषीतकिपैङ्ग्यवच्छुष्कभृङ्गारसंमतिमाह उक्थमुक्थशब्दाभिधेयः प्राणो ब्रह्मेति ह स्माऽऽह व्याख्यातम्। शुष्कभृङ्गार एतन्नामा मुनिः। तदुक्थमृगिति ऋग्बुद्ध्योपासीत यावत्प्राण ऋगिति साक्षात्कारो भवति तावद्विजीयप्रत्ययशून्यं सजातीयप्रत्ययप्रवाहं कुर्वीत।

प्राण ऋग्बुद्धौ कृतायां फलमाह सर्वाणि निखिलानि ह प्रसिद्धानि। अस्मै प्राण उक्थ ऋग्बुद्धिकर्त्रे भूतानि स्थिरजङ्गमानि श्रैष्ठ्याय प्रशस्यतमत्वायाभ्यर्चन्ते सर्वतः पूजां कुर्वन्ति। तद्यजुरित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय युज्यन्ते।

विष्णुवेदाख्ययतिव्याख्या

त्यज धर्ममधर्मं चेत्यादिषु श्रूयतेऽपि च।
पूर्व ऋषय एतद्विद्वांसोऽग्निहोत्रं न जुहवांचक्रुः।
उपासानान्यनेकानि वर्ण्यन्ते ज्ञानसिद्धये।
प्राणविज्ञानवत् तत्तत्फलकामस्य चात्र हि।
उक्थं शस्त्रमिति ज्ञेयं महाव्रतमिहोदितम्।
तत्र ब्रह्मेति दृष्टिर्वा तया ज्ञानं भवेद् ध्रुवम्।
शस्त्रे पादादिदृष्ट्यैव पूर्वोक्तफलसंगतिः।
प्रकृतस्यैव शस्त्रस्य माहात्म्यमिह वर्ण्यते।
तमेतदित्यादिगिरा तस्योपास्यत्वसिद्धये।

उक्थमिति महाव्रते निष्कैवल्यं शस्त्रमुच्यते। एतस्मिन् ब्रह्मेति दृष्टिरित्याह शुष्कभृङ्गारः। तच्छस्त्रऽमृग्वेद इत्युपासीत। तमुपासकमस्मै सर्वाणि भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते। सर्वाणि हास्मैभूतानि श्रैष्ठ्याय युज्यन्ते । तच्छस्त्रं यजुरित्युपासीत।

Sri Venkateswara Vedic University

तद्यजुरित्युपासीत। सर्वाणि हास्मै भूतानि श्रैष्ठ्याय युज्यन्ते। तत्सामेत्युपासीत। सर्वाणि हास्मै भूतानि श्रैष्ठ्याय संनमन्ते। तच्छ्रीरित्युपासीत। तद्यश इत्युपासीत। तत्तेज इत्युपासीत। तद्यथैतच्छस्त्राणां श्रीमत्तमं

दीपिका

तत्सामेत्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय संनमन्ते। ऋग्बुद्ध्या समत्वं यजुः सामबुद्ध्योः। युज्यन्त उद्युक्तानि भवन्ति। संनमन्ते सम्यक्प्रह्वीभूतानि भवन्ति। अन्यत्कृतव्याख्यानम्। ऋग्यजुःसाम्नां च पादबद्धाविवक्षितच्छन्दस्कप्रगीतिमन्त्रात्मकानां प्रसिद्धत्वान्न ऋगादिपदव्याख्या कृता। एवमेवाऽऽह– तच्छ्रीरित्युपासीत तद्यश इत्युपासीत तत्तेज इत्युपासीत मनुष्यादेर्विभूतिः श्रीः कीर्तिर्यशो भास्वरं प्रकाशादिकारणं ज्योतिस्तेजः। व्याख्यातमन्यत्।।

श्रीयशस्तेजोबुद्धीनां सदृष्टान्तं फलमाह तत्त्र श्रीयशस्तेजोबुद्धिषु फले दृष्टान्तः।

विष्णुवेदाख्ययतिव्याख्या

तच्छस्त्रं सामेत्युपासीत। सर्वाणि भूतानि संनमन्ते। तच्छस्त्रं श्रीरूपमित्युपासीत। यथा तदेतच्छस्त्रमन्येषां शास्त्राणां मध्ये श्रीमत्तमादिगुणं भवति इति विद्वत्प्रशंसा तथा एवं विद्वानपि शस्त्राणां शास्त्रमिव सर्वेषां भूतानां श्रीमत्तमादिगुणयुक्तो भवति।

परिष्कारः

अग्निहोत्रसंपत्तिः प्रदर्श्यते। अग्निहोत्रदेवतयोर्मध्येऽपि सूर्यस्याग्नौ रात्रौ, अग्नेः सूर्ये च दिवा प्रवेशः प्रसिद्धः। संयमनं प्रातर्दनमिति। प्रतर्दनाख्येन राज्ञा कृतं ध्यानमित्यर्थः। जागरकाले व्याहरमाणः प्राणं किञ्चिदावध्यैव व्याहर्तुं पारयति। यदा न व्याहरणप्रसक्तिः, तदैव प्राणो यथावदुच्छवासनिः श्वासौ करोतीति तदातदा एकस्यान्यत्र हुतत्वम्। स्वापकाले वागादीनां प्राणे विलयश्च प्रसिद्धः। या अन्या आहुतय इति। बाह्यानां सायं प्रातश्च कदाचिदेव भावात् नक्तं दिवं संततत्वाभावत् अन्तवत्त्वं स्पष्टम्। अतिशयितफलत्वाच्चेदमान्तरमग्निहोत्रं श्रेयः। तद्धेति। बाह्याग्निहोत्रात् अस्यातिशयितत्वादित्यर्थः। ऐतरेयेऽपि श्रूयते एवम्।

Sri Venkateswara Vedic University

यशस्वितमं तेजस्वितमं भवति। तथो एवैवं विद्वान्सर्वेषां भूतानां श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति। तमेतमैष्टकं कर्ममयमात्मानमध्वर्युः

दीपिका

यथा दृष्टान्ते। एतदाकर्णपूर्णगुणनिरुद्धपृष्ठं पृथुतरसुवर्णपट्टिकावृतसर्वगात्रं पृथापुत्रसमधन्विकरस्थं वमद्वह्निमण्डलशरसमूहवृष्टिकरं धनुः शस्त्राणां खड्गपट्टिशतोमरशक्तिऋष्टिगदाभिन्दिपालचक्रक्षुरिकायमदंष्ट्रादीनां श्रीमत्तममतिशयेन विभूतिमत्। न ह्यन्यच्छस्त्रं धनुष्मतः सुभटस्य विभूतिदम्।

'धन्वी चेत्तुरगारूढो जयत्येकोऽपि मेदिनीम्'

इति प्रसिद्धेः। यशस्वितमम्, अतिशयेन यशः संपन्नम्।

'विशिखा इव राजन्ते धनुषः सगुणादिव।
निर्गताः शस्त्रसंपाताः शूराणां लघुयोधिनाम्' इति प्रसिद्धेः।

तेजस्वितमम्, अतिशयेन तेजः संपन्नम्। यद्यपि लौहेषु शस्त्रेषु तेजस्विमत्वं प्रसिद्धं तथाऽपि संप्रहारावसरेऽन्यान्यपगतसौवर्णाद्यावरणानि भवन्ति। धनुस्तु तस्मिन्नप्यवसरे सुवर्णमणिरत्नादियुक्तमिति तेजस्वितमम्। धन्विनश्च श्रीयशस्तेजांसि प्रसिद्धानि पार्थादेः।

भवति। स्पष्टम्। तथो एव उ अपि तद्वदेव न त्वन्यथा। एवं विद्वान्प्राणः श्रीयशस्तेजोबुद्धीनामालम्बनमिति जानञ्श्रीयशस्तेजोबुद्धिरुपासक इत्यर्थः। सर्वेषां

विष्णुवेदाख्ययतिव्याख्या

तमेतमित्यादिगिरा तस्योपास्यत्वसिद्धये।
अस्य चित्याग्निरूपत्वादैष्टकं शस्त्रमुच्यते।
तच्छस्त्रमैष्टकमात्मानमध्वर्युः संस्करोति कर्ममयम्।
कर्म व्याप्य स्थितं यस्मात्ततः कर्ममयं स्मृतम्।
एतच्छस्त्रं सर्व कर्मव्याप्य स्थितं यतः।
सर्वस्य कर्मणोऽस्मिन्नन्तर्भावः सर्वासामिष्टकानां च।
आत्मेदमेव सर्वस्य तेनात्मेदमुदीरितम्।

Sri Venkateswara Vedic University

संस्करोति। तस्मिन्यजुर्मयं प्रवयति यजुर्मये। ऋङ्मयं होता ऋङ्मये।

दीपिका

भूतानां निखिलानां स्थिरजङ्गमानां मध्ये श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति। स्पष्टम्।

इदानीं त्रयीविद्यानां कृतसंसारफलान्तर्वर्तिनामपि प्राणाविज्ञानं मोक्ष-साधनमित्याह तमुक्थशब्दाभिधेयमृगादिबुद्ध्यालम्बनं प्राणमेतं मुखबिलान्तर्वर्तमानं प्रत्यक्षमिवैष्टकमिष्टकासंबन्धिरूपमैष्टकं कर्ममयं कर्मस्वरूपमात्मानमध्वर्युशब्द-प्रत्ययालम्बनम्। अध्वर्युर्ऋत्विग्विशेषः प्राणबुद्ध्या संस्करोति, संस्कारं करोति योषितमिवाग्निबुद्ध्या। अयमर्थः। योऽयमिष्टकासु चितोऽग्निः कर्मसाधनः सोऽपि प्राणात्मक एव प्राणस्य ऋगाद्यात्मकत्वात्। अयं च ऋगादिसाध्यकर्मनिष्पादकोऽहं च तत ऋगाद्यात्मकः सर्वात्मा प्राणोऽहमस्म्ययमग्निश्च मदात्मक इत्यात्मानं संस्करोतीति। तस्मिन्प्राणबुद्ध्या संस्कृतेऽग्न्यभिन्नात्मनि यजुर्मयं यजुः साध्यं कर्मवितानं कुविन्द इव प्रवयति प्रकर्षेण कर्ममन्त्रतन्तुभिर्विस्तारयति। यजुर्मये यजुःसाध्ये कर्मविताने प्रवृत्ते सत्याधारभूते वा, ऋङ्मयमृक्साध्यं कर्मवितानं प्रवयति। होता, ऋत्विग्विशेषः। ऋङ्मय ऋक्साध्ये कर्मणि प्रवृत्ते सत्याधारभूते वा साममयं सामसाध्यं कर्मवितानं प्रवयति।

विष्णुवेदाख्ययतिव्याख्या

सर्वस्यात्मेत्यात्मेत्युदीरितम्।

ऋत्विजामपि सर्वेषामस्योपास्यत्वमुच्यते।
अध्वर्युः संस्करोतीति महाव्रतमिहोदितम्

तस्मिन् शस्त्रे यजुर्वेदमयं कर्मापि तिष्ठति। यजुर्मय ऋङ्मयं होता। यजुर्मये शस्त्रे

परिष्कारः

प्राणादिपञ्चके प्रशस्ततया प्रसिद्धो मुख्यप्राणः शस्त्रेषु अप्रगीतमन्त्रसाध्यगुणि-निष्ठगुणाभिधानरूपेषु प्रशस्तं यदुक्थाख्यं शस्त्रं तद्रूपेण ऐतरेयादौ श्रुतः। अतः प्राणमेवोक्थमिति गृहीत्वा तत्र ब्रह्मदृष्टिः श्रैष्ठ्यादिफलिका प्रतिपाद्यते उक्थमिति।

Sri Venkateswara Vedic University

साममयमुद्गाता। स एष सर्वस्यै त्रयीविद्याया आत्मा। एष उ एवास्याऽऽत्मा। एतदात्मा भवति य एवं वेद।। ४।।

दीपिका

उद्गाता, ऋत्विग्विशेषः। सोऽध्वर्युः संस्कारहेतुः प्राण एष मुखबिलान्तस्थः सर्वस्यै सर्वस्या निखिलायास्त्रयीविद्यायास्त्रयी ऋग्यजुःसामरूपा सैव विद्या तस्या आत्माऽऽप्त्यादेः कर्ता शरीरस्येव जीवः। उक्तेन प्रकारेणोक्तमात्मानं शृङ्गग्राहिकयाऽऽह– एष उ एव, उ अपि मुखबिलान्तस्थ एव न त्वन्यः। अस्याऽऽत्मा, अस्या उक्तायास्त्रय्या विद्याया आत्मोक्तः। इदानीमेतज्ज्ञाने फलमाह– एतदात्मा भवति, प्राणरूपो भवति। यः प्रसिद्धः कर्मण्यृत्विग्यजमानादिरेवं प्राणबुद्ध्या संस्कृतेऽध्वर्युरूपाग्नौ यजुर्मयमध्वर्युर्यजुर्मय ऋङ्मयं होता, ऋङ्मये साममयमुद्गातेति वेद जानाति स एतदात्मा भवतीत्यन्वयः।। ४ ।।

विष्णुवेदाख्ययतिव्याख्या

होता ऋङ्मयं प्रवयति । ऋङ्मये साममयमुद्गाता। ऋङ्मये शस्त्रे उद्गता साममयं प्रवयति।

ऋत्विजः सर्वकर्मापि सर्वेऽस्मिन् संप्रतिष्ठितम्।
यतः सर्वमयं ह्येतत्ततो ब्रह्मेति चिन्त्यताम्।
उपासकोऽपि तद्वध्दि भविष्यति न संशयः।

उपासकोऽपि तस्यात्मा विद्वत्प्रशंसा य एवं वेद सोऽप्येतदात्मा भवति।। ४ ।।

परिष्कारः

शुष्कभृङ्गार इति कश्चिदृषिः। अभ्यर्च्यन्ते, युज्यन्ते,संनमन्ते, इति विभिन्नधातुप्रयोगः ऋग्यजुस्सामपदावयवार्थानुगमप्रदर्शनाय। तद् यथैतदिति। प्रसिद्धे हि स्तोत्रशस्त्रे सोमयागाङ्गभूते। प्रगीतमन्त्रसाध्य गुणनिष्ठगुणाभिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रमिति। तेषु नैकविधेषु यथा एतत् उक्थं श्रीमत्तमत्वादिमत्, तथा अयमुपासकः सर्वेषु भूतेषु श्रीमत्तमत्वादिमान् भवतीत्यर्थः। अध्वर्योहोतुरुद्गातुश्च क्रमात् यजुर्वेदर्ग्वेदसामवेदसंबन्धित्वात् तत्तद्विषये

Sri Venkateswara Vedic University

* सर्वजयप्रदम् अमावास्योपासनम् *

अथातः सर्वजितः कौषीतकेस्त्रीण्युपासनानि भवन्ति। यज्ञोपवीतं

दीपिका

प्राणो ब्रह्मेति कौषीतकिपैङ्ग्यशुष्कभृङ्गारमतैः सोपपत्तिकैरुक्तम्। तत्र च, ऋगादिदृष्टयः। स हि प्राणो बाह्य आध्यात्मिकश्च। बाह्य आधिदैविकः पुत्रादिरूपश्च। आधिदैविकस्त्वादित्यः। स चाग्नीषोमात्मकः। तत्राऽऽधिदैविकं प्राणमुररीकृत्य फलविशेषसिद्ध्यर्थं प्रथमतः कानिचिदुपासनान्याह अथ प्राणो ब्रह्मेति कथनानन्तरम्। अतो यस्मात्फलान्तरस्यापीच्छोपासकस्यास्मात्कारणात्सर्वजितः स्ववर्णाश्रमाचारैर्निखिलांस्त्रैवर्णिकाञ्जयतीति सर्वजित्तस्य कौषीतकेः कुषीतकस्यापत्यस्य त्रीणि त्रिसंख्याकान्युपासनानि, आधिदैविकस्य प्राणस्य ज्ञानानि भवन्ति वर्तन्ते। कौषीतकिदृष्टानि कथयिष्यामीत्यर्थः। यज्ञोपवीतं कृत्वा यज्ञोपवीतं विधाय।

विष्णुवेदाख्ययतिव्याख्या

पाप्मापमार्जनफलं जपकर्मात्र वर्ण्यते। सर्वं जयतीति सर्वजित्। तस्य कौषीतकेः जपकर्म वर्ण्यते।

जपमार्जितपापस्य ज्ञानजन्म भवेदिति।
कार्यकारणरूपं यज्जगदेतदचेतनम्।
तदतिक्रमकामस्य जपकर्मेदमुच्यते।

जगदतिक्रमो मोक्षः। तत्कामस्येदं जपकर्मोच्यते। कथम्।

तस्य कौषीतकेस्त्रिकालं त्रीण्युपासनानि भवन्ति। तस्येतिकर्तव्यतोच्यते।

परिष्कारः

आदित्यो ह वै बाह्यः प्राण उदयति एष ह्येनं चाक्षुषं प्राणमनुगृह्णानः(३) इति प्रश्नोपनिषदुक्तरीत्या प्राणादित्यैक्यात् आदित्यविषयकमुपासनमुच्यते अथातः सर्वजित इति। आदित्योपस्थानादीनां वक्ष्यमाणानां सर्वेषामन्ततः प्राणरक्षणार्थत्वाद्वा प्राणाध्याये एतत्सर्वोक्तिरिति ध्येयम्। तत्र वर्गोद्वर्गसंवर्गमन्त्रैः क्रमेण प्रातर्मध्ये सावज्चादित्योपस्थानमहोरात्रकृतपापवर्जनफलकम्। तद्विषयकं कौषीतक्यनुष्ठानं दर्शयति

Sri Venkateswara Vedic University

कृत्वाऽप आचम्य[१] त्रिरुदपात्रं प्रसिच्योद्यन्तमादित्यमुपतिष्ठेत वर्गोऽसि पाप्मानं मे वृङ्धीति। एतयैवाऽऽवृता मध्ये सन्तमुद्वर्गोऽसि पाप्मानं म

दीपिका

यद्यपि त्रैवर्णिकत्वेनैव यज्ञोपवीतं प्राप्तं तथाऽप्यपसव्यादिविकारनिवारणार्थमिदं वचनम्। अप आचम्य स्पष्टम्। अपामाचमनमपि यज्ञोपवीतवत्प्राप्तं तथाऽपि त्वरादिनिमित्तनिवारणार्थमवगन्तव्यम्। तेनोभयत्र नियमः सिद्धो भवति। त्रिस्त्रि-वारमुदपात्रं सौवर्णं राजतं ताम्रं वा चषकं प्रसिच्य शुद्धैः स्वच्छैर्जलैः प्रकर्षेण सेचनं विधायोद्यन्तमुदयं गच्छन्तमादित्यमदितिपुत्रं भास्करमुपतिष्ठेत जानुभ्यामवनिं गत्वा ससंभारनीरपूर्णचषकमुद्धृत्य समन्त्रमुपस्थानं कुर्यात्। मन्त्रमाह– वर्गः सर्वमिदं जगदात्मबोधेन तृणवद्वङ्क्ते परित्यजतीति वर्गः। असि भवसि। पाप्मानं कृतमागामि च पापं फलस्वरूपेणैव मे मम समन्त्रकेणार्घ्येणाऽदित्यमुपस्थातुर्वृङ्ग्धि वर्जय विनाशयेत्यर्थः। इति मन्त्रसमाप्तौ। एतयैवोक्तयैव यज्ञोपवीतमित्यादिना न त्वन्यथा, आवृता प्रकारेण मध्ये सन्तं मध्याह्ने वर्तमानमादित्यामुपतिष्ठेत। उपस्थानमन्त्रमाह- उद्वर्गोऽसि पाप्मानं म उद्वृङ्धीति। उदुत्कर्षार्थः। अतिशयेन नाशयेत्यर्थः।

विष्णुवेदाख्ययतिव्याख्या

यज्ञोपवीत्यपः आचम्य उदपात्रं त्रिः प्रसिच्य उद्यन्तमादित्यमुपतिष्ठेत वर्गोऽसीत्यादिना मन्त्रेण। एवमेव मध्ये सन्तमादित्यम् उद्वर्गोऽसीत्यादिना मन्त्रेणोपतिष्ठेत। एवमेवास्तं यन्तमादित्यं संवर्गोऽसीत्यादिना मन्त्रेणोपतिष्ठेत।

आदित्याभिमुखः स्थित्वा वर्गोऽसीत्याद्युदीरयेत्।
सर्वपापविनिर्मुक्तो यतस्त्वं परमेश्वर ।
ततो मां पापनिर्मुक्तं कुरु देव नमोऽस्तु ते।
ऊर्ध्वगोऽसि यतः पापादूर्ध्वगं मां तथा कुरु।
पुण्यपापविनिर्मुक्तो यतस्त्वं मां तथा कुरु।
एवं ज्ञात्वा यथोक्तं तु जपकर्म समाचरेत्।

१.कृत्वोदकमानीय इति परिष्कारपाठः

Sri Venkateswara Vedic University

उद्वृङ्धीति। एतयैवाऽऽवृताऽस्तं यन्तं संवर्गोऽसि पाप्मानं मे संवृङ्धीति। यदहोरात्राभ्यां पापं करोति सं तद्वृङ्क्ते। अथ मासि मास्यमावास्यायां पश्चाच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवाऽऽवृता । हरिततृणाभ्यां

दीपिका

व्याख्यातमन्यत्। एतयैवाऽऽवृताऽस्तं यन्तं संवर्गोऽसि पाप्मानं मे संवृङ्धीत्यस्तं यन्तमस्तं गच्छन्तमुपतिष्ठेत समित्यादिमन्त्रेण। सं सम्यगर्थः। व्याख्यातमन्यत्।।

एवं त्रिवारमादित्यस्यार्घ्यं कुर्वतः फलमाह यत्प्रसिद्धं दृष्टं दुःखफलम्। अहोरात्राभ्यामहनि रात्रौ च पापं करोति स्पष्टम्। सं तद्वृङ्क्ते तदशास्त्रीयं कर्म फलतः संवृङ्क्ते सम्यक्परित्यजति पापफलं न प्राप्नोतीत्यर्थः। एकमिदमुपासनं कर्मात्मकम्। इदानीं द्वितीयमाह–अथ पूर्वस्मात्कर्मरूपादुपासनात्प्रकृतादर्थादग्नि-रूपादित्यादनन्तरं कर्मरूपमुपासनान्तरमादित्यस्य बाह्यप्राणस्य सुषुम्नानाडीरूप-सोमात्मकं मासि मासि प्रतिमास-मभ्यासबलादासंवत्सरमिति निश्चीयते।

विष्णुवेदाख्ययतिव्याख्या

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति। जपकाले प्रतिपत्त्यर्थं मन्त्रार्थोऽयमुक्तः। अह्नि रात्र्यां च यत् पापं क्रियते तत् सर्वं जपकर्मणा संवृङ्क्ते नाशयति।

सूर्योपस्थानमुक्त्वात्र सोमोपस्थानमुच्यते।

सूर्योपस्थानमहरहः कुर्यात्। सोमोपस्थानं मासि मास्यमावास्यायां पौर्णमास्यां च कुर्यात्।

पाप्मदाहफलं तत्र यथारुच्यधिकारिता।
दृश्यमानमिति ह्युक्त्वा प्रतिपद्येतदुच्यते।

प्रतिपद्यस्तमित आदित्ये पश्चाद्दृश्यमानं चन्द्रमुपतिष्ठेत।

परिष्कारः

सर्वजिदिति। सं तद् वृङ्क्ते। कौषीतकिरिति शेषः। अतः शिष्टानुष्ठानात् सर्वैरिदमनुष्ठेयमित्याह तथेति।

'आपोमयः प्राणः इति प्राणस्याप्मयत्वं श्रुतम्। सोमस्य च तत् प्रसिद्धम्।

Sri Venkateswara Vedic University

वाक्प्रत्यस्यति। यत्ते सुसीमं हृदयमधिचन्द्रमसि श्रितम्। तेनामृतत्वस्येशाने

दीपिका

अमावास्यायाममाख्यरश्मौ सोमस्य निवासदिवसे पश्चाच्चन्द्रमसमादित्यस्य पश्चिमे भागे सुषुम्नाख्ये रश्मौ वर्तमानं सोमं दृश्यमानं शास्त्रतोऽवलोक्यमानमुपतिष्ठेत वर्गोद्वर्गसंवर्गमन्त्रैरुदये मध्याह्नेऽस्तमये चोपस्थानं कुर्यात्। एतयैव यज्ञोपवीत-मित्यादिकयैव न त्वन्ययाऽऽवृता प्रकारेण। तत्र विशेषमाह–हरिततृणाभ्यामशुष्काभ्यां द्वाभ्यां दूर्वाङ्कुराभ्यां सहार्ध्यानन्तरं वाग्वाचं यत्त इत्यादिमन्त्ररूपां प्रत्यस्ति चन्द्रमसं प्रति अस्यति क्षिपति क्षिपेदित्यर्थः। वाचं मन्त्ररूपामाह यत्प्रसिद्धं योषितां स्तनमण्डलाधारं ते तव सोमात्मिकायाः प्रकृतेः सुसीमं शोभनमर्यादावदादित्या-त्मकपुरुषस्यैकदेशरूपं हृदयं हृदयपद्माकारं पञ्चच्छिद्रमधोमुखं मांसखण्डं हृत्तदयति गच्छति यदानन्दात्मस्वरूपं तद्धृदयम्। अधि चन्द्रमसि श्रितं चन्द्रमण्डलं स्तना-कारमधिकृत्य श्रितं वर्तमानम्॥

तेनोक्तेन मन्द्रमण्डलस्थेन हृदयेन हेतुनाऽमृतत्वस्याऽऽनन्दरतिप्रजाति-रूपस्यनिरतिशयानन्दाभिव्यक्तिहेतुत्वेन च निरपेक्षस्य मोक्षस्येशाने हे नियन्त्रि माऽहं पौत्रमघं रुदमहं सोमात्मिका स्त्री, अग्न्यात्मकः पुमानितिज्ञानवानघं

विष्णुवेदाख्ययतिव्याख्या

वाक्याद्धि लिङ्गं बलवदिति पूर्वमवादिषम्।

तस्मात् प्रतिपद्येवेत्यर्थः। एतया पूर्वोक्तया सूर्योपस्थान उक्तया यज्ञोपवीतं कृत्वेद्यादिकया आवृता कर्मणा एतदुपस्थानं कुर्यात्।

हरितं शष्पमेवात्र सामान्यं तृणमुच्यते।
मुख्याभावे हि गौणं च तत्फलं भवति ध्रुवम्॥

परिष्कारः

तथा सोमनामभिः प्राणस्याऽऽमन्त्रणञ्च दृष्टम्, 'बृहन् पाण्डरवासः सोमराजन्' इति। प्राणादित्ययोरैक्यात् सोमस्यादित्याप्याय्यमानत्वाच्च प्राणसोमैक्यं भवितुमर्हति। अतः सोमोपासनमुच्यते। तत्र जातपुत्रस्य स्वमरणात् प्राक्

Sri Venkateswara Vedic University

माऽहं पौत्रतमघं रुदमिति। न हास्मात्पूर्वाः प्रजाः प्रैतीति नु जात पुत्रस्य।

दीपिका

पापं निरुपमदुःखकरंपुत्रसंबन्धि पुत्रस्य प्रागभावप्रध्वंसाभ्यां शारीरव्याध्यादिना संतत्याद्यभावेन च कृतं पौत्रं मा रुदं रोदनं मा कुर्याम्। तवेशानायाः प्रसादत इति शेषः। इति मन्त्रपरिसमाप्त्यर्थः। न हास्मात्पूर्वाः प्रजाः प्रैति, अस्मादुक्तप्रकारिणो ह प्रसिद्धादुपासकात्पूर्वाः प्रथमत एतन्मरणमन्तरेणेत्यर्थः।

प्रजाः पुत्रादिरूपा न प्रैति न प्रयन्ति न म्रियन्ते। इति नु, एवं खल्वयं प्रकार इत्यर्थः। जातपुत्रस्योत्पन्नसुतस्य न त्वनुत्पन्नसुतस्य। अथ जातपुत्रस्योपासन-

विष्णुवेदाख्ययतिव्याख्या

उदपात्रस्थाने हरिततृणयोः प्रत्यसनविधिः। उपस्थानमन्त्र उच्यते। मन्त्रार्थो व्याख्याकारेणोच्यते–

त्वयि यद्धृदयं दिव्यं सुशिवं सर्वकामदम्।
मोक्षमार्गस्थिते तेन भूयान्मे पापनिह्नुतिः।
जाते पुत्रे विशेषोक्त्या सामान्यमिदमुच्यते।
माहं पौत्रमघं रुदमित्यस्यार्थोऽयम्।
नेत् पाप्मानमिति यथा तथा संकल्प इष्यते।
मन्त्रोपस्थानकालेऽस्य सर्वमन्यत् समं स्मृतम्।
मन्त्रत्रयजपोऽन्यस्य विशेषोऽन्यत् समं स्मृतम्।

परिष्कारः

प्रतीच्यामित्यर्थः। इदञ्च शुक्लपक्षे द्वितीयायां चन्द्रकलादर्शनम्। अत एवाद्यत्वेऽपि तादात्विककलादर्शनं स्मृत्याचारसिद्धम्। एतयैवावृतेति। पूर्वोक्तरीत्येत्यर्थः। वैकल्पिकं कर्मान्तरमुपस्थानाङ्गमाह हरिततृणे इति। उदपात्रे तृणद्वयप्रत्यसनं कृत्वा वोपतिष्ठेतेत्यर्थः। हरिततृणे वाचं प्रत्यस्यति इति पाठे तु हरिततृणे स्थितस्सन् वक्ष्यमाणमन्त्ररूपां वाचमुच्चारयेदित्यर्थः। न ह्यस्मात् पूर्वा प्रजा प्रैतीति। एतत्प्रजा एतन्मरणात् प्राक् न म्रियत इत्यर्थः। पूर्वं प्रैतीति प्रयोक्तव्ये

Sri Venkateswara Vedic University

अथाजातपुत्रस्य। आप्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा यमादित्या अंशुमाप्याययन्तीत्येतास्तिस्र ऋचो जपित्वा माऽस्माकं प्राणेन

दीपिका

कथनानन्तरम्। अजातपुत्रस्यानुत्पन्नतनयस्योपासनप्रकारः कथ्यत इति शेषः। अजातपुत्रो जातपुत्रवत्सर्वं तन्त्रं संपाद्य हरिततृणे स्वीकृत्य यान्मन्त्राञ्जपेत्तानाह आप्यायस्वाऽऽप्यायनं गच्छ। समेतु सम्यग्गच्छतु। ते तव त्वयीत्यर्थः। अयमृक्पादः

विष्णुवेदाख्ययतिव्याख्या

अजातपुत्रस्यापि।

मयि स्थिते न मे पुत्रः पञ्चत्वं गन्तुमर्हति।

इति जातपुत्रस्य पुत्रमरणप्रतिषेधः प्रार्थ्यते। स्वमरणात् प्रागस्य प्रजा न प्रैति इत्युपस्थानफलमुच्यते।

जातपुत्रस्येति गिरा गृहस्थस्यैतदुच्यते।

अजातपुत्रस्योपस्थानविधानात् जातपुत्रो गृहस्थ एवेति सिद्ध्यति। इति जातपुत्रोपस्थानविधिः। अनन्तरमजातपुत्रस्य विशेषो गृह्यते। यत्ते सुशीममित्यस्य स्थाने आप्यायस्वेत्याद्यास्तिस्र ऋचो जपित्वा मास्माकमित्यादिकं जपेत् । ऋगर्थो व्याख्याकारेणोच्यते।

वर्धयस्व प्रजाभिर्मां वर्षितृत्वं च मे भवेत्।
अन्नं बहुगुणं मे स्यान्नमो भूयो नमो नमः।।

इति प्रथमाया ऋचोऽर्थः।

परिष्कारः

पूर्वा प्रैतीति कर्तृविशेषणतया पूर्वादिपदप्रयोगोऽपि श्रुतिशैली। इतिन्वित्यादि। जातपुत्रपुरुषकर्तृकोपस्थानप्रकारोऽयम्। अथाजातपुत्रपुरुषकर्तृकमुपस्थानमुच्यत इत्यर्थः। आप्यायस्वेति प्रतीकत्रयगृहीतमृक्त्रयं तावत्– आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य संगथे।। सं ते पयांसि समु यन्तु वाजाः संवृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व। यमादित्या अंशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति।। तेन नो राजा वरुणो

Sri Venkateswara Vedic University

दीपिका

श्रुत्या प्रतीकत्वेन पठितः। एतावृक्पादौ परिशिष्टौ– विश्वतः सोम वृष्ण्यं भवा वाजस्य संगथे। विश्वतः सर्वतोऽग्निरूपात्पुरुषगात्रात्। सोम हे सोम स्त्रीरूप वृष्ण्यं वृष्णः पुरुषस्य हेतुभूतं शुक्रमाग्नेयं तेजो वाजस्यान्नस्य संगथे संगते भव। अयमर्थः। पुत्रोत्पत्तिद्वारा पितृणां पिण्डद्यन्नदो भवेति। प्रजासंपत्त्या त्वदीयं वृष्ण्यमाप्यानं विश्वतः समेतु मह्यं विश्वतो वाजस्य संगमाय भवेति वाऽर्थः। इदानीं मन्त्रान्तरप्रतीकभूतं पादान्तरमाह– सं ते पयांसि समु यन्तु वाजा इति। ते तव सोमात्मिकायाः प्रकृतेः संपयांसि सम्यक्क्षीराणि स्तनेन्दुमेघमण्डलस्थानि समु यन्तु वाजा उ अपि वाजा वाजिनोऽन्नोपजीविनस्तनयान्संयन्तु सम्यग्गच्छन्तु। इदमपि पठितं श्रुत्या। शिष्टं पादत्रयम्– संवृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व। संवृष्ण्यानि सम्यक्पुरुषोपकारीणि। अभिमातिषाहो वैरिसाहः पुत्रप्रवृद्ध्या क्षीराणि वैरिणामभिभवकारीणीत्यर्थः। हे सोमामृतायामृतत्वाय पुत्रोत्पत्त्यर्थमित्यर्थः। आप्यायमानः स्वेनाऽऽग्नेयेन च तेजसाऽऽप्यायनमाह्लादनं गच्छन्दिवि स्वर्गे श्रवांस्युत्तमानि श्रवणयोग्यानि यशांसि प्रौढानि धिष्व धत्स्व।।

विष्णुवेदाख्ययतिव्याख्या

अमृतत्वैकहेतूनि कर्माण्यायान्तु सर्वतः।
तथान्नान्यपि सर्वाणि वर्षितृत्वं च मे भवेत्।
पुनस्तान्यपि कर्माणि वर्धयन्ननिशं यशः.।
प्रथयस्वान्नलोकेऽपि लोकेऽस्मिन्नपि सर्वदा।
इति द्वितीयाया ऋचोऽर्थः.
यत्र मायामधिष्ठाय समास्ते भगवान् हरिः।
तस्य मार्गे स्थितो विष्णुश्चन्द्ररूपीह गीयते।
स आदित्यादिभिर्देवैराप्याय्याप्याय्य पीयते।
तेन ये सह तिष्ठन्ति देवाः कुर्वन्तु लोकिनम्।

परिष्कारः

बृहस्पतिराप्याययन्तु भुवनस्य गोपाः।। इति। ऐन्द्रीमित्यादि। इन्द्रवत् आदित्यवच्च

Sri Venkateswara Vedic University

प्रजया पशुभिराप्याययिष्ठा योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिराप्याययस्वेति। दैवीमवृतमावर्त आदित्यस्याऽऽवृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते।। ५ ।।

दीपिका

तृतीयमन्त्रस्य प्रतीकं पादमाह यं तृतीयं प्रसिद्धं सर्वोत्पत्तिकारणम्। आदित्या अग्न्यात्मकाः पुमांसोंऽशुं सूर्यस्य सौषुम्नं किरणं सोमं स्त्रीरूपमाप्याययन्त्याह्लादयन्ति। अस्य मन्त्रस्यापठितं श्रुत्या पादत्रयम्– यमक्षितमक्षितयः पिबन्ति। तेन नो राजा वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः। यं सोमं राजानं सूर्यं प्रकृतिरूपं सुषुम्नानाडीरूपेणाक्षितमक्षीणमक्षितयः क्षयशून्या आदित्यादयः पुरुषाः पतिपुत्रत्वादिना वर्तमानाः पिबन्ति लावण्यदुग्धादिरूपेण पानं कुर्वन्ति। तेनांशुनाऽक्षितरूपेण सुषुम्नानाम्नेत्यर्थः। नोऽस्मान्सोमस्योपासकान्भुवनस्य गोपा लोकस्य रक्षकः प्रजापतिर्बृहस्पतिर्वरुणो राजा चाऽऽप्ययन्त्वानन्दयन्त्विति मन्त्रत्रयप्रतीकपाद-त्रयपरिसमाप्त्यर्थः। एता उक्तपादत्रयाद्यास्तिस्रसंख्याका ऋचः पादबद्धान्मन्त्राञ्जपित्वा वाचनिकं जपं विधाय।

अनेन वक्ष्यमाणेन मन्त्रेण सोमाभिमुखं दक्षिणं हस्तं निःसारयेदित्याह– माऽस्माकं प्राणेन प्रजया पशुभिराप्याययिष्ठाः, अस्माकं सोमोपासकानां मुखबिलान्तः संचारिणा वायुना प्राणेन पुत्रादिरूपया प्रजया गवादिरूपैः पशुभिरस्मत्प्राण-प्रजापश्वभावेनेत्यर्थः। माऽऽप्याययिष्ठा अस्मच्छत्रूनानन्दं मा नयेथाः।।

विष्णुवेदाख्ययतिव्याख्या

इति तृतीयाया ऋचोऽर्थः। मास्माकमित्यादि। पुत्रो मे भविता यस्तु तस्य पुत्रादिसंपदः। भवन्तु त्वत्प्रसादेन । त्वमस्माकं प्राणेन प्रजया पशुभिश्च मा आप्याययिष्ठाः यः अस्मान् द्वेष्टि तस्य प्राणेन प्रजया पशुभिश्च सर्वमाप्यायस्वः। विपरीतमरेर्मम। इत्ययमस्यार्थः। इति जनिष्यमाणस्य पुत्रपौत्रादेराशीः प्रार्थ्यते। मास्माकमित्यादिकं तुल्यम्।

देवसंबन्धि कर्मात्र भूयो भूयात् पुनः पुनः।

Sri Venkateswara Vedic University

प्रजामरणदुःखनिवारकं चन्द्रोपासनम्

अथ पौर्णमास्यां पुरस्ताच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवाऽऽवृता।

दीपिका

किन्तु यः प्रसिद्धोऽस्मद्द्वेषी, अस्मान्सोमोपासकान्द्वेष्टि द्वेषं करोति यं च कृतापकारमकृतापकारं वा प्रसिद्धं प्रतिकूलम्, चकारोऽस्मासु द्वेषिणोऽस्य च समुच्चयार्थः। वयं सोमोपासका द्विष्मो द्वेषं कुर्मः। तस्यास्मदज्ञातस्य वैरिणः प्राणेन प्रजया पशुभिर्व्याख्यातम्। आप्यायस्वास्मानान्दयेति एवमेतन्मन्त्रार्थरूपां दैवीं देवेन भवता संपाद्यामावृतं संचरणक्रियामावर्ते समन्ताद्वर्तनं कुर्वे। आदित्यस्याग्नीषोमात्मकस्याऽऽवृतं संचरणक्रियामन्वावर्ते भवतः सोमस्य प्रसादमन्वावर्तनं कुर्वे। इति मन्त्रपरिसमाप्त्यर्थः। एतैर्मन्त्रैरित्यर्थः। दक्षिणं बाहुं दक्षिणं भुजं पूर्वं सोमाभिमुखं नीतमन्वावर्तते मन्त्रपाठमनु निःसारयति।। ५ ।।

उपासनद्वयमुक्त्वा तृतीयमुपासनं पुनः सोमस्याऽऽह अथामावास्योपासनात्प्राकृतादुपासानान्तरं कथ्यत इति शेषः। पौर्णमास्यां पञ्चदश्यां षोडशकलचन्द्रसहितायां पुरस्ताच्चन्द्रमसं दृश्यमानं स्वस्याभिमुखेन प्रत्यहं षोडशं कलं सोममुपतिष्ठेतैतयैवाऽऽवृता पूर्ववद्व्याख्येयम्। उपस्थानमन्त्रमाह– सोम उमया

विष्णुवेदाख्ययतिव्याख्या

दक्षिणं बाहुमावृत्य शनैर्गच्छेद् गृहं पुनः। दक्षिणावृदित्यर्थः। अनेन मन्त्रेण ऐन्द्रीमावृतम् इत्यादिना आवृत्य गृहं गच्छेत्।। ५ ।।

पूर्णचन्द्रमथोद्यन्तमुपतिष्ठेत्तथैव हि। अनन्तरं पौर्णमास्यां पूर्वस्मिन् पर्वण्येवेत्यर्थः। पुरस्तादुद्यन्तं चन्द्रमसमस्तमय आदित्यस्योपतिष्ठेत एतयैवावृता पूर्ववदित्यर्थः। मन्त्रार्थो व्याख्याकारेणोच्यते।

परिष्कारः

आवर्तमानोऽस्मि स्थिर इत्यर्थः।। ५ ।।

शुक्लपक्षप्रथमदृष्टचन्द्रकलोपस्थानमुक्तम्। तत्र पूर्णिमायां पूर्णचन्द्रोपस्थानमन्नादत्वफलमाह अथ पौर्णमास्यामिति। पञ्चमुखोऽसीति। सोमस्य, ब्राह्मणराज-

Sri Venkateswara Vedic University

सोमो राजाऽसि विचक्षणः। पञ्चमुखोऽसि प्रजापतिः। ब्राह्मणस्त एकं मुखं तेन मुखेन राज्ञोऽत्सि तेन मुखेन मामन्नादं कुरु। राजा त एकं मुखं तेन मुखेन विशोऽत्सि तेन मुखेन मामन्नादं कुरु। श्येनस्त एकं मुखं तेन मुखेन पक्षिणोऽत्सि तेन मुखेन मामन्नादं कुरु। अग्निष्ट एकं मुखं तेन

दीपिका

विश्वप्रकृत्या सह वर्तमानः प्रियदर्शनः सोमो वा राजा दीप्तिमानसि भवसि। विचक्षणः सर्वलौकिकवैदिककार्यकुशलः पञ्चमुखः पञ्चवदनोऽसि भवसि।।

प्रजापतिः प्रजानां स्थिरजङ्गमानां पालयिता। पञ्चापि मुखानि विभागेन प्रार्थयते। ब्राह्मणो द्विजोत्तमस्ते तव सोमस्यैकं मुखमेकं वदनं तेन मुखेनोक्तेन वदनेन राज्ञो राजजातीयान्क्षत्रियानत्सि भक्षयसि तेन मुखेनोक्तेन वदनेन मां सोमोपासकमन्नादं कुरु, स्पष्टम्। राजा त एकं मुखं तेन मुखेन विशोऽत्सि तेन मुखेन मामन्नादं कुरु। श्येनस्त एकं मुखं तेन मुखेन पक्षिणोऽत्सि तेन मुखेन मामन्नादं कुरु। अग्निष्ट एकं मुखं तेन मुखेनेमं लोकमत्सि तेन मुखेन मामन्नादं

विष्णुवेदाख्ययतिव्याख्या

विराडेवात्र विज्ञेयः सोम इत्युच्यते बलात्।

यतो वर्णाश्रमोत्पत्तिः सोमादिह निगद्यते।
वर्णोत्थितिश्रवादत्र प्रतिभात्याश्रमोत्थितिः।
विचक्षणोऽसि सर्वज्ञस्तथा पञ्चमुखो ह्यसि।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च मुनिसत्तम।
मुखबाहूरुपादेभ्यो यस्य जाताः क्रमेण हि।
स प्रजापतिरेवासि वैश्याच्छद्रोऽपि लक्षितः।

ब्राह्मणस्त एकं मुखमित्यादिभिश्चतुर्भिर्मुखैः चतुरोऽत्सि। त्वयि पञ्चमं मुखमात्मैव।पञ्चमं मुखमात्मैव स्वस्मिन्निति विशेषणात्।

परिष्कारः

श्येनाग्निरूपाणि मुखानि स्वमुखञ्चेति पञ्च मुखानि।

Sri Venkateswara Vedic University

मुखेनेमं लोकमत्सि तेन मुखेन मामन्नादं कुरु। त्वयि पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि तेन मुखेन मामन्नादं कुरु। माऽस्माकं प्राणेनप्रजया पशुभिरवक्षेष्ठा[१] योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिरवक्षीयस्वेति। दैवीमावृतमावर्त आदित्यस्याऽऽवृतमन्वावर्त इति

दीपिका

कुरु। त्वयि पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि तेन मुखेन मामन्नादं कुरु। राजा मूर्धाभिषिक्तः क्षत्रियः। विशो वैश्यप्रधानाः प्रजाः। श्येनः पक्षिमांसाशी क्रूरः पक्षी। पक्षिणः कपोतादीन्विहंगमान्। अग्निर्दाहपाकप्रकाशहेतुः प्रसिद्धः कृशानुः। इमं लोकं प्रत्यक्षादिप्रमाणगम्यमवाप्याकाशं विश्वम्। त्वयि सोमे राजनि पञ्चमं ब्राह्मणराजन्यश्येनाग्न्यपेक्षया पञ्चसंख्यापूरणम्। सर्वाणि भूतानि निखिलानि स्थिरजङ्गमानि। शेषं ब्राह्मणपर्यायवद्राजश्येनाग्निसोमपर्यायेषु व्याख्येयम्। माऽस्माकं प्राणेन प्रजया पशुभिरवक्षेष्ठा योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिरवक्षीयस्वेति दैवीमावृतमावर्त आदित्यस्याऽऽवृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते। अवक्षेष्ठा अस्मद्बन्धूनामवक्ष्यं मा कार्षीः। अवक्षीयस्वा-स्मद्वैरिबन्धूनवक्षं नय। अन्यत्पूर्ववद्व्याख्येयम्। अथवाऽऽप्यायनावक्षयौ भाविशुक्लकृष्णपक्षापेक्षया चन्द्रनिष्ठौ व्याख्येयौ। तथाचैकेनैव पक्षेण स्वात्मनो वृद्धिर्वैरिणो नाशश्चेति फलप्राप्तिरर्थादुक्ता भवति।।

विष्णुवेदाख्ययतिव्याख्या

तेनात्मना जगत् सर्वं ब्रह्मभूतोऽत्सि सर्वदा।
प्रजापत्यात्मके बुद्धौ निहितं बीजमुत्तमम्।
जानाम्यहं तत् तेनाहं पुत्रभावान्न दुःखितः।
एतज्जातपुत्रस्याजातपुत्रस्यापि तुल्यम्।

मास्माकमित्यादि, पूर्ववत् । तत्र विशेषः। अस्माकं प्राणेन प्रजया पशुभिश्च मा

१. अपक्षेष्ठाः इति परिष्कारपाठः

Sri Venkateswara Vedic University

दक्षिणं बाहुमन्वावर्तते। अथ संवेश्यञ्जायायै हृदयमभिमृशेत्। यत्ते सुसीमे हृदये हितमन्तः प्रजापतौ। मन्येऽहं मां तद्विद्वांसं तेन माऽहं पौत्रमघं रुदमिति। न हास्मात्पूर्वाः प्रजाः प्रैतीति।। ६ ।।

दीपिका

अथैवं सोमप्रार्थनानन्तरम्। संवेश्यन्भार्यया सह सम्यगानन्दरतिप्रजात्यर्थं वेश्यन्नुपवेशनं करिष्यञ्जायायै जायाया हृदयं स्तनमण्डलाधारदेशमभिमृशेद्वक्ष्यमाणेन मन्त्रेण सर्वतः स्पृशेत्। मन्त्रमाह– यत्प्रसिद्धं शरीरान्तरकारणं सुखं ते तव सोमरूपायाः स्त्रियाः सुसीमे हे शोभनगात्रे हे सुसीमन्निति वा। अथवा सप्तम्यन्तमिदं हृदयविशेषणम्। शोभना सीमा पुरुषस्य केदाररूपा यस्य तत्सुसीमं तस्मिन्हृदये हृदयपुण्डरीकाख्य आनन्दात्मनिवासे हितं चन्द्रमण्डल इवामृतम्। अन्तर्मध्ये प्रजापतौ प्रजापालके।

अथवा प्रजापतौ प्रजापतिना स्रष्ट्रा मयेत्यर्थः। मन्येऽहं मां तद्विद्वांसम्। अहं सोमोपासकस्तव पतिस्तदुक्तं प्रजापतिना निहितं मां सोमोपासकं विद्वांसं समस्तशास्त्रार्थविदं मन्येऽवगच्छामि। तेन सत्येन माऽहं पौत्रमघं रुदमिति न हास्मात्पूर्वाः प्रजाः प्रैतीति व्याख्यातम्।। ६ ।।

विष्णुवेदाख्ययतिव्याख्या

अवक्षेष्ठाः। क्षयपक्षेण योऽस्मान् द्वेष्टि यं च वयं द्विष्मः। तस्य प्राणदिभिरवक्षीयस्वेति। ऐन्द्रींमावृतमित्यादि तुल्यम्।

मन्येऽहं मां तद्विद्वांसं माहं पौत्रमघं रुदम्। इति।

रात्रौ संवेशनकाले जायाया हृदयमभिमृशेत् यत्ते सुशीम इत्यादिना मन्त्रेण । अस्मात् स्वमरणात्। एवं कुर्वतोऽस्य स्वमरणात् पूर्वं प्रजा न प्रैति । इत्युपसंहरत्युपस्थानकर्मविधिम्।। ६ ।।

परिष्कारः

एवं सर्वजितः कौषीतकेरुपासनत्रयमुक्तम्। अथ जायामरणात् प्राक् अपत्यामरणफलं

* पुत्रदीर्घायुःसम्पादकं कर्म *

अथ प्रोष्याऽऽयन्पुत्रस्य मूर्धानमिभिमृशेत्। अङ्गादङ्गात्संभवसि हृदयादधिजायसे। आत्मा त्वं पुत्र माऽऽविथ स जीव शरदः शतमसाविति नामास्य गृह्णाति। अश्मा भव परशुर्भव हिरण्यमस्तृतं भव। तेजो वै पुत्र नामासि स जीव शरदः शतमसाविति नामास्य गृह्णाति। येन

दीपिका

इदानीं सपुत्रस्य सोमोपासकस्य पुनः कृत्यान्तरमाह अथोक्त सोमोपासनानन्तरं प्रोष्य ग्रामानन्तरं देशान्तरं वा गत्वाऽऽयन्नावगच्छन्नागतः सन्नित्यर्थः। पुत्रस्य पितुर्दुःखनिवारकस्य बाह्यप्राणस्य मूर्धानं मस्तकमभिमृशेत्करेण संस्पृशेत्। संस्पर्शमन्त्रमाह– अङ्गादङ्गात्राद्गात्राच्छिरः पाण्यादिभ्यः सर्वेभ्यो गात्रेभ्य इत्यर्थः। संभवसि निर्गच्छसि हृदयादधिजायसे सर्वेभ्यो गात्रेभ्यो निर्गतो हृदयादधिकं प्रकटीभवसि। आत्मा मत्स्वरूपः पुत्र हे पुत्र त्वं पुन्नाम्नो निरयान्मा मामाविथ मम रक्षणं कृतवान्। स मम रक्षको जीव प्राणान्धारय शरदः शतं शतसंवत्सरानसावेतन्नामा, इत्यनेन मन्त्रेण नामास्य गृह्णाति अस्य पुत्रस्य नामग्रहणं करोति पिता। नामग्रहणे पुनरमन्त्रान्तरमाह– अश्मा भव पाषाणो भव रोगैरनुपद्रुतो वज्रसारशरीरो भवेत्यर्थः। परशुर्भव कुठारवद्वैरिवृक्षच्छेदकरो भव हिरण्यमस्तृतं भवास्तृतमास्तृतं सर्वतः परिस्मृतं कनकवत्सर्वप्रजाप्रियो भव। तेजो वै पुत्र नामासि वै प्रसिद्धं सर्वगात्रसारभूतं यत्तेजः संसारवृक्षबीजं तन्नाम त्वमसि भवसि हे पुत्र। स जीव शरदः शतमसाविति नामास्य गृह्णाति। व्याख्यातम्।।

विष्णुवेदाख्ययतिव्याख्या

प्रोष्यागमनवेलायां पुत्रायुः प्रार्थ्यतेऽत्र हि।
गृहात् प्रोष्यागते सति पुत्रस्य मूर्धानमभिमृशति अङ्गादङ्गादित्यादिना मन्त्रेण।

परिष्कारः

नामास्य दधातीति। जीव शरदः शतम् इत्येतदनन्तरं पुत्रनामोच्चारयतीत्यर्थः।

Sri Venkateswara Vedic University

प्रजापतिः प्रजाः पर्यगृह्णादरिष्ट्यै। तेन त्वा परिगृह्णाभ्यसाविति नामास्य गृह्णाति। अथास्य दक्षिणे कर्णे जपति। अस्मै प्रयन्धि मघवन्नृजीषिन्निति। इन्द्र श्रेष्ठानि द्रविणानि धेहीति। सव्ये मा च्छित्था मा व्यथिष्ठाः शतं शरद आयुषः। जीव पुत्र ते नाम्ना मूर्धानमवजिघ्राम्यसाविति। त्रिर्मूर्धानमवजिघ्रेद्गवां त्वा हिंकारेणाभि हिं करोमीति त्रिर्मूर्धानमभि हिं कुर्यात्।। ७ ।।

दीपिका

तृतीय वारनामग्रहणे तृतीयं मन्त्रमाह येन प्रसिद्धेन स्वयंप्रकाशेन तेजसा प्रजापतिः प्रजानां पालको धाता प्रजाः स्वसन्तानभूताः स्थिरजङ्गमाख्याः पर्यगृह्णात्सर्वतः स्वीकृतवान्। अरिष्ट्यै प्रजानामविनाशार्थं तेन प्रजापतिप्रजाग्रहणेन तेजसा त्वा त्वां पुत्रं परिगृह्णामि सर्वतः स्वीकरोमि। असाविति नामास्य गृह्णाति व्याख्यातम्। (अथास्य दक्षिणे कर्णे पिता जपति। अस्मै प्रयन्धि मघवन्नृजीषिन्निति, इन्द्र श्रेष्ठानि द्रविणानि धेहीति पुत्रस्य सव्ये कर्णे पिता जपति।) इदानीं मूर्ध्न आघ्राणे मन्त्रमाह– मा च्छित्था मत्सन्तानच्छेदं मा कार्षीर्मा व्यथिष्ठाः शरीरेन्द्रियमनोभिर्व्यथां मा गाः। शतं शरद आयुषो जीव शतं संवत्सराञ्जीवेत्यर्थः। पुत्र हे पुत्र ते नाम्ना तव पुत्रस्याभिधानेन देवदत्तादिलक्षणेन मूर्धानं मस्तक-मवजिघ्राम्याघ्राणं करोमि। असावेतन्नामाऽहं तव पिता। इत्यनेन मन्त्रेण त्रिस्त्रिवारं मूर्धानमवजिघ्रेन्मूर्ध्न आघ्राणं कुर्यात्। इदानीं हिकारमन्त्रमाह– गवां कामधेन्वादीनां सवत्सानां घटोध्नीनां त्वा त्वां पुत्रं हिंकारेण वत्साकारणार्थं गोभिः क्रियमाणः स्वरो हिंकारस्तेनाभिः हिं करोमि सर्वतो हिंकारेणाऽऽकारयामि। इत्यनेन मन्त्रेण त्रिस्त्रिवारं मूर्धानमभि हिं कुर्यात्सर्वतो मूर्ध्नि हिमिति शब्दं कुर्यात्।। ७ ।।

विष्णुवेदाख्ययतिव्याख्या

मन्त्रान्ते पुत्रनाम गृह्णाति। पुनरप्येवमश्मा भवेत्यादिना मन्त्रेण। पुनस्तृतीयमप्येवं येन प्रजापतिरित्यादिना मन्त्रेण । चतुर्थेन मन्त्रेण मा छेत्सा इत्यादिकेन पुत्रस्य

Sri Venkateswara Vedic University

* *दैवपरिवरः* *

अथातो दैवः परिमरः। एतद्वै ब्रह्म दीप्यते यदग्निर्ज्वलति। अथैतन्म्रियते यन्न ज्वलति। तस्याऽऽदित्यमेव तेजो गच्छति वायुं प्राणः। एतद्वै ब्रह्म दीप्यते यदादित्यो दृश्यते। अथैतन्म्रियते यन्न दृश्यते। तस्य चन्द्रमसमेव तेजो गच्छति वायुं प्राणः। एतद्वै ब्रह्म दीप्यते यच्चन्द्रमा दृश्यते।

दीपिका

एवं कौषीतकेस्त्रीण्युपासनान्युक्त्वा प्रकृतं प्राणस्य ब्रह्मत्वं संवर्गविद्यारूपेणान्तर्हितं विवक्षुः फलान्तराय नामान्तरमाह अथ प्राणस्य ब्रह्मत्वकथनान्तरम्। अतो यस्मात्स्ववैरिणो मरणस्येच्छाऽस्मात्कारणात्। दैवो देवानमग्निवागादीनां संबन्धी दैवः। परिमरः प्राणं परितो म्रियन्तेऽग्न्याद्या वागाद्याश्चेति प्राणो ब्रह्मरूपः परिमरः कथ्यत इति शेषः।

एततप्रत्यक्षं वै प्रसिद्धं ब्रह्म प्राणोपाधिकं सत्यज्ञानादिरूपं दीप्यते प्रकाशते यद्यदाऽग्निर्दाहपाकप्रकाशहेतुः कृशानुः। ज्वलति दीप्तिमान्भवति। अथ तदा, एतदुक्तं ब्रह्म म्रियते प्राणं मुञ्चति यन्न ज्वलति यदाऽग्निर्दीप्तिमान्न भवति तस्य दीप्तिशून्यस्याग्नेरादित्यमेव भास्करमेव न त्वन्यं तेजो गच्छति दीप्तिः प्राप्नोति वायुमाधिदैविकं प्राणं वातं प्राणः प्रकर्षेण चेष्टाहेतुर्वातो गच्छति। एतद्वै ब्रह्म दीप्यते यत्पूर्ववद्व्याख्येयम्। आदित्यो दृश्यते भास्करो नयनपथमागच्छति। अथैतन्म्रियते यत्पूर्ववद्व्याख्येयम्। न दृश्यते नयनाभ्यां न निरीक्ष्यते तस्यादृष्टस्याऽऽदित्यस्य चन्द्रमसमेव सोममेव न त्वन्यं तेजो गच्छति वायुं प्राणः। एतद्वै ब्रह्म दीप्यते यच्चन्द्रमा दृश्यते।।

विष्णुवेदाख्ययतिव्याख्या

मूर्धानं त्रिरबजिघ्रेत्। गवां त्वा इत्यादिना मन्त्रेण पुत्रस्य मूर्धानमभिहिं कुर्यात् । हिं हिं हिमिति त्रिश्कृत्वो जपेत्।। ७ ।।

अध्यात्ममधिदैवं च प्राणस्यान्यदुपासनम्।

Sri Venkateswara Vedic University

अथैतन्म्रियते यन्न दृश्यते। तस्य विद्युतमेव तेजो गच्छति वायुं प्राणः।

दीपिका

अथैतन्म्रियते यन्न दृश्यते तस्य विद्युतमेव तेजो गच्छति वायुं प्राणः। एतद्वै ब्रह्म दीप्यते यत्। चन्द्रमाः सोमस्तस्य चन्द्रमसो विद्युतमेव सौदामिनीमेव न त्वन्यम्। अन्यत्पूर्ववद्व्याख्येयम्। विद्युत्सौदामिनी विद्योतते विद्योतनं कुरुते दृश्यत इत्यर्थः। अथैतन्म्रियते यन्न विद्योतते तस्य वायुमेव तेजो गच्छति वायुं प्राणः। न विद्योतते न दृश्यते तस्य विद्युद्रूपस्य तेजः प्राणौ वायुमेवाधिगच्छतः। अन्यत्पूर्ववद्व्याख्येयम्।।

विष्णुवेदाख्ययतिव्याख्या

श्रुत्या प्रदर्श्यते ह्यत्र प्राणः पूर्वोक्त एव हि।
देवा यत्र विलीयन्ते सोऽयं वायुरुपास्यताम्।
क्रमेण देवता यत्र लीयन्ते चेन्द्रियैः सह।
सोऽयं ब्रह्मोच्यते ह्यत्र तदुपासाविधित्सया।
प्राणे द्विधा स्थिते देवे यथेदमखिलं जगत्।
ब्रह्मभूते चिरं स्थित्वा पुनरुत्पद्यते सदा।

इत्युपासना । आधिदैवतमध्यात्मं च क्रमेणोक्त्वा यत् किंचित् किंचिदुच्यते। अत्र प्राणः पूर्वप्रकरण उक्त एव । प्राणो बह्मेत्यादौ प्रथममधिदैवतपरिमर उच्यते । अग्न्यादित्यचन्द्रविद्युतां परिमर उच्यते।

ब्रह्मभूतोऽग्निर्दीप्यते तदा जीवतीत्यर्थः। यदा अग्निर्ज्वलति। यन्न ज्वलत्यग्निः तन्म्रियते तदा म्रियत इत्यर्थः। तस्याग्नेस्तेज आदित्यं गच्छति। तदा तत्स्थः प्राणो वायुं गच्छति । यदा आदित्यो दृश्यते अह्नीत्यर्थः तदा एतद्ब्रह्मैव

परिष्कारः

आधिदैविकाध्यात्मिकप्राणविषयिणीं परिमरभावनां परितो द्वेषिमरणफलामाह अथातो दैव इति। (तै) भृगुवल्ल्याम्, ब्रह्मणः परिमरः इत्यत्राप्येवम्भूतोऽर्थः परिष्कारो द्रष्टव्यः। वायुं प्राण इति। ज्वलनाद्यभावरूपमरणात् पूर्वम् अग्न्यादीनां

Sri Venkateswara Vedic University

एतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योतते। । अथैतन्म्रियते यन्न विद्योतते। तस्य वायुमेव तेजो गच्छति वायुं प्राणः। ता वा एताः सर्वाः देवता वायुमेव प्रविश्य वायौ मृता न मृच्छन्ते। तस्मादेव पुनरुदीरत। इत्यधिदैवतम्। अथाध्यात्मम्। एतद्वै ब्रह्म दीप्यते यद्वाचा वदति। अथैतन्म्रियते यन्न वदति। तस्य चक्षुरेव तेजो गच्छति प्राणं प्राणः। एतद्वै ब्रह्म दीप्यते यच्चक्षुषा पश्यति। अथैतन्म्रियते यन्न पश्यति। तस्य श्रोत्रमेव तेजो गच्छति प्राणं प्राणः। एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण श्रुणोति। अथैतन्म्रियते यन्न श्रुणोति। तस्य मन एव तेजो गच्छति प्राणं प्राणः। एतद्वै ब्रह्म

दीपिका

ता उक्ता वै प्रसिद्धा एता अग्न्यादित्यचन्द्रमोविद्युद्रूपाः सर्वा निखिला देवता देवताशब्दाभिधेया वायुमेव वातं प्राणमेव न त्वन्यं प्रविश्य प्रवेशनं कृत्वा वायावाधिदैविके प्राणे मृता अस्तं गता न मृच्छन्ते न विनश्यन्ति वायुतादात्म्येन। तस्मादेव उ अपि तत एव वायोर्न त्वन्यस्मात्पुनरुदीरते भूय उदयमागच्छन्ति । इत्यनेन प्राकारेणाधिदैवतं देवतामधिकृत्योक्तमधिदैवतम्। अथाधिदैवितकथनानन्तरम्। अध्यात्ममात्मानमधिकृत्योक्तमध्यात्मम्। वाचा चक्षुषा श्रोत्रेण मनसा चेन्द्रियेण वदनमवलोकनं श्रवणं ध्यानं च यथाक्रमेण कुरुते चेद्दीपनं न चेन्मरणम् । अग्नेर्वागादित्यस्य चक्षुश्चन्द्रमसः श्रोत्रं विद्युतो मनो वायोः प्राण इत्यत्र विशेषः। अन्यत्पूर्ववद्व्याख्येयम्।

विष्णुवेदाख्ययतिव्याख्या

दीप्यते। यन्न दीप्यते रात्र्यां तन्म्रियते। तस्यादित्यस्य तेजस्तदा चन्द्रमसमेव गच्छति रात्र्यामित्यर्थः। तस्य प्राणो वायुमेव।यच्चन्द्रमा दृश्यते तद् ब्रह्म दृश्यते । चन्द्रमा यन्न दृश्यते अमावस्यायामित्यर्थः। तन्म्रियते । तदा तस्य चन्द्रमसस्तेजो विद्युतं गच्छति । तस्य प्राणो वायुमेवगच्छति। यदा विद्युत् विद्योतते तदा ब्रह्म विद्योतते। यदा विद्युन्न विद्योतते तदा तन्म्रियते द्योतनाभावे। तस्य विद्युतस्तेजो वायुं गच्छति प्राणोऽपि वायुमेव। ता एता अग्न्यादित्यचन्द्रविद्युतः प्राणश्च

Sri Venkateswara Vedic University

दीप्यते यन्मनसा ध्यायति। अथैतन्म्रियते यन्न ध्यायति। तस्य प्राणमेव तेजो गच्छति प्राणं प्राणः। ता वा एताः सर्वाः देवताः प्राणमेव प्रविश्य प्राणे मृतान मृच्छन्ते। तस्मादेव उ पुनरुदीरते। तद्यदि ह वा एवं विद्वांस उभौ पर्वतावभिप्रवर्तेयातां तुस्तूर्षमाणौ दक्षिणश्चोत्तरश्च। न हैवैनं स्तृण्वीयाताम्। अथ य एनं द्विषन्ति यांश्च स्वयं द्वेष्टि त एनं सर्वे परिम्रियन्ते।। ८ ।।

दीपिका

दैवपरिमरज्ञानस्य फलमाह तत्तस्मिन्दैवे परिमरे ज्ञाते यदि पक्षान्तरेऽसंभावितमिदम्। अथ कथंचिदिच्छा भवेत्। ह प्रसिद्धा वै स्मर्यमाणाः। एवं विद्वांस उक्तेन प्रकारेण दैवपरिमरज्ञानवन्त उभौ द्वौ पर्वतौ गिरी अभिप्रवर्तेयातामभिप्रवर्तयेरन्सर्वतः प्रवृत्तिं द्वंद्वयुद्धैरिवोत्पतनाधोभूमिप्रवेशादिकं कारयेयुः। तौ च पर्वतौ किमल्पावेकदेशस्थौ चेत्याशङ्क्य नेत्याह–तुस्तूर्षमाणौ दक्षिणश्चोत्तरश्चाऽऽस्तरणं कुर्वाणौ। दक्षिण एकस्तादृशश्चोत्तरः। चकारौ दक्षिणोत्तरयोस्तु स्तूर्षमाणपदसंबन्धार्थौ। अयमर्थः। उत्तरकुर्वादिदेशस्थ एकोऽपरश्च भारतखण्डादिस्थः। उभावपि भास्करगतिनिरोधकौ पृथिवीं पादपीडनेन पातालं नयन्तौ विश्वावकाशं स्वदेहेन ग्रसन्ताविति। न हैवैनं स्तृण्वीयाताम्। एनमेतान्विदुषः। ह प्रसिद्धं नैव स्तृण्वीयातां नैव हिंस्यातामितिक्रमणं नैव कुर्वीयातां यदुक्तमेभिस्तदेव कुर्वीयातामित्यर्थः।

विष्णुवेदाख्ययतिव्याख्या

सर्वा देवता वायुमेव प्रविश्य।

देवा यत्र विलीयन्ते सोऽयं वायुरुपास्यताम्।

अग्न्यादयो देवता यत्र वायौ विलीयन्ते स वायुरुपास्यताम्।

वायौ म्लुक्ता न मृच्छन्त इत्युच्यते। तस्माद्वायोरेव पुनरुत्पद्यन्ते। इत्यधिदेवतपरिमर उक्तः। अनन्तरमध्यात्ममुच्यते। यद् वाचा वदति यद् वाग्रूपं ब्रह्म दीप्यते यन्न

Sri Venkateswara Vedic University

दीपिका

अथैवं सफलदैवपरिमरज्ञानानन्तरं ये दैवपरिज्ञानशून्या गतभाग्या एनं दैवपरिज्ञानवन्तं द्विषन्ति, असहिष्णवोऽपकारान्कुर्वन्तो न बहु मन्यन्ते यांश्च प्रसिद्धान्गतभाग्यान्। चकारः पूर्वेषामपि समुच्चयार्थः। स्वयं दैवपरिमरज्ञानवान्द्वेष्टि न सहते कुतश्चिदभाग्ययोगात्त एनं सर्वे परिम्रियन्ते, एनं दैवपरिमरज्ञानवन्तं त एतस्मिन्द्वेषिण एतस्य द्वेष्याश्च सर्वे निखिलाः सपुत्रपशुबान्धवा इत्यर्थः। परिम्रियन्ते सर्वतो निधनं गच्छन्ति।। ८ ।।

विष्णुवेदाख्ययतिव्याख्या

गच्छति। यच्चक्षुषा पश्यति तच्चक्षुर्गतं ब्रह्म दीप्यते यन्न पश्यति तन्म्रियते । तस्य चक्षुषस्तेजस्तदा श्रोत्रं गच्छति चक्षुर्गतः प्राणः प्राणमेव। यदा श्रोत्रेण शृणोति तदा श्रोत्रगतं ब्रह्म दीप्यते। यदा न श्रुणोति तदा म्रियते। तस्य श्रोत्रस्य तेजो मनो गच्छति श्रोत्रगतः प्राणः प्राणमेव। यदा मनसा ध्यायति तदा मनो ब्रह्म दीप्यते यदा न ध्यायति तदा म्रियते। तस्य मनसस्तेजः प्राणमेव गच्छति मनोगतः प्राणः प्राणमेव। ता वागादयो देवताः प्राणसहिताः प्राणमेव प्रविशन्ति । सः प्राणः उपास्यताम्।

प्राणे द्विधा स्थिते देवे यथेदमखिलं जगत्। ब्रह्मभूते चिरं स्थित्वा। इति। प्राणे म्लुक्ता न मृच्छन्त इति । तस्माद् प्राणादेव पुनरुत्पद्यन्ते। पुनरुत्पद्यते यदा इत्युक्तम्। तथा पुण्यमपुण्यं वा गच्छते दूरतो मुनेरिति। तद्भावापत्तिनैनं पुनरागच्छतो मृते । य एनं द्विषन्ति स्वयं यांश्च द्वेष्टि ते सर्वे एनं परिम्रियन्ते।। ८ ।।

परिष्कारः

अग्न्यादौ कृतं प्राणनव्यापारं तदा त्यजतीत्युक्तं भवति। उदीरते उद्गच्छन्ति। ईर गतौ। बहुवचनम्। एवमधिदैवतमग्न्यादित्य चन्द्रमोविद्युतां विलय उक्तः। वाय्वधीनत्वात् तद्व्यापारस्य।

अथाध्यात्मं वाक्चक्षुश्श्रोत्रमनसां प्राणे लय उच्यते अथाध्यात्ममिति।

Sri Venkateswara Vedic University

* निःश्रेयसादानं नाम मुख्यप्राणविद्या *

अथातो निःश्रेयसादानम्। सर्वा[१] ह वै देवता अहंश्रेयसे विवदमनाः

दीपिका

अथ परिमरगुणोपासनानन्तरम् । अतो यस्मात्फलान्तरापेक्षाऽस्मात्कारणान्निःश्रेयसादानं निः श्रेयसं सर्वस्मादुत्कर्षरूपो गुणो मोक्षविशेषस्तद्गुणविशिष्टस्य प्राणस्याऽऽदानं स्वीकारः क्रियत इति शेषः। तत्र प्राणो निः श्रेयसमिति नाविचार्य

विष्णुवेदाख्ययतिव्याख्या

प्राणविज्ञानमन्यत्तु निःश्रेयसफलार्थिने ।
वक्तुं हि प्राणसंवादः कल्प्यते तत्परीक्षया।
उपासने हि यस्याभून्निः श्रेयसफलं भवेत्।
तदुपासाविधानार्थं प्रारब्धैषोत्तरा श्रुतिः।
प्राणोपासनमेवात्र निःश्रेयस फलं भवेत्।
इति निश्चित्य कर्तव्यं प्राणोपासनमादरात्।
इत्यर्थः प्राणसंवादः श्रुत्यायं कल्पितोऽत्र हि।
प्रज्ञात्मके परे ब्रह्मण्यास्थितं सकलं जगत्।
इत्युपासाविधानार्थमभिसंभूय वागियम्।
कार्यस्य कारणत्वेन ह्यत्रोपासनमिष्यते।
यतस्तत्प्राप्तिरेवेह फलमुक्तं स्वरेति हि।

अथ निःश्रेयसादानमुच्यते। अन्यत्तु निःश्रेयसप्राप्तिफलमेतदुपासनम्। सर्वा

परिष्कारः

वाचा वक्तुमशक्यमपि पश्यति : द्रष्टुमशक्यमपि श्रृणोति, अप्राप्तश्रवणमप्यन्तश्चिन्तयतीत्याशयेन वागादितेजसां चक्षुरादिषु लयकथनम्।प्राणं प्राण इति। तत्तदिन्द्रियप्रेरणव्यापारः प्राणकृतः तदा पृथक् न तिष्ठतीति यावत्। ।। ८ ।।

१. सर्वानन्तरं 'एवा' इति परिष्कारपाठः

Sri Venkateswara Vedic University

अस्माच्छरीरादुच्चक्रमुः। तद्दारुभूतं शिश्ये। अथैनद्वाक्प्रविवेश। तद्वाचा

दीपिका

स्नेहादिना स्वीकृतं किन्तु महता संघर्षेण विचारितम्। एतदर्थमाख्यायिकामाह– सर्वा निखिला ह किल वै प्रसिद्धा देवता देवताशब्दवाच्या वागाद्याः। अहंश्रेय-सेऽहंवादेनाऽऽत्मनः श्रेय आधिक्यं तदर्थं विवदमाना मामन्तरेण का भवत्य इति स्वव्यतिरिक्ताः परास्तिरस्कृर्वत्य इत्यर्थः।

स्वयं निश्चयं कर्तुमशक्ताः प्रजापतिं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति। स हि प्राणे श्रैष्ठ्यं जानन्नपि स्वसुतानां दुःखं दातुमशक्तोऽमुमुपायं प्रत्यपद्यत। यस्मिन्व उक्रान्त इदं शरीरं पापिष्ठं शवसमानं भविष्यति स वः श्रेष्ठ इत्युक्ते तथैव स्वश्रैष्ठ्यनिर्धारणार्थं क्रमेणोत्क्रमणं कृतवत्य इत्याह अस्मात्प्रत्यक्षाच्छ-रीरान्मनुष्यादिदेहादुच्चक्रमुर्वागादयः क्रमेणोत्क्रमणं चक्रुः। तत्स्थूलशरीरं वागादीनां प्रत्येकमुत्क्रमणे वदनादिव्यापारमकुर्वत्स्थितं यदा पुनर्मुख्यप्राण उत्क्रान्तस्तदा दारुभूतं चिताकाष्ठसमानमस्पृश्यं सर्वव्यापारशून्यं शिश्ये शयनं कृतवत्।

विष्णुवेदाख्ययतिव्याख्या

वागादयो देवताः श्रेयसेऽहं भवामीति प्रत्येकमुच्यते। तदर्थं विवदमानाः सर्वा देवता अस्माच्छरीरादुच्चक्रमुः। तस्मिन् काले तच्छरीरं दारुभूतं शिश्ये अशेत। ततः प्रथमम् अहं शरीरमुत्थापयामीति एनत् शरीरं वाक् प्रविवेश। तदा तच्छरीरं वाचा वदत् शिश्य एव । ततः श्रोत्रमेनत् शरीरं प्रविवेश। तदा वदत् पश्यत्

परिष्कारः

छान्दोग्यबृहदारण्यकादिप्रसिद्धिः प्राणप्राधान्यवाद इहापि क्रियते। एतद्विज्ञानफलञ्च देववत् अमृतत्वम्। सर्वाभेदान्यत्रेमे इति सूत्रे अन्यत्रेति इदं कौषीतकिप्रकरणमेव गृहीत्वा छान्दोग्यबृहदारण्यकश्रुतविद्यैक्यं विचार्य स्थापितम्। परन्तु भाव-प्रकाशिकाशारीरकशास्त्रार्थदीपिकादौ परानुरोधेनेव वाक्यमिदं कौषीतकिब्राह्मण-दशमाध्यायगतत्वेन निर्दिष्टमस्ति। तन्नूनं कौषीतकिब्राह्मणपूर्वभागमेलनेन स्यात्। निःश्रेयसादानम् प्राणादिदेवतानां मध्ये प्राणदेवतया श्रौष्ठ्यस्वीकरणम्। उपवर्ण्यत

Sri Venkateswara Vedic University

वदच्छिश्य एव। अथैनच्चक्षुः प्रविवेश। तद्वाचा वदच्चक्षुषा पश्यच्छिश्य एव। अथैनच्छ्रोत्रं प्रविवेश। तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण श्रुण्वच्छिश्य

दीपिका

एवं व्यतिरेकेण निश्चये संपन्नेऽप्यतिस्पर्धावशादन्वयमन्तरेण निश्चयमनधिगच्छन्तोऽन्वयमप्यनुष्ठितवन्त इत्याह–अथ शरीरस्य दारुभूतस्य शयनानन्तरमेतच्छरीरं वाग्वागिन्द्रियं प्रविवेश प्रवेशं कृतवत्। तच्छरीरं वाचा वागिन्द्रियेण वदद्वाग्व्यापारं कुर्वच्छिश्य एव शयनं कृतवदेव न तूत्थितवत्।।

वाक्प्रवेशानन्तरं चक्षुरिन्द्रियं प्रविष्टं ततश्चावलोकनं वदनं चाभूत्। अनन्तरं श्रोत्रेन्द्रियं प्रविष्टं ततश्च श्रवणावलोकनवदनान्यभूवन्। अनन्तरं मनः प्रविष्टं ततश्च ध्यानश्रवणावलोकनवदनान्यासन्न तु शरीरमुत्थितत्पर्यायत्रयेणाऽऽह अथैनच्चक्षुः प्रविवेश तद्वाचा वददिति। स्पष्टम्। अथ वाक्चक्षुः श्रोत्रमनः प्रवेशानन्तरमेतच्छरीरं वदत्पश्यच्छृण्वद्ध्यायत्प्राणो मुखबिलान्तर्वर्ती पञ्चवृत्तिर्वायुविशेषः प्रविवेश

विष्णुवेदाख्ययतिव्याख्या

श्रृण्वच्च शरीरं शिश्य एव । ततो मनः शरीरं प्रविवेश। तदा वदत् शृण्वद् ध्यायच्च वर्तमानं शरीरं शिश्य एव।

परिष्कारः

एतद्विज्ञानफलञ्च देववत् अमृतत्वम्। सर्वाभेदान्यत्रेमे इति सूत्रे अन्यत्रेति इदं कौषीतकिप्रकरणमेव गृहीत्वा छान्दोग्यबृहदारण्यकश्रुतविद्यैक्यं विचार्य स्थापितम्। परन्तु भावप्रकाशिकाशारीरकशास्त्रार्थदीपिकादौ परानुरोधेनेव वाक्यमिदं कौषीतकिब्राह्मणदशमाध्यायगतत्वेन निर्दिष्टमस्ति। तन्नूनं कौषीतकिब्राह्मणपूर्वभागमेलनेन स्यात्। निःश्रेयसादानम् प्राणादिदेवतानां मध्ये प्राणदेवतया श्रौष्ठ्यस्वीकरणम्।

एव। अथैनन्मनः प्रविवेश। तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण श्रृण्वन्मनसा ध्यायच्छिश्य एव। अथैनत्प्राणः प्रविवेश। तत्तत एव समुत्तस्थौ। ते देवाः[१] प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय सहैतैः सर्वैरस्माल्लोकादुच्चक्रमुः। ते वायुरप्रतिष्ठा आकाशात्मानः स्वरीयुः।

दीपिका

प्रवेशं कृतवान्। तच्छरीरं तत एव तस्मात्प्राणप्रवेशादेव न त्वन्यस्मात्समुत्तस्थौ सम्यगुत्थानं कृतवत्। ते वागादयः परित्यक्ताभिधाना देवा देवशब्दाभिधेयाः प्राणे शरीरोत्थापनहेतौ प्रकृष्टचेष्टाविति निःश्रेयसं सर्वेभ्यो वागादिभ्य उत्कर्षं विदित्वा प्राणमेव प्रकृष्टचेष्टावन्तं न त्वन्यं प्रज्ञात्मानं प्रज्ञात्मनो भूम्न उपाधिभूतं संप्रसादम्। अथवा प्राणे सति प्रज्ञाया दर्शनादसति चादर्शनात्प्राणस्य प्रज्ञात्मत्वमविरुद्धमभिहितं प्राणमेव प्रज्ञात्मानमिति। अभिसंभूय सर्वतः संभवनं प्राप्तिं कृत्वा सहैतैः सर्वैरेतैः प्राणापानव्यानोदानसमानैर्निखिलैः सह यथा प्राणवृत्तिभेदा आध्यात्मिक परिच्छेदशून्यास्तद्वद्वागादयोऽपीत्यर्थः। अस्मात्प्रत्यक्षाल्लोकात्तनुरूपाच्छरीराच्च-क्षुराद्यभिमानादित्यर्थः। उच्चक्रमुरुत्क्रमणं चक्रुः।

विष्णुवेदाख्ययतिव्याख्या

अनन्तरं शरीरं प्राणः प्रविवेश। तदा तच्छरीरमेव तत उत्तस्थौ उत्थितम्। ततो देवाः प्राणे निःश्रेयसं ब्रह्मत्वं विजित्य प्रज्ञात्मानं प्राणमेतैः सर्वैः सह संभूय अभिभूयेत्युपासाविधानार्थं सर्वैः सह संभूय अभिभूयेत्युपासा विधानार्थं सर्वैः सहास्माल्लोकादुच्चक्रमुः।

परिष्कारः

उपवर्ण्यत इति शेषः। अहंश्रेयसे स्वस्येतरापेक्षयोत्कर्षमुद्दिश्य। तद्धाप्राणदिति। तत् शरीरं सर्वासां निष्कान्तत्वात् निष्प्राणं शिश्ये इति। शिश्य एवेति। मुख्यप्राणस्य

---

१. ता वा एताः सर्वा देवताः इति परिष्कारपाठः

Sri Venkateswara Vedic University

तथो एवैवं विद्वान्सर्वेषां भूतानां प्राणमेव प्रज्ञात्मानमभिसंभूय सहैतैः सर्वैरस्माच्छरीरादुत्क्रामति। स वायुप्रतिष्ठ आकाशात्मा स्वरेति। स तद् भवति। यत्रैते देवाः। तत्प्राप्य तदमृतो भवति। यदमृता देवाः।। ९ ।।

दीपिका

ते परित्यक्ततदभिमाना वागादयो वायुप्रतिष्ठा वायावाधिदैविके प्राणे प्रतिष्ठाप्राणो निः श्रेयसमिति ज्ञानमाश्रयो येषां ते वायुप्रतिष्ठाः। आकाशात्मान आकाशवत्सर्वगत आत्मा येषां त आकाशात्मानः। स्वरीयुः स्वः स्वर्गमग्न्यादिस्वरूपमीयुर्ययुर्गतवन्त इत्यर्थः। तथो एव, उ अपि तद्वदेव यथा देवा न त्वन्यथा। एवं विद्वानुक्तेन प्रकारेण प्राणे निःश्रेयसं जानन्सर्वेषां भूतानां निखिलानां स्थिरजङ्गमानां प्राणमेव प्रज्ञात्मानमभिसंभूय सहैतैः सर्वैरस्मात्। व्याख्यातम्। शरीराच्छरीराभिमाना-दुत्क्रामत्युत्तिष्ठति शरीराभिमानं परित्यजतीत्यर्थः। स वायु प्रतिष्ठ आकाशात्मा स्वरेति। व्याख्यातम्। उपासकस्यैकत्वादेकवचनं विशेषः।

विष्णुवेदाख्ययतिव्याख्या

ते सर्वे वायुप्रतिष्ठा आकाशात्मानः स्वर्गमीयुः। इति विद्वत्प्रशंसा। तथा एवं विद्वान् प्रज्ञात्मानं प्राणमभिसंभूय एतैः सर्वैः सहास्माच्छरीरादुत्क्रामति। ततः स वायुप्रतिष्ठ आकाशात्मा स्वरेति। स तत्र भवति यत्र देवा गताः। तत् स्थानं प्राप्य।

आकाशात्मेति वचसाप्येषोऽर्थः प्रतिभाति हि।
कारणत्वेन कार्यस्य यथोपासनमुच्यते।
आकाशशरीरमित्यादौ तथेदमपि वर्ण्यते।

परिष्कारः

पुष्कलप्रवेशाभावात् वागादिप्रवेशाधीनव्याहारादिकर्तृत्वेऽपि नोत्थानसमर्थमासीदित्यर्थः।

Sri Venkateswara Vedic University

* *पुत्राभ्युदयफलं सम्प्रदानाख्यमुपासनम्* *

अथातः पितापुत्रीयं संप्रदानमिति चाऽऽचक्षते। पिता पुत्रं प्रष्यन्नाह्वयति।

दीपिका

स्वः स्वर्गं प्राणं ब्रह्मज्ञानोत्पादनद्वाराऽऽनन्दात्मानं वैति गच्छति। स्वरेतीत्येतद्व्याकरोति स उपासकस्तद्भवत्युक्तं प्राणस्वरूपं भवति। तच्छब्दार्थमाह– यत्र यस्मिन्प्राणस्वरूप एते देवा एते वागादयोऽग्न्याद्यात्मका देवशब्दाभिधेयाः। ननु वागादीनामग्न्याद्याप्तिलक्षणममृतत्वं जातं तत्प्राप्तावुपासकस्य पुनस्तत्प्राप्तौ किं स्यादित्यत आह– तत्प्राणस्वरूपं प्राप्यावाप्य तदमृतस्तत्सर्वपरिच्छेदशून्यममृतत्वं यस्य सोऽयं तदमृतो भवति स्पष्टम्। यदमृता यत्प्रसिद्धं सर्वपरिच्छेदशून्यममृतत्वं येषां ते यदमृता देवा वागाद्याः।। ९ ।।

इदानीं प्राणविदः संप्रत्तिकर्माऽऽह अथ प्राणोपासनानन्तरम्। अतो

विष्णुवेदाख्ययतिव्याख्या

क्रममुक्तिफलं ह्येतत् प्राणभावोक्तितः पुरा।
कारणावाप्तितो वायुप्रतिष्ठ इति वर्णितः।
न हि मोक्षे विशेषोऽस्ति सर्वेषामपि देहिनाम्।
इत्येतद् वर्ण्यते ह्यत्र यदमृता इति वाक्यतः।। ९ ।।

अथानन्तरं पितापुत्रीयं संप्रदानमिति च द्विनामकं कर्म वक्ष्यते।

परिष्कारः

न च सर्वथा मुख्यप्राणसंबन्धाभावे वागादिव्यापारा एव कथमिति शङ्क्यम्– सर्वथा प्राणसंबन्धाभावे शवत्वप्रसङ्गात् पुष्कल-तत्प्रवेशाभावस्यैवेष्टत्वात्। प्रज्ञात्मानं स्वकीय प्रज्ञारूपव्यापारनिर्वाहकम्; यद्वा प्रज्ञजीवरूपनिर्वाहकविशिष्टम्। एतैः सर्वैः दर्शनादिव्यापारैः सह। आकाशात्मानः इति, धूमादिमार्गे आकाशस्य निविष्टत्वात्; अवकाशाभावे गमनायोगेन तदपेक्षत्वाद्वा।। ९ ।।

Sri Venkateswara Vedic University

नवैस्तृणैरगारं संस्तीर्याग्निमुपसमाधायोदकुम्भं सपात्रमुपनिधायाहतेन वाससा संप्रच्छन्नः स्वयं श्येत। एत्य पुत्र उपरिष्टादभिनिपद्यते, इन्द्रियैर-स्येन्द्रियाणि संस्पृश्य। अपि वाऽस्याभिमुखत एवाऽऽसीत। अथास्मै

दीपिका

यस्मान्मरणमवश्यंभावि, अस्मात्कारणात्पितापुत्रीयं पित्रा पुत्राय दीयमानं पितापुत्रीयं संप्रदानं सम्यक्प्रदीयत इति संप्रदानं संप्रत्तिकर्मेत्यर्थः। इति चाऽऽचक्षतेऽनेनैव प्रकारेण कथयन्ति। पिता पुत्रं प्रेष्यन्कुतश्चिन्निमित्तान्मरिष्यामीति निश्चित्येर्थः। पिता जनकः पुत्रमौरसं तनयमाह्वयति, आकारयति संप्रत्तिकर्मार्थम्। आकारण इतिकर्तव्यतामाह– नवैस्तृणैर्नवीनैः कुशादिभिस्तृणैरगारं संस्तीर्य गृहमाच्छाद्याग्नि-मुपसमाधाय तस्मिन्गृहे श्रौतं स्मार्तं वाऽग्निं संस्थाप्याग्नेरुत्तरतः पूर्वतो वोदकुम्भं सपात्रमुपनिधाय नीरपूर्णं कलशं व्रीहिपूर्णपात्रसहितं समीपे संस्थाप्याहतेन वाससा संप्रच्छन्नो नवीनवस्त्रेण संवृतः स्वयं श्येतः श्वेतः सितमाल्याम्बरधर इत्यर्थः। एत्याऽऽगत्याऽऽह्वयतीत्यन्वयः। पुत्र आगते तनय उपरिष्टादुपरिभागेऽभिनिपद्यते सर्वतो नितरां प्राप्नोति।।

विष्णुवेदाख्ययतिव्याख्या

संप्रत्तिनामकं कर्म वक्तव्यमिह वर्ण्यते।
पुत्रजन्मफलं ह्येतल्लोकप्राप्तिरितीरितम्।
पुत्रेणैवेति वचसा संप्रदानेन तद् भवेत्।
तद् ब्रह्मेत्यादिकं यद्वत्तथेदमिह वर्ण्यते।

संसारविरक्तः पिता पुत्रं प्रेष्य आह्वयति। स्वस्यागारं गृहमशुष्कैर्दर्भैः संस्तीर्य तस्मिन्नग्निमुपसमाधायाग्निमुखं कृत्वा उदकुम्भं पात्रसहितं समीपे निधायात्मानमहतेन वाससा संप्रच्छाद्य शेते। तदा पुत्र एत्य तस्योपरि अभिनिष्पद्य

परिष्कारः

'अथातः संप्रत्तिः' इति बृहदारण्यकोक्तं संप्रत्तिकर्म प्रस्तौति अथातः पितापुत्रीयमिति।

Sri Venkateswara Vedic University

संप्रयच्छति। वाचं मे त्वयि दधानीति पिता। वाचं ते मयि दध इति पुत्रः।

दीपिका

अभिनिपदन इतिकर्तव्यतामाह इन्द्रियैश्चक्षुरादिभिः स्वकीयैरस्य पुत्रस्येन्द्रियाणि चक्षुरादीनि संस्पृश्य सम्यक्स्पर्शनं विधायाभिनिपद्यत इत्यन्वयः। पक्षान्तरमाह– अपि वाऽथवा। अस्य पुत्रस्याभिमुखत एव संमुखत एव न त्वन्यथोपरिपतनस्य लोकगर्हितत्वादित्यर्थः। आसीतोपविशेत्। अथानन्तरमस्मै पुत्राय संप्रयच्छति सम्यक्प्रयच्छेद्वक्ष्यमाणेन विधिना स्ववागादीन्दद्यादित्यर्थः। वाचं वागिन्द्रियं मे मम पितुर्मुमूर्षोस्त्वयि पुत्रे ममाऽऽनृण्यस्य विधातरि दधानि धारयाणि। इत्यनेन प्रकारेण पिता जनकः। आहेति शेषः। एवं पित्रोक्ते वाचं वागिन्द्रियं ते तव पितुर्मयि पुत्रे दधे धारये। इत्यनेन प्रकारेण पुत्रस्तनय आहेति शेषः।।

विष्णुवेदाख्ययतिव्याख्या

स्वेन्द्रियैरस्येन्द्रियाणि संस्पृश्य, अपि वा अस्याभिमुखत आसीतैव। अथ पिता स्वेन्द्रियाण्यस्मै संप्रयच्छतीन्द्रियकार्याणि च।

वाचं म इति वाक्येन तत्क्रतुग्रहणं शिशोः।

मे वाचं त्वयि दधानीति पिता ब्रूयात्। ते वाचं मयि दध इति पुत्रो ब्रूयात्।

परिष्कारः

स्वदर्शनानुकूलं समीपेऽवनतस्तिष्ठत्यर्थः। पक्षान्तरमाह अपिवेति। उपाभिगदः स्यात् संनिहितपरिव्याप्तरोगतया प्रत्येकग्रहणेन वक्तुमसमर्थः स्यात्। दक्षिणावृत् - - दक्षिणमावर्तमानः। प्रादक्षिण्येनेति यावत्। इतरः पुत्रः। अगदः स्यात् निवृत्तगदश्चेत्। पुत्रस्येश्वर्ये–पुत्राधीनः। परि वा व्रजेत्। संन्यासं वा कुर्यादित्यर्थः। अगदत्वपक्षे वक्तव्यमुक्त्वा पक्षान्तरे वक्तव्यमाह यद्यु वा इत्यादिना। अस्य संप्रदानस्यापि मुख्यप्राणतदधीनस्थितिप्रवृत्तिकेन्द्रियरूपसर्वप्राणविषयकत्वादिहैतदुक्तिः।

प्राची पर्यङ्कविद्येव प्रातर्दन्यादिवत् तथा।
परविद्या न काऽपीह द्वितीयेऽध्याय ईक्ष्यते।।

Sri Venkateswara Vedic University

प्राणं मे त्वयि दधानीति पिता प्राणं ते मयि दध इति पुत्रः। चक्षुर्मे त्वयि दधानीति पिता। चक्षुस्ते मयि दध इति पुत्रः। श्रोत्रं मे त्वयि दधानीति पिता। श्रोत्रं ते मयि दध इति पुत्रः। अन्नरसाम्ने त्वयि दधानीति पिता। अन्नरसांस्ते मयि दध इति पुत्रः। कर्माणि मे त्वयि दधानीति पिता। कर्माणि ते मयि दध इति पुत्रः। सुखदुःखे मे त्वयि दधानीति पिता। सुखदुःखे ते मयि दध इति पुत्रः। आनन्दं रतिं प्रजातिं मे त्वयि दधानीति पिता। आनन्दं रतिं प्रजातिं ते मयि दध इति पुत्रः। इत्यां मे त्वयि दधानीति पिता। इत्यास्ते मयि दध इति पुत्रः। धियो विज्ञातव्यं कामान्मे त्वयि दधानीति पिता। धियो विज्ञातव्यं कामांस्ते मयि दध इति पुत्रः।

दीपिका

प्राणं घ्राणं मुख्यं च प्राणम्। चक्षुःश्रोत्रे स्पष्टे। अन्नरसान्मधुरादीन्। पूर्वं करणग्रहणमित आरभ्य विषयग्रहणम्। उभयत्र करणविषययोः समर्पणार्थं कर्माण्यादर्तव्यानि। सुखदुःखे शरीरोपभोग्ये। आनन्दं रतिं प्रजातिं मैथुनस्यावसान आनन्दस्ततः प्राग्रतिस्ततः प्रजातिः पुत्राद्या। इत्या गतीः।। धियोऽन्तःकरणवृत्तीः। विज्ञातव्यं तासां विषयः। कामानिच्छाविशेषान्। अन्यत्रन्नवस्वपि पर्यायेषु वाक्पर्यायवद्व्याख्येयम्।

विष्णुवेदाख्ययतिव्याख्या

एवं सर्वत्र प्राणं मे इत्यादिषु दशसु योज्यम्। तत्र विशेषोऽस्ति । वाक्प्राण-चक्षुःश्रोत्रेष्विन्द्रियाण्येवोच्यन्ते। अन्येषु षट्स्विन्द्रियकार्याणि न जिह्वादीनि। अन्नरसान् कर्माणि सुखदुःखे आनन्दं रतिं प्रजातिः इत्याः धियः विज्ञातव्यं कामानिति।

शयानस्योपरि पितुः शयानेदमुच्यते।
प्रदक्षिणीकृत्य पुरस्तिष्ठन्तमिदमीरयेत्।

दक्षिणावृत् प्राङुपनिष्क्रान्तं पितानुमन्त्रयते यशोब्रह्मवर्चसमित्यादिना अशक्तश्चेत् पुत्रैश्वर्ये पिता वसेत्।

Sri Venkateswara Vedic University

अथ दक्षिणावृत्प्राङ्पनिष्क्रामति। तं पिताऽनुमन्त्रयते। यशो ब्रह्मवर्चसमन्नाद्यं कीर्तिस्त्वा जुषतामिति। अथेतरः सव्यमंसमन्ववेक्षते। पाणिनाऽन्तर्धाय वसनान्तेन वा प्रच्छाद्य। स्वर्गाल्लोकान्कामनान्पुहीति। स यद्यगदः स्यात्।

दीपिका

अथानन्तरम्। दक्षिणावृत्पितुः प्रदक्षिणप्रकारेण प्राङ्प्राच्यां दिशि उपनिष्क्रामति पितुः समीपदेशान्निर्गच्छति। तं पुत्रं पिता जनकः, अनुमन्त्रयते पश्चात्संबोध्य ब्रूते अनुमन्त्रणवाक्यमाह– यशो लौकिकी बन्धुजनादिभिः कीर्तिः। ब्रह्मवर्चसं ब्रह्मतेजः। अन्नाद्यमन्नं च तदाद्यं चान्नाद्यम्। कीर्तिः शास्त्रीयं यशस्त्वा त्वां पुत्रं जुषतां सेवताम्। इत्यनेन प्रकारेणानुमन्त्रयत इत्यन्वयः। अथैतदनुमन्त्रणानन्तरम्। इतरः पुत्रः सव्यं वाममंसं बाहुमूलं स्वस्यान्ववेक्षते पश्चादवलोकयते।।

अवलोकनप्रकारमाह पाणिना करेणान्तर्धाय व्यवधाय वसनान्तेन वा, वाशब्दः पूर्वेण सहेच्छाविकल्पार्थः। प्रच्छाद्याऽऽच्छाद्य पितरं प्रत्याह। स्वर्गाल्लोकान्निरतिशयप्रीतिजनकान्देशविशेषान्कामान्कमनीयांस्तत्र स्थितान्भोगान्वाऽऽप्नुहि प्राप्नुहि। इत्यनेन प्रकारेण ब्रूयादित्यनुषङ्गः। एवं पुत्रेण कृते स पिता यदि कथंचिदगदः स्यान्नीरोगो भवेत्। पुत्रस्य तनयस्यैश्वर्ये विभूतौ पिता जनको वसेन्निवासं कुर्यात्प्रवासिवद्गृहकार्यं किमपि नानुसंदध्यादित्यर्थः। परि वा व्रजेत्। वाशब्दः पक्षान्तरार्थः। यदि वैराग्यं तदा परिव्रजेत्सर्वसङ्गपरित्यागं

विष्णुवेदाख्ययतिव्याख्या

कर्तव्यक्रतुसंत्यागादाश्रमित्वव्युदासतः।
परिव्रजेद्वा। परिव्राड् वा भवेदिच्छन्नाश्रमत्रयसंग्रहः।

परिष्कारः

अत्र निःश्रेयसादनस्योक्तस्यानूक्तिदर्शनात्।।
चतुरध्यायरूपेण गणनात् सकलैरिह।

Sri Venkateswara Vedic University

पुत्रस्यैश्वर्ये पिता वसेत्। परि वा व्रजेत्। यद्यु वै प्रेयात्। यदेवैनं समापयति। तथा समापयितव्यो भवति तथा समापयितव्यो भवति।। १०।।

इति ऋग्वेदान्तर्गतकौषीतकिब्राह्मणारण्यकोपनिषदि द्वितीयोध्यायः।।२।।

कौषीतकिब्राह्मणारण्यकक्रमेण सप्तमोऽध्यायः।। ७।।

दीपिका

कुर्यादित्यर्थः। यद्यु वा अपि कथंचित्प्रसिद्धं प्रेयात्परलोकं गच्छेत्। यदेव प्रसिद्धमेव वागादिकं न त्वन्यत्। एनं पुत्रं प्रति समापयति सम्यक्प्रापयति। तथा तद्वदेव समापयितव्यो भवति सम्यक्प्रापणीयो भवति। सर्वैः कामैरिति शेषः। तथा समापयितव्यो भवति। व्याख्यातम्। वाक्याभ्यासोऽध्यायपरिसमाप्त्यर्थः।। १०।।

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य शंकरानन्द भगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां द्वितीयोऽध्यायः।। २ ।।

विष्णुवेदाख्ययतिव्याख्या

यदि प्रेयात्तदैनं समापयति यथा तथा समापयितव्यो भवति।।

इति द्वितीयोऽध्यायः।

परिष्कारः

अभाषितोऽपि व्याख्याय घटितो मध्यपात्ययम्।।

इति कौषीतक्युपनिषदि द्वितीयाध्यायपरिष्कारः।

Sri Venkateswara Vedic University

अथ तृतीयोऽध्यायः।

* *मनुष्यहिततमं प्रज्ञात्मप्राणोपासनम्* *

ओम् प्रतर्दनो ह दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण

दीपिका

यस्याः हेतोः पर्यङ्कोपासना प्राणोपासना च विविधगुणोक्ता तां ब्रह्मविद्यां विवक्षुस्तस्यामास्तिक्यं जनयितुं प्रतर्दनं काश्यं देवेभ्योऽप्यधिकबलं लक्ष्म्यादिमन्तं ब्रह्मविद्यार्थिनं शिष्यं देवराजं च सत्यपाशनिबद्धं मनुष्येषु ब्रह्मविद्यां वक्तुमनिच्छन्तमपि गुरुं संपाद्याऽऽख्यायिकामाह प्रतर्दनः प्रकर्षेण तर्दयति भर्त्सयत्यभिभवति स्वशत्रूनिति सार्थकनामा प्रतर्दनः। ह किल। दैवोदासिर्दिवोदासस्य काशिराजस्य पुत्रो दैवोदासिः। इन्द्रस्य देवराजस्य परमैश्वर्यसंपन्नस्य। प्रियं धाम प्रियं स्थानं स्वर्गमिति यावत्। उपजगाम प्राप्तवान्।।

विष्णुवेदाख्ययतिव्याख्या

अथ निर्गुणवाक्यस्य तात्पर्यमभिधीयते।
पूर्वं सगुणवाक्येषु यदुक्तं ब्रह्म शाश्वतम्।
तस्यैव निर्गुणत्वेन प्रतिपत्तिरिहेष्यते।
अथवा शास्त्रमत्रोक्तं सर्वमेकत्वबोधकम्।

प्रकाशिका

प्रतर्दनो.... पौरुषेण च। दिवोदासस्यापत्यं दैवोदासिः। नाम्ना प्रतर्दनः युद्धसाधनबलेन शौर्येण च युक्तः इन्द्रस्य प्रियं स्वर्गं उपगतः इत्यर्थः।।

परिष्कारः

प्राणेन्द्रशरीरकपरमात्मोपासनरूपा प्रतर्दनविद्या प्रस्तूयते। अस्याः फलं चिरायुष्ट्वचिरकालस्वर्गस्थितिपूर्वकमोक्षप्राप्तिरिति सप्तदशे वाक्ये वक्ष्यति। युद्धेन च पौरुषेण चेत्यत्र चकारबलात् एकरूपस्तृतीयार्थो वाच्य इति गम्यते। तत्र युद्धरूपप्रयोजनायेत्यर्थविवक्षा चेत् अन्नेन वसतीत्यत्रेव क्रियते, तदा पौरुषरूपप्रयोजनायेति पौरुषेणेत्यनेन विवक्षणीयम्। तदन्वयश्च न समञ्जसः।

च। तं हेन्द्र उवाच। प्रतर्दन वरं ते ददानीति। स होवाच प्रतर्दनः। त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति। तं हेन्द्र उवाच। न व

दीपिका

तत्प्राप्तौ कारणमाह युद्धेन च पौरुषेण च समरयज्ञेनानेकभटपश्वाहुति-दीप्यमानशस्त्राग्निना पुरुषसंबन्धिनोत्साहेन च स्वर्गमर्मपरिज्ञानेनेत्यर्थः। चकारावुभयोरपि कारणत्वसमुच्चयार्थौ। तं समरशौण्डमुत्साहिनं स्वर्गमागतं प्रतर्दनम्। ह किल। इन्द्रो युद्धपौरुषाभ्यां परितोषं प्राप्तो देवराजः। उवाचोक्तवान्।।

इन्द्रोक्तिमाह प्रतर्दन हे प्रतर्दन। वरमभिलषितमर्थम्। ते तुभ्यं प्रतर्दनाय मत्परितोषकारिणे। ददानि प्रयच्छानीत्यर्थः। इत्यनेन प्रकारेणोवाचेत्यन्वयः। स इन्द्रेणोक्तः। ह किल। उवाच प्रतर्दनः। स्पष्टम्।।

प्रतर्दनोक्तिमाह त्वमेव मत्पुरतः स्थितो हिताहितज्ञो देवराजो न त्वन्यः। मे मह्यं प्रतर्दनाय हितार्थिने मदर्थमित्यर्थः। वृणीष्व हितमिष्टमात्मने च प्रार्थयस्व।।

विष्णुवेदाख्ययतिव्याख्या

तेनापि सर्वशास्त्राणामन्तर्भावोऽत्र जायते।
मामेवेति वचः प्रोक्त्वा प्राणोऽस्मीत्युक्तवान् पुनः।
प्रतर्दनस्य ज्ञानार्थं तेनेयमवसीयते।

इति व्याख्यानात् सर्वमवगन्तव्यम्। प्रतर्दनो नाम दैवोदासिरेकदा इन्द्रस्य धामोपजगाम। इन्द्रोऽस्य स्वकर्मणि निष्ठां दृष्टवान् युध्देन पौरुषेण च। स तं प्रतर्दनमिन्द्रि उक्तवान् हे प्रतर्दन ते वरं ददानीति।

प्रकाशिका

तं... ददानीति। स्पष्टोऽर्थः।।

परिष्कारः

अतः सहयोगे तृतीयामेव स्वीकृत्य युद्धेनेत्यस्य युद्धसाधनबलेनेत्यर्थे लक्षणा स्वीकृता। तत्र देवासुरयुद्धस्य प्रसक्तत्वात् स्वस्य च पौरुषवत्त्वादस्मात् हेतुद्वयादयं प्रार्थितो जगामेत्यर्थेऽपि न दोषः। 'युद्धेन पुरुषकारेण च कारणेन' इति अद्वैतिटीका।।१।।

Sri Venkateswara Vedic University

वरोऽवरस्मै वृणीते। त्वमेव वृणीष्वेति। अवमवरो वै किल म इति होवाच प्रतर्दनः। अथो खल्विन्द्रः सत्यादेव नेयाय। सत्यं हीन्द्रः। स

दीपिका

प्रार्थ्यमानवरमाहं यं प्रसिद्धमभीष्टमर्थं त्वं सर्वज्ञो देवराजः। मनुष्यायाज्ञानान्तरवर्तिनेऽनेकशुभाशुभव्यामिश्रफलदावग्निसंतप्तगात्राय मनुष्यजातियुजे। हिततममतिशयेन हितं नातः परं हितमित्यर्थः।

मन्यसे निश्चिनोषि। इति, अनेन प्रकारेण। तमिन्द्रं प्रत्येवंवादिनं प्रतर्दनम्। ह किल। इन्द्रो देवराजो ब्रह्मविद्याज्ञानावृतदृष्टिनाऽयाचितं परोक्त्या तर्हि किल निश्चितं दातुमशक्तः। उवाचोक्तवाँल्लौकिकं नयम्।।

विष्णुवेदाख्ययतिव्याख्या

स प्रतर्दनस्तमिन्द्रमुवाच त्वं मत्तस्तं वरं वृणीष्व त्वं यं वरं मनुष्याय हिततमं मन्यसे तं वृणीष्व। तमिन्द्र उवाच वरः परस्मै न वृणीते तस्मात्त्वमेव वृणीष्व। त्वमस्मत्त अवर इत्युवाच प्रतर्दनः। श्रुत्या इन्द्रः स्तूयते। इन्द्रः सत्यादेव न इयाय।

प्रकाशिका

स... मन्यसे। सर्वज्ञस्त्वं यं वरं मनुष्याय मे हिततमं मन्यसे, (तं?)त्वमेव वृणीष्व; नाहमज्ञः स्वहिततमं वरं वेद्मीति।।

तं... वृणीष्वेति। न ह्यन्योऽन्यार्थं वरं वृणीते। अतः त्वदभिलषितं वरं त्वमेव मत्तो वृणीष्वेत्यर्थः।। **अवरो.... प्रतर्दनः।** यदि हि त्वयाऽपि न व्रियते, तर्हि मम हिततमस्य वरस्यापरिज्ञानात् वराभाव एव प्राप्त इति प्रतर्दन इन्द्रमुवाचेत्यर्थः।।

परिष्कारः

वृणीष्वेति। अपेक्षस्वेत्यर्थः। परस्मिन् प्रार्थनेत्यस्य दुर्वचत्वात्। परः – दातैव। अवर इति। इदमिति विशिष्य मत्प्रार्थनानिरपेक्षं देहीति मद्वरादानमेव ते आपतितमित्यप्यर्थः, उत्तरानुसारात्।

Sri Venkateswara Vedic University

होवाच। मामेव विजानीहि। एतदेवाहं मनुष्याय हिततमं मन्ये। यन्मां

दीपिका

इन्द्रोक्तिमाह न वै वरोऽवरस्मै वृणीते। वै प्रसिद्धमवरस्मा अन्यार्थं वरो वरं न वृणीतेऽन्यो न प्रार्थयते। यत एवमतः स्वार्थं वरं त्वमेव वृणीष्वेति। स्पष्टम्। एवमिन्द्रेणोक्तः। अवरः। वरं ददानीति प्रतिज्ञाय भवता निर्दिष्टोऽर्थोऽदत्तः स्यादिति शेषः। वै प्रसिद्धो मनुष्याय मे मह्यं हिताहितज्ञानशून्याय। इति होवाच प्रतर्दनः किल। एवमुक्तवान्प्रतर्दनो देवराजानं स्वार्थो वरोऽयमिति। अथो, अथ प्रतर्दनवाक्यानन्तरम्। खलु निश्चितम्। इन्द्रः सत्यवादिनामग्रगण्यो देवराजः। सत्याद्वरं ते ददानीति स्वप्रतिज्ञाताद्यर्थवचनात्। एव नेयाय नापजगामैव। प्रतर्दनार्थं वरदाताऽपि स्वयं स्वस्मै वरं याचितवान्न तु लौकिकं नयमङ्गीचकारेत्यर्थः।।

सत्यादनपगमने कारणमाह सत्यं हीन्द्रः सत्यं यथार्थस्वरूपं यत्किंचिद्वागर्थस्वरूपम्। इन्द्रो देवराजो हि यस्मात्तस्मान्नेयायेत्यन्वयार्थः। स सत्यपाशनिबद्ध इन्द्रः। ह किल। उवाचोक्तवान्। प्रतर्दनार्थमात्मानं वरं याचितवानित्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

इन्द्रः सत्यरूपो यतः । तत इन्द्रः प्रतर्दनस्य ब्रह्मज्ञानार्थमिदमुवाच मामेव विजानीहीति।

सर्वशास्त्रफलं तस्य न भवेद्यदि वाक्यतः।
सर्वशास्त्राणि स ब्रूयात् स्वात्मनो हि यथा पुरा।

प्रकाशिका

अथो...नेयाय। एवमुक्त इन्द्रः, ते वरं ददामीति सत्याद्वाक्यात् नापेतः।। तत्र हेतुमाह सत्यं हीन्द्रः। इन्द्रस्य सत्यप्रधानत्वादित्यर्थः। ततश्च वरं ददानीति मदुक्तं वाक्यमसत्यं मा भूदित्यमन्यतेत्यर्थः। केचित्तु–सत्या देवतेयाय सत्यं हीन्द्र इति पाठे, तं हेन्द्र उवाचेति शेषः। वचनप्रकारमेवाह–सत्या देवतेयाय सत्यं हीन्द्र इति। सत्या देवता सत्यवाक्या परमात्मरूपा देवता त्वामियाय त्वामविष्टवती।

Sri Venkateswara Vedic University

विजानीयात्। त्रिशीर्षाणं त्वाष्ट्रमहनम्। अरुन्मुखान्यतीन्सालावृकेभ्यः

दीपिका

अद्वैतोपक्रम इन्द्रोक्तिमाह मामेवास्मत्प्रत्यये व्यवहारयोग्यमानन्दात्मानमेव न त्वन्यम्। विजानीह्यवगच्छ साक्षात्कुर्वित्यर्थः। एतदेव मज्ज्ञानमेव न त्वन्यत्। अहं भवते वरस्य दाता याचिता च । मनुष्याय हिततमम्। व्याख्यातम्। मन्ये निश्चिन्वे।

एतच्छब्दार्थमाह यत्प्रसिद्धं वेदान्तेषु 'ब्रह्मविदाप्नोति परम्' इत्यादिना। मामुक्तमानन्दात्मानं विजानीयात्साक्षात्कुर्यादित्यर्थः। यन्मां विजानीयादेतदेव हिततमं मन्य इत्यन्वयः।

ननु किं त्वद्विज्ञानेन तवान्यस्माद्यदि कश्चनातिशयो भवेत्तर्हि तद्धिततमं न त्वन्यथेति शङ्कायामद्वैतज्ञानं गुरुमातृवधप्रमुखपापोन्मूलकमित्याह त्रिशीर्षाणां त्रिशीर्षम्। त्वाष्ट्रं त्वष्टुरपत्यं विश्वरूपम्। अहनं निपातितवान्। अरुन्मुखान्, रुच्छब्दो वेदाध्ययनं तेनोपनिषदर्थविचारो ब्रह्ममीमांसापरपर्यायो लक्ष्यते स येषां मुखे नास्ति तेऽरुन्मुखास्तान्। यतीन्प्रयत्नवतश्चतुर्थाश्रमिणः. सालावृकेभ्यः

विष्णुवेदाख्ययतिव्याख्या

सर्वशास्त्रात्मकं ह्येतत् वाक्यं तेन प्रतीयते। मत्स्वरूपज्ञानं मनुष्याय हिततमं मन्ये ब्रह्मभूतं मां विजानीयादिति यत्। इन्द्र आत्मानं स्तौति । अहं त्रिशीर्षाणं त्वाष्ट्रं ब्राह्मणमहनम्। यतीनरुन्मुखान् व्याघ्रमुखान्। दिवि बह्वीः सन्धा अतिक्रम्य

प्रकाशिका

प्रयुक्तवानिति भावः। परमात्मनः सत्यवाक्यत्वप्रसिद्धिं दर्शयति सत्यं हीन्द्र इति। इन्द्रः परमात्मेत्यर्थः- इति वदन्ति।। स होवाच....विजानीयात्। यदि ते हिततममुपदेष्टव्यम्, तर्हि मदुपासनमेव हिततमं मोक्षसाधनमिति मन्मतम्। अत इतरत् परित्यज्य मामुपास्वेत्यर्थः। अतः(त्र?) प्रसिद्धजीवभावस्येन्द्रस्य हिततमत्वलक्षणमोक्षसाधनत्वाश्रयोपासनकर्मत्वासंभवात् मामिति शब्दः स्वात्मभूतं परमात्मानमभिदधाति।(अतः?), 'य आत्मनि तिष्ठन्', 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा' इति शास्त्रेण, 'स्वस्याप्यात्मभूतः परमात्मा; अहंबुद्धिशब्दाश्च

Sri Venkateswara Vedic University

प्रायच्छम्। बह्वीः संधा अतिक्रम्य दिवि प्रह्लादीयानतृणमहमन्तरिक्षे

दीपिका

सालावृकाणामपत्यानि सालावृकाः सालावृकेया इति यावत्। तेभ्य आरण्याश्वभ्य इत्यर्थः। प्रायच्छं प्रकर्षेण वज्रेण शतधा विभज्य दत्तवान्। अद्यापि च तेषां मस्तकविपाकाः करीरा दृश्यन्ते। बह्वीर्भूयसीः स्वरूपतः संख्यातश्च। संधाः संधीनित्यर्थः। अतिक्रम्य त्यक्त्वा दिवि स्वर्गे। प्रह्लादीयान्प्रह्लादिनः प्रह्लादेन नित्यसंबन्धिनः।अनेककोटिसंख्याकान्माहामायाननेकच्छिद्रघातिनोऽसुरान्प्रह्लाद-परिचारकानित्यर्थः। अतृणं हिंसितवान्। अहमात्मज्ञानीन्द्रस्तुभ्यं वरस्य दाता। अन्तरिक्षे भुवर्लोके। पौलोमान्पुलोमसंबन्धिनोऽसुरविशेषान्। बह्वीः संधा अतिक्रम्यातृणमित्यनुवर्तते वक्ष्यमाणे च। पृथिव्यां भूलोके च। कालखाञ्जान्कालखञ्जसंबन्धिनोऽसुरान्भूयांसः परस्परसंबन्धस्यावश्यंभावित्वात्। कालखञ्जा एव कालखाञ्जास्तान्।।

विष्णुवेदाख्ययतिव्याख्या

प्रह्लादीनतृणमहनम्। एवं त्रिषु लोकेषु सर्वानहनम्। एवंभूतस्य मे ब्रह्मवधादिदोषात् तत्र लोमापि न मीयते ब्रह्मभूतोऽहमिति। एवं भूतं मामन्यो यो विजानीयात्तस्य

प्रकाशिका

परमात्मपर्यन्ताः' इति जानत इन्द्रस्य स्वात्मभूते परमात्मनि मामिति शब्दप्रयोगे नानुपपत्तिः। ननु स्वायत्ते शब्दप्रयोगे असन्दिग्धं परमात्मवाचकमेव पदं प्रयुज्यताम्। किं न्यायलभ्यपरमात्मपर्यवसानेन मामिति शब्देनेति चेत्– स्यादेवम्, यदि परमात्मस्वरूपमात्रोपासनं विधित्सितं स्यात्। अपि तु स्वशरीरकतया। अतो मामिति निर्देशः उपपद्यते।।

तत्क्रतुन्यायेन स्वोपासकस्य पापाश्लोषं वक्तुं स्वस्य पापाश्लोषं दर्शयति **त्रिशीर्षाणम्...अहनम्।** त्रिशिरस्कं त्वष्टृपुत्रं विश्वरूपं हतवानस्मि।।

परिष्कारः

अतो मामिति निर्देश उपपद्यत इति। मदन्तर्यामिणमिति स्पष्टनिर्देशोऽस्तु इति

Sri Venkateswara Vedic University

पौलोमान्। पृथिव्यां कालखाञ्जान्। तस्य मे तत्र नलोम च मा मीयते। स यो मां विजानीयात्। नास्य केन च कर्मणा लोको मीयते। न

दीपिका

ननु किं प्रकृत इत्यत आह तस्य गुरुब्राह्मणवधस्य कर्तुः संन्यासिनां च श्वभ्यो दातुर्लोकत्रयेऽपि यज्ञादिसंपन्नमहामायासुरसंघस्योपसंहर्तुरात्मज्ञानिनोऽन्येन मनसाऽपि कर्तु मशक्यं कुर्वतो मे ममेन्द्रस्य तवोपदेशकस्य। तत्र तस्मिन्नतिक्रूरे कर्मणि क्रियमाणे ब्रह्मवधादिलक्षणे। न लोम च मा मीयते। नलोमापि। अल्पोऽपि केश इत्यर्थः। मा मीयते न हिंस्यते। उक्तेन केनचित्कर्मणाऽधिकारिशरीरवानिति त्रैलोक्यस्थापनायेदं कृतवानहमिति हृदयम्।।

नन्वेतद्भवत एव न त्वस्मदादेरित्यत आह स मदन्यो मज्ज्ञानी प्रसिद्धः। यो यः कश्चिद्देवो मनुष्यो वा। मामानन्दात्मानमिन्द्रियम्। विजानीयादहमिन्द्रोऽस्मीति साक्षात्कुर्यात्। नास्य केन च कर्मणा लोको मीयते।

विष्णुवेदाख्ययतिव्याख्या

केनापि कर्मणा ब्रह्मवधादिना पापं चक्रुषोऽस्य मुखान्न नीलं वेति इत्युक्त्वा पुनरुवाच। अहं प्रज्ञात्मा प्राणोऽहम्। प्राणो हि परमात्मेति भाष्ये भाषितं न मुख्यप्राणादयः

प्रकाशिका

अरुन्मुखान्....प्रायच्छम। रौतीति रुत् वेदः। रुत् मुखे न विद्यते येषां ते अरुन्मुखाः। वेदान्तविमुखान् यतीन् वनश्वविशेषेभ्यः स्वादनाय प्रायच्छम्।।

बह्वीः..अतृणहम्। न हनिष्यामीति कृता बह्वीः प्रतिज्ञा अतिक्रम्य दिवि वर्तमानान् प्रह्लादपुत्रान् अतृणहम्। तृण (तृदिर?) हिंसायाम्, इति हि धातुः। अन्तरिक्षे पौलोमान् पुलोमसुतान्, पृथिव्यां कालकञ्जाख्यासुरांश्च हिंसितवानस्मि।।

परिष्कारः

न च, 'स म आत्मेति विद्यात्' इति वक्ष्यमाणपरमात्मोपासनैकदेशभूतं मामिति स्वात्मोपासनमात्रमेवात्रेन्द्रेणोच्यतामिति वाच्यम्– तन्मात्रोपासनस्य हिततमत्वायोगात्।।

Sri Venkateswara Vedic University

मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया। नास्य पापं चन चकृषो

दीपिका

अस्य मामानन्दात्मानं साक्षात्कुर्वतः केन च वक्ष्यमाणेन भ्रूणहत्यादिना कर्मणा पातकेन शास्त्रनिषिद्धेन व्यापारेण लोकः कृतस्य करिष्यमाणस्य च सुकृतस्य फलमुदर्कं न मीयते न हिंस्यते।।

हिंसकानि कर्माण्येव दर्शयन्नाह न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया। मातापितरौ प्रसिद्धौ तयोर्वधो लोकद्वयभ्रंशहेतुः प्रत्येकं प्रसिद्धः। स्तेयं सुवर्णपरिमितसुवर्णस्य ततोऽप्यधिकस्य वा स्वामिनः परोक्षमादानं तेन। भ्रूणो वेदस्य वेदयोर्वेदानां वाऽधिगमेनाध्ययनेन सह वर्तमानो द्विजोत्तम इत्यर्थः। तस्य मनसा वाचा कर्मणा वाऽपराधशून्यस्य स्वहस्तादिना वधो भ्रूणहत्या। तथा कर्मसामान्यस्य विशेषोऽयमिति दर्शयितुं पर्यायचतुष्टयेऽपि नकारचतुष्टयम्। नास्य पापं चन चकृषो मुखान्नीलं वेतीति।

विष्णुवेदाख्ययतिव्याख्या

न देवतात्मा न जीवः आनन्दोऽजरोमृत इत्यादि– दर्शनात्। आनन्दादि अन्येषां न संभवति।

ब्रह्मणो वाचकं ह्येतत् वाक्यं प्रज्ञात्मरूपिणः।

प्रकाशिका

तस्य....अमीयत। एवं हिंसितवतो मे लोमापि नाहिंस्यत; ब्रह्मविद्याप्रभावादित्यर्थः।।

परिष्कारः

त्रिशीर्षाणं त्वाष्ट्रमहनमिति। विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्त्रीयोऽसुराणाम्। तस्य पुरोहितस्य ब्राह्मणस्य वधे ब्रह्महत्यादोषेण भाव्यम्। तदश्लोषो विद्याबलात्।।

रौतीति। वक्ति मानान्तरागोचरपरमार्थादिकमिति रौतीत्यस्यार्थः। किमिति यतीनां साधूनां मारणमित्यत्र अरुन्मुखत्वादिति हेतुवर्णनमिदम्। पापप्रयोजककारस्तु यतित्वमेव।।

Sri Venkateswara Vedic University

मुखान्नीलं वेतीति। स होवाच। प्राणोऽस्मि प्रज्ञात्मा। तं मामायुर-मृतमित्युपास्स्व आयुः प्राणः। प्राणो वा आयुः। प्राण एवामृतम्।

दीपिका

किं बहुनाऽस्य मदात्मज्ञानिनः पापं चन चकृषः पापमपि कर्तुमिच्छोर्मुखाद्वदनान्नीलं मुखकान्तिस्वरुपं नीलं नीलिमाश्रयस्वरूपं वा मुखात्कण्ठजिह्वावदनान्न वेति न व्येति नापगच्छति। इतिशब्दः प्रकृतब्रह्मज्ञानस्तुतिपरिसमाप्त्यर्थः।

एवं ब्रह्मज्ञानं स्तुत्वाऽऽत्मनो ब्रह्मणः स्वरूपं विवक्षुः स इन्द्रः। ह किलोवाचोक्तवान्। प्राणः प्राणशब्दाभिधेयः प्राणोपाधिको वा। अस्मि भवामि। प्रज्ञात्मा बुद्धिवृत्तिप्रतिफलितः प्रज्ञानैकस्वभावः। तं प्राणप्रज्ञात्मस्वरूपम्।

प्रकाशिका

स यो मां...नीलं वेति। य एतादृशमदात्मानं परमात्मनमुपास्ते, तस्य केनापि कर्मणा मातृवधपितृवधस्तेयभ्रूणहत्यादिलक्षणेन परलोकप्राप्तिर्न विरुद्ध्यते। एवं पापं कृतवतोऽपि, मया ईदृशं पापं कृतम् इति निर्वेदजनितमुखवैवर्ण्यमपि नास्तीत्यर्थः। चकृष इति तु क्वसन्तात् षष्ठी।।

परिष्कारः

स यो मामिति वाक्यं त्वाष्टहननादिकर्तृत्वसमानाधिकरणपापाश्लिष्टत्व-शालीन्द्रशरीरकपरमात्मोपासनपरम्। ननु मातृवधेनेत्याद्युक्तमघं किं विद्यापूर्वभावि, उतोत्तरभावि। नाद्यः सञ्चितानन्तपापप्रणाशकत्वाद् विद्यायाः कतिपयपापमा-त्रनिर्देशेऽनौचित्यात्। उत्तराघविषयत्व एव वाक्यस्वारस्याच्च। नान्त्यः; प्रामादिकमा-त्रोत्तराघश्लेषस्यैव श्रीभाष्ये भाषितत्वेन तद्विरोधादिति चेन्न– अत्र भाष्ये पापाश्लेषपदप्रयोगेणोत्तराघविषयत्वस्य सूचितत्वात्। परविद्यायाः प्रामादिकमात्रा-श्लेषहेतुत्वमुत्सर्गः। क्वचित् वचनबलात् बुद्धिपूर्वपापाश्लेषकरत्वमपि। यथा पञ्चाग्निविद्यानिष्ठविषये पातकिसंसर्गस्य दोषानापादकत्वं(५.१०) छान्दोग्ये, 'य एतानेवं पञ्चाग्नीन् वेद, न स ह तैरप्याचरन् पाप्मना लिप्यते' इति– तथेह मातृवधादिसर्वदोषाश्लेषोऽपीति।। १३।।

Sri Venkateswara Vedic University

यावद्ध्यस्मिञ्शरीरे प्राणो वसति[१] तावदायुः। प्राणेन ह्येवामुष्मि-

दीपिका

मामानन्दात्मानमिन्द्रम्। आयुः सर्वप्राणिनां जीवनकारणं प्राणापानव्यतिरिक्तं प्राणापानयोराश्रयभूतम्। अमृतं मरणशून्यं षड्भावविकारशून्यमित्यर्थः। इति प्राणः प्रज्ञात्मेन्द्र आयुरमृतमस्मीत्यनेन रूपेण। उपास्स्व यावदात्मसाक्षात्कारं विजातीयप्रत्ययशून्यसजातीयप्रत्ययप्रवाहं कुरु।। नन्वेकस्यैव भवत इन्द्रस्य प्राणः प्रज्ञात्माऽयुरमृतमिति गुणाः किमित्याशङ्क्य नेत्याह आयुरुक्तं यत्स प्राण उक्तः।।

नन्वायुषः प्राणत्वेऽपि न प्राणस्याऽऽयुष्ट्वं यथा सास्नाया गोत्वेऽपि न गोः सास्नात्वमित्यत आह प्राणो वा आयुः प्राण एवाऽऽयुः। न त्वङ्गाङ्गिगुण्यादिभेदः।। न त्वेतदायुष एव किं त्वमृतत्वस्यापीत्याह प्राण एवामृतं न जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यति च। अमृतमपि प्राण एव।।

विष्णुवेदाख्ययतिव्याख्या

वाच्यवाचकयोरैक्ये वाक्ये भेदाः प्रतिष्ठिताः।
तेनापि सर्वशाखासु वाक्यमेतदपीष्यताम्।
स्वाध्यायधर्मपाठादि यदुक्तमधिकारिणः।
विशेषणमिहाचार्यैस्तदिहापि समं भवेत्।
सर्वशाखागतं ह्येतत् सर्वशास्त्रात्मकं तथा।
मन्दाधिकारिणो यस्य न स्यादुक्तं विशेषणम्।

प्रकाशिका

एवं चेतनविशेषरूपस्वविशिष्टपरमात्मोपासनमुक्त्वा अचेतनविशेषरूपप्राण-विशिष्टोपासनमाह **स होवाच...उपास्स्व** प्रज्ञारूप आत्मा प्रज्ञात्मा जीवः। जीवशरीरक इत्यर्थः। जीवशरीरकोऽहम्। प्राणोऽस्मि—प्राणशरीरकोऽहमस्मि। तादृशं प्राणशरीरकं माम् आयुरमृतमित्युपास्स्व।। १ ।।

१.भवति इति विष्णुवेदाख्ययति पाठः

Sri Venkateswara Vedic University

ल्लोकेऽमृतत्वमाप्नोति।। १ ।।

दीपिका

प्राणस्याऽऽयुष्ट्वममृतत्वं चोपपादयति यावत्, यावन्तं कालम्। हि यस्मात्। अस्मिन्प्रत्यक्षे शरीरे शीर्णावयवे कलेवरे। प्राणो वसति तावदायुः, तावत्तावन्तं कालम्। स्पष्टमन्यत्।। इदानीममृतत्वमुपपादयति प्राणेन ह्येव हि यस्मात्प्राणेनैव न तु शरीरेणापि। अमुष्मिन्परोक्षे लोके स्वर्गादौ। अमृतत्वं सुखम्। आप्नोति स्पष्टम्।। १ ।।

विष्णुवेदाख्ययतिव्याख्या

तस्यैतदेव वक्तव्यमेतत् सर्वात्मकं यतः।
वामदेवोऽप्यनेनैव वाक्येन ब्रह्म दृष्टवान्।
इत्यादि सर्वं व्याख्यानादवगन्तव्यम्।
सतो विष्णुमयत्वेन सर्वात्मत्वं स दृष्टवान्।

इत्येवमन्तेन व्याख्यानेन गरुडस्य ब्रह्मात्मत्वं यज्ञमयत्वं च चित्याग्निमयत्वं च सर्वमहं मनुरित्यादेर्मन्त्रस्य सूक्तद्वयस्यार्थोऽप्यवगन्तव्यः। किमर्थमेतदित्यत आह गरुडोऽपि प्राणोऽस्मि प्रज्ञात्मेत्यनेन वाक्येन ब्रह्म दृष्टवान्।

ततः सर्वासु शाखासु वाक्यमेतदपीष्यताम्।
एतद् वाक्यं न केवलं कौषीतकिब्राह्मण एव।
काण्वशाखी यतोऽनेन दृष्टवान् ब्रह्म शाश्वतम्।
सर्वात्मत्वं तथा तस्य जायतेऽद्भुतरूपिणः।
तथा तद्दर्शयिष्यामि वाक्यान्यालोच्य यत्नतः।
सर्वं खल्विति वाक्येन सर्वात्मत्वं यथोदितम्।
इत्यादि सर्वं व्याख्यानादवगन्तव्यम्।
तं मामिति गिराप्यत्र ज्ञानमेव विवक्षितम्।।

तमेवंभूतं मामायुरमृतमित्युपास्स्व इत्युक्तवानिन्द्रः। आयुरिति प्राण उच्यते।

Sri Venkateswara Vedic University

विष्णुवेदाख्ययतिव्याख्या

प्राणोऽप्यायूरूपः। अमृतरूपश्च प्राणः। अन्योन्यसंबन्ध उच्यते। फलोक्तिरपि तस्यैव स्तुत्यर्थमिह वर्ण्यते।। १ ।।

प्रकाशिका

कथं प्राणशरीरकस्यायुष्ट्वामृतत्वे इत्याशङ्क्याह आयुः....आप्नोति। शरीरे प्राणस्थितेरुच्छ्वासादिलक्षणायुस्साधनत्वादायुः प्राणः। लोकान्तरे चिरस्थायित्वरूपामृतत्वप्राप्तेः प्राणाधीनोपायानुष्ठानसाध्यत्वात् प्राणस्यामृतत्वम्। अत आयुष्ट्वामृतत्वे प्राणस्योपपद्येते। तद्द्वारा परमात्मनश्चोपपत्तेः आयुष्ट्वा-मृतत्वाभ्यां प्राणशरीरकब्रह्मण उपासनमुपपद्यते। यद्वा व्यासार्योक्तरीत्या तं मामायुरिति वाक्ये मामिति जीवविशिष्टतोच्यते आयुरिति प्राणविशिष्टता। 'आयुः प्राण' इति ह्यनन्तरमेव श्रवणात् आयुरमृतमिति स्वेन रूपेणावस्थितिः। अतः (एवञ्च) अस्मिन्नेव वाक्ये स्वेन रूपेण चिदचिद्विशिष्टतया च त्रिविधोपासनं विधीयते। अतो नोपासनात्रयविधिकृतवाक्यभेद इति द्रष्टव्यम्।।

परिष्कारः

आयुष्ट्वामृतत्वयोः प्राणद्वारैवोपास्ये समन्वयस्यात्र स्पष्टमवगमात् तथैव व्याख्याय व्यासार्यवर्णितमप्याह यद्वेति। अस्मिन् पक्षे, 'प्राणेन ह्यमुष्मिन् लोकेऽमृतत्वमाप्नोति' इति वचनम्, अमृतमित्युपास्स्वेत्युक्तामृतत्वोपपादनपरं नेष्टम्। किन्तु आयुः प्राण इत्युक्तायुष्ट्वोपपादनशेषतयैव प्राणे आयुष्ट्वामृतत्वयोः कथनपरं ग्राह्यम्। मुख्यप्राणस्य स्वपरिकरभूतेन्द्रियैःसह ऐश्वर्यरूपैहिकामुष्मिकसर्वपुरुषार्थप्रतिलम्भनायामुत्रा-प्यनुवर्तमानत्वात् प्राणेनामृतत्वमाप्नोतीत्युच्यते। मोक्षे प्राणस्याननुवृत्तेः जीवस्यैव तत्र भोग्यभोक्तृरूपेण स्थितेः प्रज्ञात्मेत्युक्तप्रज्ञारूपजीवग्रहणेन प्रज्ञया सत्यं संकल्पमेतीत्युक्तम्। वाक्यभेद इति। 'मामेव विजानीहि' इत्यत्र चिद्विशिष्टोपासनविधिः इह प्राणविशिष्टोपासनविधिरिति उपासनानां पृथक्पृथग्विधेनेत्यर्थः।। १।।

Sri Venkateswara Vedic University

* मुख्यप्राणस्य अमृतत्त्वोपासनम् *

प्रज्ञया सत्यं संकल्पम्। स यो ममाऽऽयुरमृतमित्युपास्ते। सर्वमायुरस्मिल्लोक एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके। तद्धैक आहुः। एकभूयं वै प्राणाः

दीपिका

ननु प्राणस्य क्रियाशक्तेर्भवतु किं प्रज्ञयेत्यत आह प्रज्ञया ज्ञानशक्तिरूपेण। सत्यं सत्यवचनं निष्प्रपञ्चं ब्रह्म वा। संकल्पमिदं मे स्यादित्येवं रूपं मनसः प्रचारमधिगच्छतीति शेषः।।

एवं प्रज्ञादीनामुपयोगमुक्त्वाऽऽयुष्ट्वामृतत्वोपासनयोः फलमाह स प्रसिद्ध उपासकः। यः कश्चिन्ममेन्द्रस्य। प्राणात्मना प्रत्यग्भूतमायुरमृतमिति व्याख्यातम्। उपास्ते स्पष्टम्। य उपास्ते स इत्यन्वयः। सर्वमायुरस्मिल्लोक एति निखिलं शतसंवत्सरमायुराप्नोति।। आयुरुपासनस्य फलमुक्त्वाऽमृतोपासनस्य फलमाह आप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके। क्षयरहितममृतत्वम्। स्पष्टमन्यत्।। प्रतर्दनः प्राणशब्दं श्रुत्वा प्राणानामिन्द्रियाणामेकत्वं स्वयमवगतं प्रसङ्गात्पृच्छति। तत्तत्र प्राणानामनेकत्वे सति, ह किल। एके केचिद्विद्वांसः। आहुः कथयन्ति। एकभूयं वै, एकभावमेव। प्राणा इन्द्रियाणि। गच्छन्ति स्पष्टम्। इत्यनेन प्रकारेणाऽऽहुरित्यन्वयः।।

विष्णुवेदाख्ययतिव्याख्या

संकल्पं प्रज्ञाया प्राण आप्नोति यः मामायुरमृतमित्युपास्ते। आयुरमृतोपासस्यफलमाह। आयुरित्युपासनेनास्मिन् लोके सर्वमायुराप्नोति। अमृतोपासनेनामुष्मिन् लोकेऽमृतत्वमाप्नोति। तत्रैक आहुः। प्राणश्चक्षुरादयः कथं विषयान् गच्छन्तीत्यत्र केचिदाहुः। सर्वे प्राणश्चक्षुरादय एकीभूत्वा विषयान्

प्रकाशिका

प्रज्ञात्मत्वविशिष्टोपासनस्य फलमाह **प्रज्ञया....एति।** अपहतपाप्मत्वादिगुणाष्टकविशिष्ट(त्व?) लक्षणं ब्र(ब्रा?)ह्मरूपमित्यर्थः।।

परिष्कारः

युगपत् सर्वेन्द्रियकार्यादर्शनात् पृथक्पृथगिन्द्रियाणां स्वस्वकार्ये असामर्थ्यावधारणात्

Sri Venkateswara Vedic University

गच्छन्तीति। न हि कश्चन शक्नुयात्सकृद्वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दं मनसा ध्यातुमिति। एकभूयं वै प्राणा एकैकमेतानि

दीपिका

प्राणानामेकभाव उपपत्तिं यां कथयन्ति तामाह—

न हि कश्चन शक्नुयात्। हि यस्मात्कोऽपि न शक्नुयात्। सकृदेकवारं युगपदित्यर्थः। वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दम्। वागिन्द्रियेण नाम वक्तुमिति शेषः। प्रज्ञापयितुमवगमयितुमवगन्तुमिति यावत्। एतच्चक्षुःश्रोत्राभ्यां संबध्यते। स्पष्टमन्यत्। मनसा ध्यातुं मनसा ध्यानं कर्तुम्। इत्यनेन प्रकारेणैकहेलया व्यापाराभावेन। एकभूयं वै प्राणाः। व्याख्यातम्। पुनरभिधानं निगमनार्थम्।।

विष्णुवेदाख्ययतिव्याख्या

गच्छन्तीति। कुतः तद्विशिनष्टि–कश्चिदपि वाचैव नाम प्रज्ञपयितुं न शक्नुयात्।

प्रकाशिका

आयुरमृतत्वगुणविशिष्टप्राणोपासनस्य फलमाह—**स यो....लोके।** अक्षितिं चिरकालावस्थायित्वम्। ततश्च मधुविद्यायाः वस्वादिपदप्राप्तिपूर्वकब्रह्मप्राप्तिवत् अस्या अपि विद्यायाश्चिरायुष्ट्वपूर्वकचिरकालस्वर्गप्राप्तिपूर्वकब्रह्मप्राप्तिः फलमित्युक्तं भवति।। उपास्यमानस्य प्राणस्य प्राणान्तरापेक्षया श्रैष्ठ्यं वक्तुं पूर्वपक्षमाह **तद्धैके...गच्छन्तीति।** मुख्यप्राणाश्चेतराणि चेन्द्रियाणि एकैकस्मिन् कार्ये कर्तव्ये परस्परसाह्यलक्षणमेकभावं यान्ति। अतो मुख्यप्राणस्य प्राणान्तरसाम्यमेवेति केचिदाहुरित्यर्थः।।

तत्रोपपत्तिरुच्यते **न हि....ध्यातुमिति।** न हीन्द्रयजातं युगपदेव स्वकार्यं जनयितुमीष्टे इत्यर्थः।।

परिष्कारः

एकेनेन्द्रियेण कार्ये क्रियमाणे अन्येन्द्रियाणि तत्र सहकारीणि भवन्ति, न पृथक् कार्ये क्षमन्त इति सर्वस्य कार्यस्य सर्वाधीनत्वात् प्राणानां समवलत्वमेवेति केषाञ्चित् पक्षं स्वयमिन्द्र उपवर्ण्य, एवमु हैतदिति तदिन्द्र ऊरीकृत्यैवोपरि मुख्यप्राणस्य

Sri Venkateswara Vedic University

सर्वाण्येव प्रज्ञापयन्ति। वाचं वदन्तीं सर्वे प्राणा अनुवदन्ति। चक्षुः पश्य त्सर्वे प्राणा अनुपश्यन्ति। श्रोत्रं शृण्वत्सर्वे प्राणा अनुशृण्वन्ति। मनो

दीपिका

उक्तं हेतुं विवृणोति एकैकं रूपरसादिकं सर्वाण्येव निखिलान्येकैकमेवेत्यनेन संबध्यते। स्पष्टमन्यत्। एतानि वागादीनि करणानि। प्रज्ञापयन्ति प्रकर्षेण निष्पादयन्ति।

एकैकमेव प्रज्ञापयन्तीत्युक्ते शृङ्गग्राहिकयाऽऽह वाचं वदन्तीं वागिन्द्रियं स्वव्यापारं कुर्वत्सर्वे प्राणा निखिलानीन्द्रियाणि राजानमिव वदन्तं सर्वे सभागता अनु वदन्ति पश्चाद्वदनोपलक्षितं स्वं स्वं व्यापारं कुर्वन्त्यनुमोदन्ते वा न त्वेकहेलया व्यापारं कुर्वन्तीत्यर्थः।।

यथा वाचो व्यापार इतरेषां स्वव्यापारादुपरमस्तथा चक्षुः श्रोत्रमनःप्राणानां व्यापारेऽपीत्याह पर्यायचतुष्टयेन चक्षुः पश्यत्सर्वे प्राणा अनु प्राणन्ति। स्पष्टम्।

विष्णुवेदाख्ययतिव्याख्या

चक्षुषैव रूपं प्रज्ञपयितुं न शक्नोति श्रोत्रेणैव शब्दम्। मनसाध्यात्मं कथमिति चेत्, प्राणाः सर्वे एकीभूत्वा एकैकं स्वं विषयं सर्वाण्येव प्रज्ञपयन्ति। वदन्तीं वाचं सर्वेऽन्ये प्राणा अनुवदन्ति। रूपं पश्यच्चक्षुः सर्वे प्राणा अनुपश्यन्ति। शब्दं शृण्वच्छोत्रमन्ये प्राणा अनुशृण्वन्ति। ध्यायन्मनः सर्वे प्राणा अनुध्यायन्ति। प्राणन्तं प्राणं सर्वे प्राणा अनुप्राणन्ति।

प्रकाशिका

फलितमाह **एकभूयं...प्रज्ञापयन्ति।** तस्मात् सर्वे प्राणा एकत्वं प्राप्य एकैकं (भूत्वा?) सर्वाण्येतानि नामरूपशब्दादीनि प्रज्ञापयन्ति।। तदेव प्रपञ्चयति **वाचं...अनुवदन्ति।** सहायतया तिष्ठन्तीत्यर्थः। एवमुत्तरत्रापि।।

परिष्कारः

कार्याभावमात्रे,उत तत्तदिन्द्रियस्य स्वकार्ये अन्येन्द्रियसहकारिकत्वेऽपीति विमृश्य-मेतत्। व्यर्थं तावत् चक्षुरादिकं प्रति श्रोत्रादीनां सहकारित्वकल्पनम्। मनसः सर्वेन्द्रियसहकारित्वात्, चक्षुः कार्यकाले मनः तस्यैव सहकारि भवतीति

Sri Venkateswara Vedic University

ध्यायत्सर्वे प्राणा अनुध्यायन्ति। प्राणं प्रणन्तं सर्वे प्राणा अनुप्राणन्तीति। एवमु हैतदिति हेन्द्र उवाच। अस्ति त्वेव प्राणानां निःश्रेयसमिति।

दीपिका

अनेनानेकावधानन्येककाले सूच्यग्रेण शतपत्रसहस्रपत्रवेधनवदस्पष्टविभिन्नकालानि व्याख्येयानि। इतिः प्रतर्दनप्रश्नपरिसमाप्त्यर्थः।।

प्रतर्दनप्रश्नस्येन्द्रोऽङ्गीकारेणैवोत्तरमुक्तवानित्याह एवमु, इत्थमेवैकहेलया न सर्वे प्राणाः स्वस्वव्यापारवन्तः। ह प्रसिद्धं सर्वजनीनानुभवेन। एतदेकहेलया सर्वेन्द्रियाणां स्वस्वव्यापाराकरणम्। इति ह, एवं किल। इन्द्र उवाच। स्पष्टम्।।

ननु सर्वेषां तवोपाधित्वे समाने कः पक्षपातस्तव प्राणोऽस्मीत्यभिमान इत्यत आह अस्तित्वेव तुशब्दः शङ्कानिराकरणार्थः। प्राणो हि मम निःश्रेयसात्मन उपाधिर्निःश्रेयसरूपः।

विष्णुवेदाख्ययतिव्याख्या

तत्रेन्द्र उवाच–

प्राणो निःश्रेयसं यस्मात्तस्मादात्मेति गम्यताम्।
वागेका स्वयमेवोच्चैर्नात्मनिष्ठा न दृश्यते।

प्रकाशिका

अथापि मुख्यप्राणस्य विशेषं दर्शयति **अस्ति त्वेव...।** प्राणानां मध्ये मुख्यप्राणस्य श्रैष्ठ्यमस्तीत्यर्थः।।

परिष्कारः

मनोरूपसहकारिविरहादेव श्रोत्रादिकं स्वकार्ये असमर्थमिति सर्वदर्शनसरण्यैवोपपत्तेः। वक्ष्यति चेहापि, 'प्रज्ञया वाचं समारुह्य,' 'न हि प्रज्ञापेता वाङ् नाम किञ्चन प्रज्ञापयेत्' इत्येवं मनसः सहकारित्वम्। किञ्च मुख्यप्राणस्य कार्ये इन्द्रियरूपप्राणानां सहकारित्वमसंभवि; तत्कार्योच्छ्वासनिश्वासादिना सह युगपदेव चक्षुरादिकार्यदर्शनेन तत्कार्ये एतदुपक्षयाभावात्। एवं चक्षुराद्यभावे प्राणनव्यापारसद्भावस्य वक्ष्यमाणत्वात् मुख्यप्राणव्यापारः प्राणान्तरनिरपेक्ष एव।

Sri Venkateswara Vedic University

जीवति वागपेतो मूकान्हि पश्यामः। जीवति चक्षुरपेतोऽन्धान्हि पश्यमः। जीवति श्रोत्रापेतो बधिरान्हि पश्यामः। जीवति मनोपेतो बालान्हि

दीपिका

प्रसिद्धं तस्य निःश्रेयसं प्राणसंवादादौ न च तदासीद्भविष्यति वा किं त्वस्त्येव वर्तत एव न तु कदाचिन्न वर्तते। प्राणानां प्राणस्य पञ्चवृत्तीनां निःश्रेयसं शरीरधारणोच्छ्वयनादिकम्। इति निःश्रेयससवर्तमानत्वप्रतिज्ञापरिसमाप्त्यर्थः। न चैतन्निःश्रेयसं वाक्चक्षुःश्रोत्राणामपि भवतीत्याह पर्यायक्रमेण सहेतुकम् जीवति वागपेतो बालान्हि पश्यामः। स्पष्टम्। वाक्चक्षुःश्रोत्रमनोभिरपेतो रहितो जीवतीति

विष्णुवेदाख्ययतिव्याख्या

करणानि समादाय नामनिष्ठेह दृश्यते।

कर्तानां हि पारार्थ्यं गृहादीनामिहेष्यते।

तथैवासंहतार्थानि करणानीति गृह्यताम्।

तत्रेन्द्र इत्युवाच। प्राणानां करणानां निश्रेयसमस्त्येव चेत् करणविहीनस्य जीवनं कथमिति। वाक्करणापेतो जीवति लोके। कथम्? मूकान् हि पश्यामः चक्षुरपेतश्च

प्रकाशिका

तदेव प्रपञ्चयति **जीवति....।** वागिन्द्रियराहित्येऽपि शरीरधारणमिति; मूकानां दर्शनात्। एवमुत्तरत्रापि द्रष्टव्यम्।।

परिष्कारः

एवं बधिरादेरपि दर्शनादिकार्याक्षतेः श्रोत्रादेः चक्षुरादिसहकारित्वं दुर्वचमेव। अतः, 'चक्षुः पश्यत् सर्वे प्रणा अनुपश्यन्ति' इत्यादिवाक्यस्य नेन्द्रियान्तरसहकारित्वे तात्पर्यम्। किंतु एककार्यकाले अन्येषामव्यापृतत्वमात्रे। सर्वथा मुख्यप्राण-स्येतरसाम्यमितो न सिद्ध्यति चेति। अत एव पूर्वपक्षमाहेत्यवतारिकायां भाषितम्। अतो नैष केषाञ्चिद् वास्तवः पक्ष इति।।

एतद्विद्यान्ते, 'स म आत्मेति विद्यात्' इति अस्मच्छब्दप्रयोगात् कृत्स्नाऽपि

Sri Venkateswara Vedic University

पश्यामः। जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न इति। एवं हि पश्याम इति। अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति।। २ ।।

दीपिका

प्रज्ञाऽत्र हेतुः। मूकान्धबधिराणां च दर्शनम्। अयमर्थः। इन्द्रियाणां कार्यैकगम्यत्वात्कार्याभावे तदभाव इति च। जीवति बाहुच्छिन्नो जीवत्युरुच्छिन्नः। स्पष्टम्। पर्यायद्वयेन हस्तपादरहितस्य जीवनमुच्यते। इति प्रकृतपर्यायपरिसमाप्त्यर्थः।

एकहेलयोभयत्र हेतुमाह एवं हि पश्यामः। हि यस्मादेवं छिन्नहस्तपादानां जीवनं पश्यामोऽवलोकयामः। न च दृष्टेऽनुपपन्नं नामेत्यर्थः। इत्यनेन प्रकारेणाङ्गीकृत्य। इति हेन्द्र उवाचेत्यन्वयः। अथवाऽऽद्य इतिशब्दोऽङ्गीकारार्थोऽन्यस्तु प्रकारार्थ इति।। एतन्निःश्रेयसमस्त्येवेत्यस्मिन्नर्थ उपपत्तिर्मृग्येत्याह अथ यस्मात्खलु निश्चितं सर्वप्रत्यक्षमिति यावत्। प्राण एव प्रज्ञात्मा क्रियाशक्त्युपाधिक एव ज्ञानशक्त्युपाधिको न त्वन्यः। इदं प्रत्यक्षं शरीरं देहं परिगृह्याहं ममेति वा स्वीकृत्योत्थापयति शयनासनादिभ्य ऊर्ध्वं नयति।। २ ।।

विष्णुवेदाख्ययतिव्याख्या

जीवति लोके। अन्धान् हि पश्यामः। श्रोत्रापेतश्च जीवति बधिरान् हि पश्यामः। बाहुच्छिन्नश्च भवति ऊरुच्छिन्नश्च। एवं हि पश्यामः। एवं पश्यामो यतः। प्रज्ञत्मा प्राण एवेदं शरीरं परिगृह्य उत्थापयति।।

प्रकाशिका

जीवति बाहुच्छिन्नो जीवत्युरश्छिन्न इति । एवं हि पश्यामः। छिन्नोरस्को जीवति, छिन्नबाहुर्जीवतीति। एवं ह्यनुभूयते। **अथ खलु...उत्थापयति।** अथखलुशब्दः प्रसिद्धौ। मुख्यप्राण एव प्रज्ञात्मा। प्रज्ञाशब्दोऽत्र जीवपरः। स आत्मा सहायो यस्य स प्रज्ञात्मा। जीवसहायको मुख्यप्राण एव मृतप्रायं शयानं शरीरं परितो गृहीत्वा उत्थापयति।।

परिष्कारः

विद्या इन्द्रोक्तिरूपैवेति स्पष्टम्। एवञ्च सति इह मध्ये इति हेन्द्र उवाचेति

Sri Venkateswara Vedic University

* *प्राणस्य वक्तृत्वोपासने सर्वोज्जीवनहेतुत्वदर्शनम्* *

तस्मादेतदेवोक्थमुपासीत। यो वै प्राणः सा प्रज्ञा। या वा प्रज्ञा स

दीपिका

इदानीं प्रसङ्गादुपासनान्तरं श्रुत्यन्तरप्रसिद्धं प्राणे स्मारयति।तस्माद्यत इदं शरीरमुत्थापयति प्राणस्तत एतदेवोत्थापनहेतुभूतमेव नान्यत्। उक्थमुक्थशब्दाभिधेयम्। उपासीत। व्याख्यातम्।।

ननु यदि प्राण उक्थत्वेनोपास्यस्तर्हि पञ्चवृत्तिमात्रं विवक्षितं न परमात्मेत्यत आह यो वै प्राणो य एवात्र प्राणशब्दाभिधेयः। सा प्रसिद्धा प्रज्ञा सर्वबोधसाक्षिणी संवित्। या वा या वै प्रज्ञोक्ता। स प्रसिद्धः। प्राणः प्राणोपाधिकः परमात्मा।।

ननु कस्मादेतदेकमेव तवोपाधिभूतमित्यत आह सह मिलित्वा। हि यस्मात्। एतौ प्रज्ञाप्राणौ। अस्मिञ्शरीरे। स्पष्टम्। वसतो निवासं कुरुतो जीवेन सह मिलित्वोत्क्रामतोऽस्माच्छरीरादुत्क्रमणं कुरुतो मरणे। पाठान्तरे यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति।

विष्णुवेदाख्ययतिव्याख्या

अथ खल्वादिवाक्यानि विष्णोरेकत्वसिध्दये।
तस्मादेतदुक्थमेवेति प्राणप्रज्ञात्मत्वमुक्थमुच्यते।

प्रकाशिका

तस्मात्...उपासीत। तस्मादितरेन्द्रियाणि परित्यज्य मुख्यप्राणमेवोत्थापयितृत्वगुणविशिष्टमुपासीत।। **यो वै...सहोत्क्रामतः।** अत्रापि प्रज्ञाशब्देन जीव उच्यते। जीवप्राणावस्मिन् शरीरे सह वसतः;सहोत्क्रामतः। ततो हेतोः जीव एव प्राणः; प्राण एव जीवः; उभावप्येककार्यकरावित्यर्थः। अतः परमात्मनः प्राणशरीरकत्वेन जीवशरीरकत्वेन चानुसन्धानं युक्तमिति भावः।।

परिष्कारः

श्रुतिलेखनम्, मुख्यप्राणश्रैष्ठ्यं वक्ष्यन् इन्द्रोऽपीदं साम्यमीषदङ्गीचकारेत्याश्चर्यप्रकटनाय।। २ ।।

Sri Venkateswara Vedic University

प्राणः। सह ह्येतावस्मिञ्शरीरे वसतः। सहोत्क्रामत स्तस्यैवैव दृष्टिरेत- द्विज्ञानम्। यत्रैतत्पुरुषः सुप्तः स्वप्नं न कंचन पश्यति। अथास्मिन्प्राण

दीपिका

तस्य प्राणोपाधिकस्य। एषैवेत्थमेव वक्ष्यमाणा। दृष्टिर्दर्शनापरपर्यायाऽवगतिः। अस्यामवस्थायां प्राणशब्दाभिधेयोऽवगन्तव्य इत्यर्थः।।

एषैव दृष्टिरिति व्याकरोति एतद्विज्ञानं यदेतत्सुषुप्तं तदेवाऽऽत्मनः प्राणत्व- विज्ञप्तिकारणम्।। एतच्छब्दार्थमाह यत्र यस्यामवस्थायाम्। एतत्सर्वविशेषबोधशून्यं यथा स्यात्तथा। पुरुषो वस्तुतः परिपूर्णोऽपि पुरिशयः। सुप्तः शयनमधिगतः। स्वप्नं जाग्रद्वासनारूपं पदार्थजातं न कंचन पश्यति कमपि नावलोकयति। अथ तदा स्वप्नानवलोकनकाले। अस्मिन्मुखादिसंचारिणि तिरस्कृतज्ञानशक्तौ। प्राण एव क्रियाशक्तावेव न त्वन्यत्र। एकधा भवति, एकत्वं गच्छति। प्राणेपाधिकः प्राणशब्दार्हः पुरुषो भवतीत्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

साक्ष्यैक्ये साक्षिणोऽप्यैक्यं बलादिह समापतेत्।
रूपप्रकाशकश्चन्द्र एक एवेह दृश्यते।

प्रकाशिका

तस्यैषैव...विजानाति। तस्य मुख्यप्राणस्य ज्ञातृरूपात्मा दृष्टिः दर्शनसाधनम्। जडस्य प्राणस्य ज्ञातृरूपजीवसाहित्यात् एवोत्थापनादिकार्यकरत्वादिति भावः।।

परिष्कारः

अथ खल्वित्यादि। एवं वागाद्यभावकालेऽपि शरीरस्य सम्यक् व्यापृतत्वदर्शनात् प्राणापेतत्वप्रसक्तिकाले शरीरपातस्यैव दर्शनाच्च प्राण एव शरीरं परिगृह्योत्था- पयति। तदिदं श्रुत्यन्तरेष्वपि प्रसिद्धं वागादिभिरभ्युपेतञ्चेति खलुशब्देन सूच्यते। नन्विन्द्रियान्तराभावकाल इव प्राणाभावकाले जीवसत्तामात्रेण शरीरस्य व्यापृतत्वसंभवात् प्राणोऽपि न प्रधानमिति शङ्कानुन्मेषाय प्राणजीवयोः पृथग्भा-

Sri Venkateswara Vedic University

वाभावं वक्तुं प्राणस्य प्रज्ञात्माभेदारोपणम्।।

एतद्विवरणमेव यो वै प्राण इत्यादिना। यादृशः प्राणः तादृशो जीव इति परमार्थः। तद् विव्रियते सह ह्येताविति। जीवस्य वासवत्त्वे प्राणोऽपि वासवान्। एकस्योत्क्रमवत्त्वेऽन्योऽप्युत्क्रमवान्। अतः प्राणमात्राभावकालो दुर्वच इति भावः। न केवलमेतत्, प्राणजीवयोरुभयोरपि सविषयेन्द्रियैकीभावास्पदत्वस्याविशिष्टत्वादपि साम्यमिति।।

एवं प्रधानजीवाभिन्नतया निरीक्ष्ये प्राणे कथं नोत्कर्ष इति व्युत्पादयितुं तस्यैषैव दृष्टिरित्याद्यारम्भः। एतद्विजानातीत्यस्य, यदेतत् जीवतत्त्वं विज्ञानकर्तृ एतदेव तस्य दृष्टिः दर्शनसाधकमित्यर्थोऽभिमतः। अत्र वागाद्यप्ययकालेऽपि प्राणस्यानप्ययेन स्थिति विषये इदं वक्ष्यमाणमेकं निदर्शनमिति तस्यैषैव दृष्टिरिति वाक्येनोच्यते। तदेव पुनर्विव्रियते एतद् विज्ञानमिति। विजानातीत्येतत्स्थाने विज्ञानमिति पाठस्यैव संप्रति दर्शनात्। निदर्शनमित्यर्थे प्रज्ञानमिति पदप्रयोगस्य न्यायभाष्यादौ दृष्टत्वात् दृष्टिरित्यस्य विज्ञानमिति पर्यायान्तरेण विवरणम्। प्राणस्यानप्ययेन स्थितिविषये मूर्छारूपनिदर्शनान्तरं वक्तुं पुनः, तस्यैषैव सिद्धिरेतद्विज्ञानमिति वाक्यारम्भः। तदुपरि तस्यैषैव दृष्टिरिति वाक्यं तु कोशान्तरेषु नोपलभ्यते। भाष्येऽपि तत्पाठस्थितौ न किञ्चिद् गमकम्। पूर्णमूलखण्डग्रहणपूर्वं प्रकाशिकायां क्रियमाणायां, तादृशात् तालकोशात् मूलभागं पृथक्कृत्य व्याख्याभागमात्रं प्रतीकेनापि रहितं पृथङ्निवेश्य मुद्रयद्भिः तस्यैषैव दृष्टिरित्यंशस्य मूलत्वकल्पनेन अयथायथं मुद्रणं कृतम्। भाष्ये तु तस्यैषैव सिद्धिरेतद्विज्ञानमिति मूलवाक्यं व्याख्याय तदिदं पूर्वोक्तस्य तस्यैषैव दृष्टिरेतद्विजानातीति वाक्यस्य पुनर्वचनपरमिति बोधयितुं प्रवृत्तमिति। सुषुप्तौ मुख्यप्राणमात्रस्योच्छ्वासनिश्वासरूपेणावस्थितेः प्रत्यक्षत्वात् मूर्च्छायामपि सूक्ष्मरूपेण तत्स्थितेरौष्ण्यादिना गृह्यमाणत्वात् उभयोर्निदर्शनत्वम्। सुषुप्ताविव मूर्च्छायां प्राणस्य विस्पष्टदर्शनाभावादाक्षेपतः सिद्धिमभिप्रेत्य

Sri Venkateswara Vedic University

एवैकधा भवति। तदेनं वाक्सर्वैर्नामभिः सहाप्येति। चक्षुः सर्वैः रूपैः

दीपिका

ननु तदा वागादीनि करणानि क्व यान्तीत्यत आह तदा तस्मिन्प्राण एकधाभवनकाले। एनं प्राणोपाधिकमात्मानम्।। वाक्चक्षुःश्रोत्रमनांसि सविषयाणि लयं गच्छन्तीति पर्यायचतुष्टयेनाऽह वाक्सर्वैर्नामभिः सहाप्येति। स्पष्टम्।। ननु प्राणे लीनानां

विष्णुवेदाख्ययतिव्याख्या

एकत्र निष्ठाप्यनयोरेकसाक्षित्वसाधिका।।
एकस्थघटयोरेकदीप एव प्रकाशकः।

प्रकाशिका

यत्र....भवति। यत्र यदा एतत्पुरुषः एष पुरुषः सुप्तस्सन् न कञ्चन स्वप्नं पश्यति, अथतदेत्यर्थः—अस्मिन् प्राणे प्राणशरीरकेपरमात्मनि अयं सुप्तः पुरुषः एकधा भवति। एकधाभावप्रकारश्चोत्तराध्याये वक्ष्यते।। **तदैनं....सहाप्येति।** परमात्मनैकीभूते जीवे स्वकार्येण नामाभिलपनेन सह वागिन्द्रियं लीनं भवतीत्यर्थः।। **चक्षुः...अप्येति।** अत्र रूपशब्दो रूपज्ञानौपयिकव्यापारपरः। एवमुत्तरत्रापि द्रष्टव्यम्।। **श्रोत्रं...अप्येति।।** ध्यानैः ध्यानौपयिकव्यापारैरित्यर्थः। शिष्टं स्पष्टम्।। स **यदा....लोकाः।** प्राणाः जीवाः, देवाः इन्द्रियाणि;लोकाः ज्ञानानि।।

परिष्कारः

शास्त्रैकवेद्यत्वात् तत्र (४१) तस्यैषैव दृष्टिरित्याद्यनुक्तिः। एवमर्थवर्णनसंभवेऽपि विजानातीति पाठमवलम्ब्य भाष्येऽन्यथार्थवर्णनमिति ध्येयम्। एतद्विजानातीति पाठेऽपि, 'तस्यैषा दृष्टिः यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति' इति(३.१३) छान्दोग्यवाक्य इवोक्तरीत्याऽर्थवर्णनं युक्तम्, एतत्विजानातीत्यस्य अनन्तरवाक्यवक्ष्यमाणं विजानातीति यत्,एषैव तस्य दृष्टिरिति व्याख्यासंभवात्।
वक्ष्यत इति। व्याख्यास्यत इत्यर्थः।।

Sri Venkateswara Vedic University

सहाप्येति। श्रोत्रं सर्वै: शब्दै: सहाप्येति। मन: सर्वैर्ध्यानै: सहाप्येति। स यदा प्रतिबुद्ध्यते। यथाऽग्रेर्ज्वलत: सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्। एवमेवैतस्मादात्मन: प्राणा यथायतनं विप्रतिष्ठन्ते। प्राणेभ्यो देवा देवेभ्यो

दीपिका

तेषां समुद्र इव सरितां कुत: पुनरुत्पत्तिरित्यत आह स प्राणोपाधिक: पुरुषो यदा यस्मिन्काले प्रतिबुध्यते जागरणं गच्छति।। जागरणावसर एतस्मादुत्पत्तौ दृष्टान्तमाह यथा दृष्टान्ते। अग्नेर्जातवेदसो ज्वलतो जाज्वल्यमानात्। सर्वा दिशो विस्फुलिङ्गा: क्षुद्रा अग्निकणा विप्रतिष्ठेरन्विविधासु दिक्षु निर्गच्छन्ति। एवमेवानेनैव प्रकारेण न त्वन्यथा। एतस्यात्प्राणोपाधिकादात्मन आनन्दात्मन: प्राणा वागादयो यथायतनं यस्य यादृशं स्थानं जिह्वादि तदुद्दिश्य विप्रतिष्ठन्ते विविधं निर्गच्छन्ति। प्राणेभ्यो देवा अग्न्यादय:। विप्रतिष्ठन्त एतदनुवर्ततेऽत्र वक्ष्यमाणे च। देवेभ्योऽग्न्यादिभ्यो लोका नामादयो विषया:।।

विष्णुवेदाख्ययतिव्याख्या

महत्त्वं हि यतो ब्रह्मशब्दार्थो मुख्य इष्यते।
महत्त्वं त्रिविधं ह्येतद्देशकालादिवर्जनम्।
प्राणप्रज्ञात्मनोरैक्ये साक्षिणो ब्रह्मता भवेत्।
तस्मादेतदिति ह्युक्त्या प्राणस्योक्थत्वमुच्यते।
उक्थे हि सर्वभूतानामन्तर्भाव: प्रदर्शित:।

परिष्कार:

अपौनरुक्त्याय प्राणा इति इन्द्रियग्रहणायोगात्, अग्निविस्फुलिङ्गसादृश्यस्य परमात्मजीवात्मनो: आत्मन: प्राणा इत्यनेनोक्तौ सामञ्जस्यात्, भूमविद्यायाम्, 'आत्मत: प्राण आत्मत आशा' इति प्राणपदेन जीवग्रहणदर्शनाच्चैवमर्थो वर्णित:। अन्यथा तु प्राणपदेनेन्द्रियग्रहणम्, देवपदेन तदधिष्ठातृदेवताग्रहणं तत्कार्यग्रहणं वा, लोकपदेन इन्द्रियकार्यग्रहणं विषयग्रहणं वेति वक्तव्यम्। विमृष्टमिदं श्रुतप्रकाशिकायाम्। एकपुरुषप्रतिबोधवर्णनार्थे वाक्ये बहुजीवविप्रतिष्ठानवर्णनं न

Sri Venkateswara Vedic University

लोकाः। तस्यैषैव सिद्धिरेतद्विज्ञानम्। यत्रैतत्पुरुष आर्तो मरिष्यन्नाबल्यं न्येत्यं संमोहं न्येति। तदाहुः उदक्रमीच्चित्तं न शृणोति न पश्यति न

दीपिका

जीवतः प्राणोपाधिकत्वमुक्त्वा मरणेऽपि प्राणोपाधिकत्वमाह तस्य प्राणोपाधिकस्य। एषैव मरणावस्थारूपैव नत्वन्या। सिद्धिः प्रसिद्धिः प्राणत्वे।।

एषैव सिद्धिरिति व्याकरोति एतन्मरणं सर्वप्रत्यक्षम्। विज्ञानं विज्ञायतेऽनेनेति विज्ञानं प्रमाणमिति यावत्।। एतच्छब्दोक्तं मरणमाह यत्र यस्यामवस्थायामेतत्पुरुषोऽयं पुमान्प्रत्यक्षो मनुष्यत्वाद्यभिमानी। आर्तोजराव्याध्यादीनां वश्यं प्राप्तः। मरिष्यन्मरणं करिष्यन्नासन्नमरण इत्यर्थः। आबल्यमबलस्य दुर्बलस्य भाव आबल्यं हस्तपादाद्यवश्यत्वमित्यर्थः। न्येत्य नितरामागत्य। संमोहं बन्ध्वाद्यपरिज्ञानलक्षणं न्येति नितरामागच्छति। तदाहुः समीपस्थाः कथयन्ति। समीपस्थोक्तिमाह–

विष्णुवेदाख्ययतिव्याख्या

प्रज्ञा प्राणश्चोभौ सहास्मिन् शरीरे वसतः उत्क्रामकाले सहोत्क्रमतः। तस्य प्राणस्य प्रज्ञात्मनो दृष्टिरेषा विज्ञानं चैतत्। यदा पुरुषः सुप्तः कंचन स्वप्नं न पश्यति तस्मिन् काले सः प्राण एवैकधा भवति । तदा सर्वाणि करणानि वाक् चक्षुः श्रोत्रं मन इति नामभिः नामरूपं शब्दो ध्यातमिति एतैः सह एनं प्राणमपियन्ति । यदा सः प्राणः प्रतिबुध्यते जाग्रदवस्थायामित्यर्थः। यथायतनं यथास्वायतनं विप्रतिष्ठन्ते।

प्रकाशिका

तस्यैषैव सिद्धिः तस्य एवम्भूतस्य मुख्यप्राणस्य सिद्धिः कार्यसाधकम्। एतद्विज्ञानम् एतस्य जीवस्य यत् विज्ञानम्, तदेव साधकम्। अथवा विज्ञानलक्षणमेतदात्मत्वं (त्मतत्त्वं?) साधकमित्यर्थः। प्राणजीवौ एकतामापन्नौ एककार्यसाधकाविति यावत्। 'तस्यैषैव दृष्टिः एत द्विजानाति' इत्युक्त एवार्थोऽनेनापि वाक्येन दार्ढ्यायोक्तः।।

परिष्कारः

रुचिरमिति चेत्– अस्तु कोऽप्यर्थः। किमनेन मुख्यप्रमेयबाधनप्रसङ्गरहितेन।। इत्युक्त एवार्थ इति। इति पूर्ववाक्याभ्यामुक्त एवार्थः इत्यर्थः। एकोनत्रिंशवाक्ये सर्वं

Sri Venkateswara Vedic University

वाचा वदति न ध्यायति। अथास्मिन्प्राण एवैकधा भवति। तदैनं वाक्सर्वैर्नामभिः सहाप्येति। चक्षुः सर्वैः रूपैः सहाप्येति। श्रोत्रं सर्वैः शब्दैः सहाप्येति। मनः सर्वैर्ध्यानैः सहाप्येति। स यदा प्रतिबुध्यते यथाऽग्नेर्ज्वलतो सर्वादिशो विस्फुलिङ्गा विप्रतिष्ठेरन्। एवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते। प्राणेभ्यो देवा देवेभ्यो लोकाः।। ३ ।।

दीपिका

उदक्रमीदुत्क्रमणमकरोत्। चित्तं मनः।। चित्तोत्कर्मणे लिङ्गान्याहुः न शृणोति न पश्यति न वाचा वदति न ध्यायति। स्पष्टम्। इत्यनेन प्रकारेणाऽऽहुरित्यन्वयः। अथास्मिन्प्राण देवा देवेभ्यो लोकाः। अथ तदाऽस्मिन्मरणकाले प्रतिबुद्ध्यत उत्पद्यते शरीरान्तरग्रहणं करोति तस्मिन्नपि शरीरे मोहाद्विमुक्तो भवतीत्यर्थः। व्याख्यातमन्यत्।। ३ ।।

विष्णुवेदाख्ययतिव्याख्या

देवा अग्न्यादयो लोकाः पृथिव्यादयश्च विप्रस्थिता भवन्ति। तस्यात्मन अन्याप्येषा दृष्टिरुपासनं विज्ञानं वा। यदा पुरुषो मरिष्यन्नार्तः अबलत्वं प्राप्य मोहं निर्गच्छति तदा आहुः सर्वे अस्य चित्तमुदक्रमीत् न शृणोति न पश्यति न वदति यत इत्याहुः। पूर्ववद्व्याख्या।। ३ ।।

प्रकाशिका

सुप्तौ मुख्यप्राणस्येतरप्राणाप्ययोद्गमनापादानहेतुत्वमुक्त्वा मूर्च्छायामपि तदाह **यत्रैतत्...एकधा भवति।** यदा एष पुरुषः व्याध्यादिना पीडितो मरिष्यन् आबल्यम्-अबलस्य भावं आबल्यम् बलराहित्यं, न्येति - नितरामेति गच्छति मोहं मूर्च्छां न्येति प्राप्नोति, तदा समीपवर्तिन आहुः, चित्तमुदक्रमीत् इति। मनः निलीनमित्यर्थः। तत्र हेतुः न श्रुणोति न पश्यति न वाचा वदतीति। अथ तदा अस्मिन् प्राणे प्राणशरीरके परमात्मनि ऐकध्यं प्रयातीत्यर्थः।। स यदा प्रतिबुद्ध्यते। आयुश्शेषौषधवशादित्यर्थः।। उत्क्रान्तावपि मुख्यप्राणस्य सर्वोपजीव्यतामाह

Sri Venkateswara Vedic University

* पुरुषस्य उत्क्रमणान्तरावस्था *

स यदाऽस्माच्छरीरादुत्क्रामति। सहैवैतैः सर्वैरुत्क्रामति वागस्मात्सर्वाणि नामान्यभिविसृजते। वाचा सर्वाणि नामान्याप्नोति। प्राणोऽस्मात्सर्वान्गन्धानभिविसृजते। प्राणेन सर्वान्गन्धानाप्नोति। चक्षुरस्मात्सर्वाणि रूपाण्यभिविसृजते। चक्षुषासर्वाणिरूपाण्याप्नोति। श्रोत्रमस्मात्सर्वाञ्शब्दानभिविसृजते। श्रोत्रेण सर्वान् शब्दानाप्नोति। मनोऽस्मात्सर्वाणि

दीपिका

एवं मरणकाले मूर्छामिन्द्रियाणां लयमभिधाय शरीरादुत्क्रमणे तस्मिन्नेव लये विशेषमाह स मुमूर्षुर्यदा यस्मिन्काले। अस्मात्प्रत्यक्षाच्छरीराच्छीर्णावयवाद्देहादुत्क्रामत्यूर्ध्वं गच्छति सहैवैतैः सर्वैरुत्क्रामति। वाग्वागिन्द्रियमस्मात्स्वामिनः सर्वाणि निखिलानि नामानि स्वविषयभूतानि। अभिविसृजते सर्वतः परित्यजति स्वविषयव्यापारात्सर्वथोपरमं प्राप्य पुनर्भोगं न प्रयच्छतीत्यर्थः।।

ननु यदि वाङ्नामान्यभिविसृजतेऽस्मात्तर्ह्यन्येन तत्प्राप्तिरस्त्वित्यत आह वाचा सर्वाणि नामान्याप्नोति। स्पष्टम्। अथवा नाम्नां परित्यागं चेद्वाक्करोति तथा च स्वयं प्राणे विलीना स्वविषयरहिता स्यादित्यत आह– वाचेत्यादि। अयमर्थः, न वाङ्मात्रं प्रलीयते प्राणे किं तु प्राणो वाचा सह सर्वाणि नामान्याप्नोति वाग्न स्वविषयरहिता प्राणे प्रलीयत इति।। यथा वाक्तथा घ्रा(प्रा)णचक्षुःश्रोत्रमनांसीति पर्यायचतुष्टयेनाऽऽह प्राणोऽस्मा ध्यानान्याप्नोति। वाक्पर्यायवत्प्राणचक्षुःश्रोत्रमनःपर्यायाः सविषया व्याख्येयाः। सा प्रसिद्धा। एषा स यदेत्यादिनोक्ता। प्राणे प्राणोपाधिक आत्मनि। सर्वाप्तिर्विषयेन्द्रियादिलक्षणस्य सर्वस्य प्राप्तिः।।

विष्णुवेदाख्ययतिव्याख्या

स आत्मा यदा अस्माच्छरीरादुद्गच्छति तदा वागादयः सर्वाणि नामादीनि अभिविसृजन्ते परित्यजन्ति। करणैः स आत्मा विषयानाप्नोति। सैषा प्राणे सर्वाप्तिः। एषां करणानां सविषयाणां सर्वेषामाप्तिः प्राणे इति प्राणप्रज्ञात्मनोरभेदः। तावस्मिन् शरीरे सह वसतः सहोत्क्रामतश्च शरीरात्। सर्वाणि भूतानि यथा प्रज्ञायामेवं

Sri Venkateswara Vedic University

ध्यानान्यभिविसृजते। मनसा सर्वाणि ध्यानान्याप्नोति। सैषा प्राणे सर्वाप्तिः। यो वै प्राणः सा प्रज्ञा। या वा प्रज्ञा स प्राणः। सह ह्येताव स्मिञ्शरीरे वसतः। सहोत्क्रामतः। अथ खलु यथाऽस्यै प्रज्ञायै सर्वाणि भूतान्येकं भवन्ति। तद्व्याख्यास्यामः।। ४ ।।

दीपिका

न चायं प्राणः पञ्चवृत्तिमात्रं किन्तु क्रियाज्ञानशक्त्युपाधिक आत्मेत्येतदुक्तमर्थं स्मारयति यो वै प्राणः सहोत्क्रामतः। व्याख्यातम्।।

ननु प्राणे सर्वेषा भूतानामेकीभाव उक्तो न तु प्रज्ञायां तत्कथं प्राणप्रज्ञयोः सर्वात्मनैक्यमित्याशङ्क्य प्रज्ञाया अपि प्राणवत्सर्वात्म्यकथनायाऽऽह अथ प्राणस्य सार्वात्म्यकथनानन्तरकम्। खलु निश्चितम्। यथा येन प्रकारेण। अस्यै प्रज्ञायै, अस्यां प्राज्ञायां ज्ञानशक्तौ चैतन्ये साक्षिण्याम्। सर्वाणि भूतानि निखिलानि वागादीनि सविषयाणि स्थिरजङ्गमशब्दाभिधेयानि। एकं भवन्ति प्राणवदेकधा भवन्ति। तत्तथा। व्याख्यास्यामो विस्पष्टमासमन्तात्प्रकथयिष्यामः।। ४ ।।

प्रकाशिका

स यदा...अभिविसृजते। स प्राणः यदाऽस्माच्छरीरात् उत्क्रामति, तदा वागिन्द्रियमेतच्छरीरप्रयुक्तनामाद्यभिलपनं त्यजति।। वाचा सर्वाणि नामान्याप्नोति। यत्र प्राणः स्वयं तिष्ठति, तत्रैव शरीरे स्वोपकरणभूतवागिन्द्रियेण सर्वनामाभिलपनरूप व्यवहारं करोति। एवमुत्तरत्रापि द्रष्टव्यम्।। **घ्राणोऽऽस्मात्....।** घ्राणेन सर्वान् गन्धानाप्नोति। घ्राणजन्यज्ञानेन सर्वान् गन्धान् विषयीकरोतीत्यर्थः।। **चक्षुः...आप्नोति।** सैषा प्राणेन सर्वाप्तिः। सर्वेषां विषयाणां प्राणाधीनेन्द्रिय-जन्यज्ञानविषयत्वलक्षणा प्राणकर्तृकसर्वाप्तिरित्यर्थः।। **यो वै....उत्क्रामतः।** उक्तोऽर्थः

परिष्कारः

वागस्मादिति। पूर्वम् अस्माच्छरीरादिति शरीरस्यैव अस्मादित्युक्त्या इदमप्यस्मात्पदं तत्परमित्यभिसंधाय एतच्छरीरप्रयुक्तेत्युक्तम्। अन्यथा प्राणोऽपि तदर्थः स्यात्। अभिविसृजते अभितस्त्यजति; न स्वव्यापारे क्षमत इत्यर्थः।। एवं मुख्यप्राणे

Sri Venkateswara Vedic University

* *प्रज्ञायां सर्वभूतानाम् एकीभावः* *

वागेवास्या एकमङ्गमदूह्लम्। तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा। प्राण एवास्या एकमङ्गमदूह्लम्। तस्य गन्धः परस्तात्प्रतिविहिता भूतमात्रा। चक्षुरेवास्या एकमङ्गमदूह्लम्। तस्य रुपं पर स्तात्प्रतिवहिता भूतमात्रा। श्रोत्रमेवास्या एकमङ्गमदूह्लम्। तस्य शब्दः परस्तात्प्रतिविहिता

दीपिका

एकभावं प्रतिज्ञाय प्रथमतः प्रज्ञाया विभागमाह वागेव वागिन्द्रियमेव प्रसिद्धं न त्वन्यत्। अस्याः प्रज्ञायाः। एकमङ्गमेकं भागं गोरिवैकस्तनम्। अदूह्लमदूदुहत्। स्वाधीनं कृतवतीत्यर्थः। तस्यै तस्या दुग्धैकभागप्रज्ञाया वाचो नाम वक्तव्यं शब्दजातम्। परस्ताद्विषयत्वेन परस्मिन्बहिर्देशे। प्रतिविहिता विनिर्मिता भूतमात्रा भूतभागः।

विष्णुवेदाख्ययतिव्याख्या

प्राणप्रज्ञात्मनोरैक्यप्रतिपत्त्यर्थमेव हि।
उभयोरङ्भावोऽस्ति करणानां पृथक् पृथक्।
एकाङ्गानां करादीनामन्याङ्त्वं न दृश्यते।

प्रकाशिका

प्राणस्य सर्वभूता श्रयत्वमुक्त्वा प्रज्ञाशब्दितस्य जीवस्य सर्वभूताश्रयत्वप्रकारः कथ्यत इत्याह **अथ खलु...व्याख्यास्यामः**।। ४ ।।

वागेव...उदूढम्। अस्याः प्रज्ञायाः वागिन्द्रियमेकमङ्गम् उदूढं परिगृहीत-मित्यर्थः। उद्वाहकर्मभूतपत्नीवत् परिगृहीतमित्यर्थः; वस्तुतस्याङ्गाभावात्।

परिष्कारः

सत्येव सर्वेषां कार्यक्षमत्वात् मुख्यप्राणेनैव सर्वमाप्यत इति प्राणप्रधान्यस्योपसंहारः सैषा प्राणेन सर्वाप्तिरिति।। प्राण एव प्रज्ञात्मेति प्राणजीवाभेदनिर्देशस्य सादृश्य-निबन्धनत्वं दर्शयता प्राणस्य सर्वैकीभावास्पदत्वमेतावतोपपाद्य प्रज्ञाशब्दवाच्ये जीवेऽपि तदुपपादयितुं यो वै प्राण इति पूर्ववाक्यपुनःपाठ। अथोपपादनम् अथ

Sri Venkateswara Vedic University

भूतमात्रा। जिह्वैवास्या एकमङ्गमदूह्लम्। तस्या अन्नरसः परस्तात्प्रतिविहिता भूतमात्रा। हस्तावेवास्या एकम ङ्गमदूह्लम्। तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा। शरीरमेवास्या एकमङ्गमदूह्लम्। तस्य सुखदुःखे परस्तात्प्रतिविहिता भूतमात्रा। उपस्थ एवास्या एकमङ्गम-

---

दीपिका

मीयत इति मात्रा। तस्या विषयत्वेन प्रतिविहिता भूतमात्रा वा नामेत्यन्वयः।। यथा वाक्प्रज्ञाया एकमङ्गमदूदुहद्यथा च तस्याः परस्तात्प्रतिविहिता भूतमात्रा नामैवं प्राणचक्षुःश्रोत्ररसनहस्तशरीरोपस्थपादबुद्धिस्थसंविद एकैकमङ्गमदूदुहत्। आसां यथाक्रमं परस्तात्प्रतिविहिता भूतमात्रा गन्धरूपशब्दान्नरसकर्मसुखदुःखानन्द-

विष्णुवेदाख्ययतिव्याख्या

प्राणाङ्गत्वं च सर्वेषां करणानामिहेष्यते। यतः प्रदर्शनपरं प्रज्ञाङ्गत्ववचस्त्विदम्।

यत एवं परात्मायं प्रत्यगात्मोक्तवर्त्मना।
तस्मात् कर्माणि संन्यस्य ब्रह्मनिष्ठो भवेदिह।

अस्याः प्रज्ञाया एकमङ्गं वागुच्यते। तस्या वाचो नामेति परस्तादनन्तरं भूतामात्रा प्रतिविहिता प्रतिकल्पिता। प्राण एवेत्यादौ सर्वत्रैवं योज्यम्।

प्रज्ञायाः प्राण एकमङ्गम्। तस्य गन्धो भूतमात्रा। प्रज्ञायाश्चक्षुरेकमङ्गम्।

प्रकाशिका

तस्या नाम...भूतमात्रा। तस्याः वाचः पुरस्तात् ग्राह्यत्वेन विषयत्वेन प्रतिविहिता प्रतिद्वंद्वितया प्रतिनियततया विहिता भूतमात्रा नाम। एवमुत्तरत्रापि द्रष्टव्यम्।।

प्रजातिः प्रजननमित्यर्थः।। इत्याः गमनानीत्यर्थः।।

परिष्कारः

उदूढमिति। प्रज्ञया उदूढानि यानि, तत्र वाक् एकमङ्गमित्यर्थः। परस्तादिति सर्वसंमतः पाठः ; न तु पुरस्तादिति। ग्राह्यग्राहकयोरैक्यभ्रान्त्यपोहनाय परस्तादित्युक्तिः। तद्विवरणं प्रतिद्वन्द्वितयेत्यन्तम्। उदूढमित्येतत्स्थाने अदूदुहदित्येव श्रुतप्रकाशिका-

Sri Venkateswara Vedic University

दूह्लम्। तस्याऽऽनन्दो रतिः प्रजातिः पर स्तात्प्रतिविहिता भूतमात्रा। पादावेवास्या एकमङ्गमदूह्लम्। तयो रित्याः परस्तात्प्रतिविहिता भूतमात्रा। प्रज्ञैवास्या एकमङ्गमदूह्लम्। तस्यै धियो विज्ञातव्यं कामाः परस्तात्प्रति-विहिता भूतमात्रा।। ५ ।।

दीपिका

रतिप्रजातीत्यादिधीविज्ञातव्यकामा इति पर्यायनवकेनाऽऽह प्राण एवास्या भूतमात्रा। वाक्पर्यायवच्चक्षुरादयो नवापि पर्याया व्याख्येयाः।। ५ ।।

विष्णुवेदाख्ययतिव्याख्या

तस्य भूतमात्रा रूपमग्ने रूपम्। प्रज्ञायाः श्रोत्रमेकमङ्गम्। तस्य शब्द आकाशाधारो भूतमात्रा। प्रज्ञाया जिह्वा एकमङ्गम्। तस्या अन्नरस आधारो भूतमात्रा। प्रज्ञया हस्तावेकमङ्गम्। तयोः कर्म भूतमात्रा। प्रज्ञायाः शरीरमेकमङ्गम्। तस्य सुखदुःखे भूतमात्रा । प्रज्ञाया उपस्थमेकमङ्गम्। तस्यानन्दो रतिः प्रजातिश्च भूतमात्रा। प्रज्ञायाः पादावेकमङ्गम्। तयोरित्या भूतमात्रा प्रतिविहि। एवमन्याता वारद्यङ्गानि द्रष्टव्यानि। एवं सर्वत्र योज्यम्।। ५ ।।

प्रकाशिका

प्रज्ञैवास्याः...भूतमात्रा। अथ(अत्र?) प्रथमान्तः प्रज्ञाशब्दः मनःपरः अस्याः इति तु प्रज्ञारूपजीवपरः। उत्तरत्र, 'नेत्यां विजिज्ञासीत नेतारं विद्यात्' इत्यनन्तरम्, 'न मनो विजिज्ञासीत' इति मनश्शब्दप्रयोगात् स्थानप्रमाणेन प्रज्ञाशब्दस्य मन एवार्थः। धियो विज्ञातव्यम्। मनोजन्यज्ञानविषयमि(य इ?) त्यर्थः। कामाः काम्यमाना इत्यर्थः।। ५ ।।

परिष्कारः

पाठोऽपि। अदूदुहत् अपूरयदिति अद्वैतिव्याख्या शाङ्करसूत्रभाष्ये। वाक् प्रज्ञाया एकांशभूतमिति परमार्थः। एवमग्नेऽपि।। ५ ।।

Sri Venkateswara Vedic University

* *प्रज्ञाधिष्ठितैरेव वागादिभिः नामादिप्राप्तिः* *

प्रज्ञया वाचं समारूह्य वाचा सर्वाणि नामान्याप्नोति। प्रज्ञया प्राणं समारुह्य प्राणेन सर्वन्गन्धानाप्नोति। प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति। प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वाञ्शब्दानाप्नोति। प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वानन्नरसानाप्नोति। प्रज्ञया हस्तौ समारुह्य

दीपिका

एवं प्रज्ञाया विभागमुक्त्वेदानीमविभागमाह प्रज्ञया वाचा दुग्धयोक्तया संविदा वाचं वागिन्द्रियं समारूह्य सम्यक्तादात्म्यलक्षणेन संबन्धेनाऽऽरोहणं कृत्वाऽहं वागस्मीत्यभिमानं प्राप्येत्यर्थः। वाचा, उक्तप्रज्ञाभिन्नेनोक्तेनेन्द्रियेण। सर्वणि निखिलानि नामानि वक्तव्यान्याप्नोति वाच्यधिरूढा प्रज्ञा प्राप्नोति। अयमर्थः। न प्रज्ञामन्तरेणोक्तविषयप्राप्तिस्ततो यद्विना न भवति नोपलभ्यते वा तत्तदात्मकं

विष्णुवेदाख्ययतिव्याख्या

एवं प्राणमारुह्य प्राणेन गन्धानाप्नोति, चक्षुषा रूपाणि श्रोत्रेण शब्दान् जिह्वयान्नरसान्, हस्तांस्यां सर्वाणि कर्माणि शरीरेण सुखदुःखे, उपस्थेनानन्दं

प्रकाशिका

एवं नामगन्धरूपशब्दरसकर्मसुखदुःखानन्दगतिज्ञातव्याः दशभूतमात्राः वाग्घ्राणादि-विषयत्वेनोक्त्वा प्रज्ञाशब्दितस्य जीवस्य नामादिदशविधभूतमात्राव्याप्तिप्रकारमाह **प्रज्ञाया वाचं...।** अत्र प्रज्ञाशब्दः अव्यवहितप्रज्ञाशब्दनिर्दिष्टमनःपरः। ततश्च मनसा वागिन्द्रियमधिष्ठाय तद्द्वारा सर्वाणि नामानि अभिलपनक्रियाद्वारा प्राप्नोति।।

परिष्कारः

प्रज्ञया वाचमित्यादिवाक्येषु तृतीयान्तं पूर्ववाक्यप्रकृतमनःपरम्। जीवस्तु आप्नोतेः कर्ता, न करणम्।।

प्रज्ञयैव धियं समारुह्येत्यत्र धियमिति धर्मभूतज्ञानपरम्। मानसकार्याणां

Sri Venkateswara Vedic University

हस्ताभ्यां सर्वाणि कर्माण्याप्नोति। प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति। प्रज्ञयोपस्थं समारुह्योपस्थेनाऽऽनन्दं रतिं प्रजातिमाप्नोति। प्रज्ञया पादौ समारुह्य पादाभ्यां सर्वा इत्या आप्नोति। प्रज्ञयैव धियं समारुह्य प्रज्ञयैव धियो विज्ञातव्यं कामानाप्नोति।। ६ ।।

दीपिका

यथा तन्तून्विनाऽनुपलभ्यमानः पटस्तन्त्वात्मकः शुक्तिकामन्तरेण वाऽनुपलभ्यमान रजतं शुक्त्यात्मकं तथा चोक्तेन्द्रियमन्तरेणाविद्यमानोऽनुपलभ्यमानो विषय उक्तेन्द्रियात्मकः। उक्तं च 'इन्द्रियं प्रज्ञामन्तरेणानुपलभ्यमानं प्रज्ञात्मकम्' इति।।

यथा वाङ्नामानी प्रज्ञाया भेदरहिते एवं घ्राणगन्धौ चक्षूरूपे श्रोत्रशब्दौ जिह्वान्नरसौ हस्तकर्माणि शरीरसुखदुःखान्युपस्थानन्दरतिप्रजातयः पादगतयः प्रज्ञाधीविज्ञातव्यकामाश्चेत्याह प्रज्ञया प्राणं समारुह्य धियो विज्ञातव्यं कामानवाप्नोति। वाक्पर्यायवन्नवकमपि व्याख्येयम्।। ६ ।।

विष्णुवेदाख्ययतिव्याख्या

रतिं प्रजातीराप्नोति। पादाभ्यां सर्वा इत्या आप्नोति। धियो विज्ञातव्यं कामाश्च प्रज्ञयैवाप्नोति। व्यतिरेक उच्यते।। ६ ।।

प्रकाशिका

प्रज्ञया घ्राणं...आप्नोति। मनसा घ्राणेन्द्रियमधिष्ठाय तद्द्वारा सर्वान् गन्धान् आप्नोति-ज्ञानेन व्याप्नोति। एवमुत्तरत्रापि द्रष्टव्यम्, मनसा चक्षुरिन्द्रियमधिष्ठाय तद्द्वारा सर्वाणि रूपाण्याप्नोति ज्ञानेन व्याप्नोतीति।। ६ ।।

परिष्कारः

सर्वेषां धर्मभूतज्ञानपरिणामत्वात् तदपेक्षाध्रौव्यात्। प्रज्ञयैव इत्ययमेवकारः पूर्वस्थलेषु सप्तारोहसाधनस्य विषयप्रापकस्य करणस्य च प्रज्ञावागादिरूपेण भेदवत् इह भेदो नास्ति; मन एव समारोहि विषयप्रापकञ्चेति ज्ञप्तये। अस्तु वा धियमिति मनःपरमेव; प्राक् तथोक्तेः।। ६ ।।

Sri Venkateswara Vedic University

* *प्रज्ञाऽपेतानां वागादीनामसाधकत्वम्* *

न हि प्रज्ञापेता वाङ्नाम किंचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतन्नाम प्राज्ञासिषमिति। न हि प्रज्ञापेतः प्राणो गन्धं कंचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतं गन्धं प्राज्ञासिषमिति। न हि प्रज्ञापेतं चक्षू रूपं किंचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूयादित्याह। नाहमेतद्रूपं प्राज्ञासिषमिति। न हि प्रज्ञापेतं श्रोत्रं शब्दं कंचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतं शब्दं प्राज्ञासिषमिति। न हि प्रज्ञापेता जिह्वाऽन्न-रसं कंचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतमन्नरसं

दीपिका

ननु किं प्रज्ञया यावता वागादिभिरेव स्वः स्वोऽर्थोऽवगम्यत इत्याशङ्क्य वागादीनां प्रज्ञया रहितानां सत्यपि स्वार्थसंबन्धे न तदवगमहेतुत्वमिति सर्वजनीनानुभवेनाऽऽह न हि प्रज्ञापेता वाङ्नाम किंचन प्रज्ञापयेत्। हि यस्मात्प्रज्ञारहितं वागिन्द्रियं किमपि वक्तव्यं स्वं परं नावगमयेत्। प्रज्ञारहिता वाक्स्वव्यापारं न कुरुते कुर्वत्यप्य-विवक्षितार्थसंबद्धार्थं वा कुर्यादित्यर्थः।।

ननु प्रज्ञारहिता वाग्न प्रज्ञापयेदित्यस्मिन्नर्थे किं प्रमाणमित्याशङ्क्य सर्वजनीनमनुभवमभिनयेन प्रमाणयति अन्यत्र विषयान्तरे मे ममेन्द्रियस्वामिनो मनोऽन्तःकरणधीवृत्तिजनकं प्रज्ञासाक्ष्यभूदभवदित्याहैवं ब्रूते।।

विष्णुवेदाख्ययतिव्याख्या

प्रज्ञया रहितानामपीन्द्रियाणां शक्तिरस्तीति चेत्तन्नेत्याह। प्रज्ञया रहिता वाक् किंचन नाम न प्राज्ञपयेत्। केनापि पृष्टे सति नाम ज्ञातुमेवमाह पृष्टः मे मनः अन्यत्राभूदिति। ततो नाम न प्राज्ञासिषमहमित्याह। एवं सर्वत्र योज्यं न हि प्रज्ञापेतः

प्रकाशिका

ननु मनोद्वारा नियमनं किमर्थमित्याशङ्क्याह **न हि...प्रज्ञापयेत्।** न हि मनोनधिष्ठितं

Sri Venkateswara Vedic University

प्राज्ञासिषमिति। न हि प्रज्ञापेतौ हस्तौ कर्म किंचन प्रज्ञापयेताम्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतत्कर्म प्राज्ञासिषमिति। न हि प्रज्ञापेतं शरीरं सुखं दुःखं किंचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतत्सुखं दुःखं प्राज्ञासिषमिति। न हि प्रज्ञापेत उपस्थ आनन्दं रतिं प्रजातिं कांचन प्रज्ञापयेत्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतमानन्दं न रतिं न प्रजातिं प्राज्ञासिषमिति। न हि प्रज्ञापेतौ पादावित्यां कांचन प्रज्ञापयेताम्। अन्यत्र मे मनोऽभूदित्याह। नाहमेतामित्यां प्राज्ञासिषमिति। न हि प्रज्ञापेताः धीः काचन सिध्येत्।। ७ ।।

दीपिका

मनसोऽन्यत्रावस्थाने किं स्यादित्यत आह नाहमेतन्नाम प्राज्ञासिषमिति। अहमिन्द्रियस्वामी। एतत्त्वया कथ्यमानं नाम वक्तव्यमस्येन्द्रियस्य विषय इत्यर्थः। न प्राज्ञासिषं न प्रकर्षेण ज्ञातवान्। उक्तमपि विशदमस्पष्टवर्णं विक्षिप्तार्थं तद्विपरीतं वेत्यनेन प्रकारेणाऽऽहेत्यनुषङ्गः। अयमर्थः। परज्ञानाज्ञानयोरप्रत्यक्षत्वेऽपि परस्य तद्वचनेन लिङ्गेनानुमातुं शक्येते। तथा च प्रज्ञारहितमुक्तमिन्द्रियं न स्वव्या-पारकरमिति।। यथा वाक्तथा प्राणचक्षुःश्रोत्रजिह्वाहस्तशरीरोपस्थपादप्रज्ञा इति पर्यायनवकेनाऽऽह न हि प्रज्ञापेतः प्रज्ञासिषमिति वाक्पर्यायवत्पर्यायाष्टकं व्याख्येयम्।। विज्ञातव्यकामयोर्बुद्धिमन्तरेणानुपलम्भस्य सर्वजनीनत्वाद्धियमेवोररीकृत्याऽऽह न हि प्रज्ञापेता धीः काचन सिध्येत्। काऽपि विज्ञातव्यकामादिभेदभिन्ना धीरन्तः करणवृत्तिः प्रज्ञापेताऽसाक्षिका न सिध्येन्न प्रजायेत नावगम्यत इत्यर्थः।। ७ ।।

विष्णुवेदाख्ययतिव्याख्या

प्राणः इत्यादिषु नाहमेतामित्यां प्रज्ञासिषमित्येवमन्तेषु। प्रज्ञापेता धीः किंचिदपि न सिध्येत्।। ७ ।।

प्रकाशिका

ह्याह(इत्याह?)। मनोव्यासङ्गवशात् ज्ञानपूर्वकनामाभिलपनलक्षणवागिन्द्रिय-

Sri Venkateswara Vedic University

* वागादीनां केवलब्रह्मत्वप्रज्ञानविधिः *

न प्रज्ञातव्यं प्रज्ञायेत। न वाचं विजिज्ञासीत। वक्तारं विद्यात्। न गन्धं विजिज्ञासीत। घ्रातारं विद्यात्। न रूपं विजिज्ञासीत। रूपविद्यं विद्यात्। न शब्दं विजिज्ञासीत। श्रोतारं विद्यात्। नान्नरसं विजिज्ञासीत। अन्नरस-

दीपिका

ननु मिथोपेक्षावतामिन्द्रियतद्विषयमानप्रज्ञानां तुल्यत्वात्कथं प्राणोपाधिका प्रज्ञैवोपास्येति नियमोऽस्तीत्याशङ्क्य प्रज्ञायामेवान्येषां कल्पितत्वमाह न प्रज्ञातव्यं प्रज्ञायेत प्रज्ञातव्यं धियो विषयो न प्रज्ञायेत न च गम्यते योग्यानुपलब्धा बुद्धेरभाव इत्यर्थः। इन्द्रियैः सह प्रज्ञाया अभेदश्चेत्तर्हि तं मामायुरमृतमित्युपासस्वेत्यत्र वाचनिकया रीत्या वागेवोपास्या स्यादित्याह न वाचं विजिज्ञासीत वागिन्द्रियमुपास्स्वेत्येवं न विजिज्ञासीत न विचारयेन्नावगच्छेदित्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

न बाह्यमनुसंदध्यात् प्रज्ञातव्यं प्रयत्नतः। बाह्यं प्रज्ञातुमिष्टं नानुसंदध्यात्। कथमिति? प्रज्ञातव्यं न प्रज्ञायेत। वाचं न विजिज्ञासीत विज्ञातुं नेच्छेत्। वक्तारमात्मानमेव विद्यात्। एवं सर्वत्र योज्यं न गन्धमित्यादिषु। इत्याः गमनमित्यर्थः। ऐतारं गन्तारमात्मानमेव विद्यात्। दुःखात्मकान् विषयान् न विजिज्ञासीतेत्यर्थः।

प्रकाशिका

एवं प्रज्ञाशब्दितस्य जीवस्य भूतमात्राव्याप्तिप्रकारकथनमुखेन आत्मानात्मविवेकं प्रदर्श्य, 'अन्या वाचो विमुञ्चथ' इत्युक्तरीत्या भूतमात्राशब्दितानात्मविज्ञानं परिहर्तव्यमित्याह न प्रज्ञातव्यं प्रज्ञायेतेति। ज्ञात्रात्मव्यतिरिक्तः अनात्मभूतो विषयो न ज्ञातव्य इत्यर्थः

परिष्कारः

सर्वकरणानां मनोपेक्षां व्यतिरेकमुखेनोपपादयति न हि प्रज्ञापेतेति।। प्रज्ञापयेदिति। ज्ञानेन्द्रियाणां प्रज्ञापकत्वं स्वरसम्। कर्मेन्द्रियाणां तु ज्ञानपूर्वकस्य परज्ञानहेतुभूतस्य

Sri Venkateswara Vedic University

विज्ञातारं विद्यात्। न कर्म विजिज्ञासीत। कर्तारं विद्यात्। न सुखदु:खे विजिज्ञासीत। सुखदु:खयोर्विज्ञातारं विद्यात्। नाऽऽनन्दं न रतिं न प्रजातिं विजिज्ञासीत। आनन्दस्य रतेः प्रजातेर्विज्ञातारं विद्यात्। नेत्यां विजि-

---

दीपिका

तर्हि किमवगम्यमित्यत आह वक्तारं वागिन्द्रियप्रेरकमानन्दात्मानं सर्वकरण-वृत्तिसाक्षिणमित्यर्थः। विद्यात्प्राणोऽस्मि प्रज्ञात्मा वक्ताऽऽयुरमृत-मित्यवगच्छेत्। अथ वा प्राणोऽस्मि प्रज्ञात्मा वक्तेत्येवावगच्छेत्। अत्रैवाऽऽयुरमृतत्वयोरन्तर्भावादत एव प्राणप्रज्ञे सर्वप्राणो मुख्य इति प्राणे तावपीत्यङ्गीकृत्य सह ह्येतावित्याद्युक्तम्। अथवा वागादिभ्यः प्राणो मुख्य इति प्राणे ब्रह्मामृतत्वोपासनं समर्पितम्। अधुना वक्तर्यात्मनि प्राणस्यापि प्राणे ब्रह्मामृतत्वबुद्धिरुपदिश्यत इति रहस्यम्। पूर्वं न वाचं विजिज्ञासीतेति करणनिषेधः कृतोऽन्ते च न मनो विजिज्ञासीतेति तस्यैव निषेधं करिष्यति तेनाऽऽद्यन्ताभ्यामिन्द्रियनिषेधः सर्वेन्द्रियोपलक्षणार्थं मध्ये पर्यायाष्टकेन विषयं निषिध्यति पूर्वोत्तरयोः करणस्येवेतरविषयनिषेधोपलक्षणार्थम्। न चात्रानेकश इन्द्रियप्राये शरीरस्य पाठाच्छरीरमपीन्द्रियमिति मन्तव्यम्। करणस्येव विषयोपल-ब्धेर्विवक्षितत्वात्तस्य च भोगायतनेऽपि शरीरे यथाकथंचित्संपादयितुं

प्रकाशिका

तदेव प्रपञ्चयति **न वाचं..विद्यात्।** अत्र वाक्छब्दः प्रकरणानुगुण्यात् नामपरः। वक्तारम् उक्तरीत्या मनोधिष्ठितवागिन्द्रियजन्याभिलपनक्रियया नामव्याप्तारमात्मानमेव विद्यात्। वक्तृजीवशरीरकपरमात्मानं विद्यादिति यावत्। एवमुत्तरत्रापि द्रष्टव्यम्।।

परिष्कारः

न प्रज्ञातव्यं प्रज्ञायेतेति। पूर्वं, तस्यै धियो विज्ञातव्यमिति द्वयोः प्रसक्तत्वात् तत्र प्रज्ञाविरहे धियो न भवन्तीतिवत् प्रज्ञातव्यमपि न प्रज्ञायेतेत्युच्यत इति युक्तं व्याख्यातुम्। अथापि तदा, 'प्रज्ञाविरहे' इत्यध्याहारादिगौरवात् वक्ष्यमाणार्थस्य

Sri Venkateswara Vedic University

ज्ञासीत। एतारं विद्यात्। न मनो विजिज्ञासीत। मन्तारं विद्यात्। ता वा एता दशैव भूतमात्रा अधिप्रज्ञम्। दश प्रज्ञामात्रा अधिभूतम्। यद्धि भूतमात्रा न

दीपिका

सुशकत्वात्। अथैवमपि प्रायपाठस्याऽऽग्रहस्तर्हि शरीरशब्देनत्वगिन्द्रियमस्तु। न चैवं सुखदुःखयोर्विषयत्वं विरुध्यते ताभ्यामुपलक्षितस्य तज्जनकस्य स्पर्शस्यैव कल्पयितुं शक्यत्वात्। एवं च शरीरेऽपि प्रायपाठो न बाधितो भवेत्।। पर्यायाष्टकेन विषयं निषिध्य तत्तद्विषयिण एवाऽऽत्मनो वेद्यत्वमाह न गन्धं विजिज्ञासीतैतारं विद्यात्। रूपविद्यं रूपविदम्। एतारं गन्तारम्। स्पष्टमन्यत्।।

विष्णुवेदाख्ययतिव्याख्या

ता वा एता दशैव भूतमात्रा अधिप्रज्ञम्। ता एता भूतमात्रा दशैव अधिप्रज्ञ भवन्ति। प्रज्ञायां वर्तन्त इत्यर्थः। प्रज्ञामात्राश्च दशैव वागादयोऽधिभूतं भवन्ति भूतमात्रास्वित्यर्थः। यदि भूतमात्राःस्युर्नामादय प्रज्ञामात्रा वागादयश्च स्युः।

प्रकाशिका

रूपं विद्वांसं रूपं पश्यन्तं विद्यादित्यर्थः।।

ता वा एताः...सिद्ध्येत्। नामगन्धरूपशब्दरसकर्मसुखदुःखानन्दरतिप्रजा-तीत्याज्ञातव्यलक्षणा दश भूतमात्राश्च, तद्ग्राहिवाग्घ्राणचक्षुश्श्रोत्रजिह्वाह-स्तशरीरोपस्थपादमनोलक्षणाः दश प्रज्ञामात्राश्चान्योन्याधाराः। वागादीन्द्रियाणा-

परिष्कारः

तथा च न प्रज्ञायेत्येतत् निषेधविधिरूपम्, प्रज्ञातव्यः विषयो न प्रज्ञातव्य इति भावः। वस्तुतः पूर्ववाक्येऽपि धिय इति विज्ञातव्यमित्येतद्विशेषणमेव। तस्यै इति धीविशेषणम्। तथा चतुर्थीप्रयोगः श्रुतिशैली।।

वक्तृजीवशरीरकेति। यद्यपि वाक्यानीमानि जीवमात्रापराणि; उपरि तद्यथा रथस्येति परमात्मपरमिति सुवचम् अथाप्यस्य केवलस्यानादेयत्वात् विशिष्टविवक्षा।

Sri Venkateswara Vedic University

स्युः। न प्रज्ञामात्राः स्युः। यद्वाप्रज्ञामात्रा न स्युः। न भूतमात्राः स्युः।। ८ ।।

दीपिका

आदाविन्द्रियं निषिध्येन्द्रियस्वामिनो यथा ज्ञातव्यत्वमुक्तं तथाऽन्तेऽप्याह न मनो विजिज्ञासीत मन्तारं विद्यात्। वाक्पर्यायवद्व्याख्येयम्।।

एवं सर्वेन्द्रियविषयसाक्षिणो ज्ञानमभिधाय प्रसङ्गात्सर्वानर्थमूलं संसारचक्रमिन्द्रियविषयाभ्यामितरेतरसापेक्षाभ्यां प्रवर्ततेऽन्यतराभावे च न प्रवर्तत इत्यभिप्रायवानाह ताः प्रकृताः संसारचक्रस्य मूलभूताः। वै प्रसिद्धाः। एताः प्रत्यक्षा अनुमेयाश्च।

दशैव। दशसंख्याका एव न त्वधिकाः। शरीरस्य सुखदुःखयोः स्पर्शस्य चावान्तरभावेन मनसश्च सर्वेन्द्रियेषु मन्तृत्वेन च भूतमात्रा वक्तव्याद्या विषयाः। अधिप्रज्ञं प्रज्ञानीन्द्रियाण्यधिकृत्य वर्तन्त इत्यधिप्रज्ञम्। दश दशसंख्याकाः प्रज्ञामात्रा वागादीनीन्द्रियाणि। अधिभूतम्। स्पष्टम्। यद्यदि हि प्रसिद्धा भूतमात्रा नामादिरूपा न स्युर्न भवेयुस्तर्हि न प्रज्ञामात्राः स्युर्न निर्विषयमिन्द्रियं भवति यद्वा पक्षान्तरे प्रज्ञामात्रा उक्तानीन्द्रियाणि न स्युर्न भवेयुः। न भूतमात्रा उक्ता भूतमात्राः स्युर्न भवेयुः।। ८ ।।

प्रकाशिका

मभावे नामादिसिद्धेरभावेन वागादिलक्षणप्रज्ञामात्राधीनसिद्धिकत्वात् नामादिभूत-मात्राणाम्;नामादिभूतमात्राणामभावे तद्व्यवहारफलप्रज्ञामात्राशब्दितेन्द्रिया-द्यनिष्पत्तेः। अतो ग्राह्यग्राहकोभयाधीनत्वात् सर्वलोकयात्रायाः नो एवैतन्नाना। नानाशब्दो विनार्थकः। एतत् ग्राह्यग्राहकजातं परस्परविनाभूतमित्यर्थः। न हि ग्राह्येण विनाकृतं ग्राहकं ग्राहकेण विनाकृतं ग्राह्यं कार्यक्षमं भवति। तस्मात् प्रज्ञामात्राशब्दितमिति भूतमात्रान्तर्गतमित्यर्थः।। ८ ।।

परिष्कारः

दश प्रज्ञामात्रा इति। अत्र एकादशेन्द्रियमध्ये त्वगिन्द्रियस्य तद्विषय भूतस्य स्पर्शस्य

Sri Venkateswara Vedic University

* प्रज्ञात्वावेदनविधिः *

न ह्यन्यतरतो रूपं किंचन सिध्येत्। नो एतन्नाना। तद्यथा रथस्यारेषु नेमिरर्पितः। नाभावरा अर्पिताः। एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः। प्रज्ञामात्राः प्राणेऽर्पिताः। स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः।

दीपिका

तत्र हेतुमाह अन्यतरत एकस्मात्प्रज्ञामात्राभूतमात्रयोर्मध्ये। हि यस्मात्। किंचन किमपि रूपं विषय इन्द्रियं न सिध्येत्। अयमर्थः। न हि विषयो विषयेणेन्द्रियं वेन्द्रियेणावगम्यते किंत्वन्द्रियेण विषयो विषयेणेन्द्रियमिति।।

ननु यदि विषयेन्द्रियमितरेतरसापेक्षं तर्ह्यस्य परस्परं विभिन्नत्वात्प्रज्ञाया अपि तन्निमित्तं विभेदः स्यात्तथा च यथा प्रज्ञायां सर्वाणि भूतान्येकं भवन्तीति प्रतिज्ञाव्याहता स्यादित्यत आह नो एतन्नाना, एतत्प्रज्ञामात्राभूतमात्रारूपं नाना भेदवन्नो नानात्वाभावं प्रतिज्ञाय तत्र दृष्टान्तमाह तत्तत्र। यथा दृष्टान्ते। रथस्य

विष्णुवेदाख्ययतिव्याख्या

दुःखात्मकमिदं सर्वमित्यपि प्रतिपद्यते।
सुखात्मके कथं तस्माद् व्यावर्तनमिहोच्यते।
न ह्यस्मादन्यतरतो रूपं किंचन सिध्यति।
उभयोरङ्गभावोऽस्ति करणानां पृथक् पृथक्।
एकाङ्गानां करादीनामन्याङ्गत्वं न दृश्यते।
प्राणाङ्त्वं च सर्वेषां करणानामिहेष्यते।
यतः प्रदर्शनपरं प्रज्ञाङ्गत्ववचस्त्विदम्।
यत एवं परात्मायं प्रत्यगात्मोक्तवर्त्मना।
तस्मात् कर्माणि संन्यस्य ब्रह्मनिष्ठो भवेदिह।

तद्यथेत्यादि।

एकाधारत्वमत्रोक्तमनूद्य रथनाभिवत्।

Sri Venkateswara Vedic University

प्रकाशिका

तद् यथा रथस्य...प्राणेऽर्पिताः। यथा रथस्य नाभौ रथचक्रमध्यवर्तिसरन्ध्रकाष्ठविशेषे अरशब्दिता अर्पिताः; अत्र नेमिशब्दितं वलयाकारं काष्ठं यथा अर्पितम्-एवं प्राणशब्दितपरमात्मनि प्रज्ञामात्राशब्दनिर्दिष्टाश्चेतना अर्पिताः। तेषु च भूतमात्राशब्दितग्राह्यग्राहकजातं सर्वं समर्पितमित्यर्थः।।

नन्वत्र प्रज्ञामात्राशब्देन, यद्धि भूतमात्रा न स्युः न प्रज्ञामात्राः स्युः, यदि प्रज्ञामात्रा न स्युः न भूतमात्राः स्युरिति पूर्ववाक्ये प्रज्ञामात्राशब्दनिर्दिष्टानां वागादीनां दशानामेव ग्रहणमुचितम्। न तु प्रज्ञात्माशया, 'यो वै प्राणः सा प्रज्ञा' इति व्यवहितकेवलप्रज्ञाशब्दनिर्दिष्टजीवपरत्वमिति चेन्न-पूर्ववाक्ये अन्योन्याधाराधेयभावप्रतिपादनदर्शनात्। तत्र प्रज्ञामात्राशब्दस्य वागादिपरत्वेऽपि इह प्रज्ञामात्राशब्दनिर्दिष्टस्य भूतमात्राश्रितत्वाप्रतिपादनात् प्राणशब्दितपरमा-त्माश्रितत्वस्यैव प्रतिपादनात् प्रज्ञामात्राशब्दो जीवपर एव। पूर्ववाक्ये बाधकबलात् प्रज्ञाशब्दस्य मुख्यार्थत्यागेऽपि इह मुख्यार्थत्यागे कारणाभावात्। यथाऽस्मिन् प्रकरणे, 'यावध्यस्मिन् शरीरे प्राणो वसति तावदायुः,' अथास्मिन् प्राण एवैकधा भवति, 'एदस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते' इति त्रिष्वपि वाक्येषु मुख्यप्राणपरमात्मजीवपरत्वेन भिन्नार्थकत्वम्; एवं 'प्रज्ञैवास्या एकमङ्गमुदूढम् इत्यत्र' (मुदूढम्,?) 'न हि प्रज्ञापेता वाङ् नाम किञ्चित् प्रज्ञापयेत्,' 'दशैव भूतमात्रा अधिप्रज्ञम्'इति वाक्येषु जीवमनइन्द्रियरूपार्थत्रयविषये दृष्टप्रयोगस्य प्रज्ञाशब्दस्य अर्थौचित्यानुसारेणैवार्थस्य वर्णनीयत्वात्। न चैकवचनान्तप्रज्ञाशब्दनिर्दिष्टस्य बहुवचनान्तप्रज्ञामात्राशब्देन परामर्शो न युक्त इति वाच्यम्-सद्विद्यायाम्, 'स्वमपीतो भवति' इत्येकवचनान्तशब्दनिर्दिष्टस्य जीवस्य, 'सति संपद्य न विदुः इति' बहुवचनान्तशब्देन निर्देशवदुपपत्तेः। एतत् सर्वं श्रुतप्रकाशिकायामिन्द्रप्राणाधिकरणे स्पष्टम्।।

परिष्कारः

प्रकृतोपासनोपास्याकाराणां मध्ये मुख्यप्राणस्य निरूपणं प्रथमं कृत्वा अथ जीवं तदन्तर्गतं ग्राह्यग्राहकैकीभावास्पदं निरूप्य तस्येतरवर्जनेनोपास्यत्वमुपवर्ण्य, तदुपासनमपि तद्विशिष्टपरमात्मोपासन रूपमेव कार्यमिति। स्वाभिमतव्यक्तये संप्रति

Sri Venkateswara Vedic University

न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्। एष ह्येवैनं साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवैनमसाधु कर्म कारयति

दीपिका

रथचक्रस्यारेषु नाभिप्रतिष्ठितेषु तीक्ष्णाग्रेषु काष्ठेषु नेमिररेभ्यो बहिर्देशवर्ति वर्तुलं काष्ठम्। अर्पितोऽरेषु वर्तत इत्यर्थः। नाभावन्तः काष्ठेऽक्षाधारच्छिद्रवति वर्तुले। अरा दीर्घाणि तीक्ष्णानि काष्ठानि। अर्पिताः प्रतिष्ठिताः। एवमेव तद्वदेव न त्वन्यथा। एता उपलभ्यमाना भूतमात्रा विषया नेमिस्थानीयाः। प्रज्ञामात्रासु, इन्द्रियेष्वरस्थानीयेषु। अर्पिताः प्रतिष्ठिताः। प्रज्ञामात्रा इन्द्रियाण्यरभूतानि प्राणे मुखनासिकासंचारिणि नाभिस्थानीयेऽर्पिताः प्रतिष्ठिताः। स प्राणोपाधिक एष प्राण एव प्रज्ञात्मा धीवृत्तौ प्रतिफलितः प्राज्ञः उपाधिविरहे प्रज्ञया नित्यया स्वयंप्रकाशयाऽवियुक्त आत्मा व्यापको व्यवहारावस्थायामस्मत्प्रत्यये व्यवहारयोग्यः। आनन्दः सुखैकस्वभावः। अजरो जरारहितः। अमृतो मरणरहितः स्वयंप्रकाशविज्ञानानन्दात्मस्वरूपः सर्वविक्रियाशून्य इत्यर्थः।।

नन्वेवंरूपस्यापि साध्यसाधककर्मभ्यामाधिक्यन्यूनते स्यातां समुद्रस्येवोदयास्तमयावित्यत आह न साधुना कर्मणा भूयान्।

विष्णुवेदाख्ययतिव्याख्या

अन्यतरतश्च बहुधा च न रूपं सिध्येत्। एतत् समर्थयति तद्यथेत्यादि श्रुतिः। यथा रथस्य नेमिररेष्वर्पितः अरा नाभावर्पिताः एवमेता भूतमात्रा नामादयः प्रज्ञामात्रासु वागादिष्वर्पिताः ताश्च प्रज्ञामात्राः प्राणेऽर्पिताः।

प्रकाशिका

स एष प्राज्ञ आत्मा आनन्दोऽजरोऽमृतः। प्रज्ञ एव प्राज्ञः। निरुपाधिकसार्वज्ञ्याश्रयः निरुपाधिकानन्दत्वाजरत्वाश्रयः।। **स न साधुना...कनीयान्।** पुण्यपाप-

परिष्कारः

तदधिकं परमात्मनमपि सदृष्टान्तं निरूपयितुमारभते तद्यथेति। 'मात्राशब्दः संघातैकदेशपर' इति श्रुतप्रकाशिका।। स एष प्राण एव प्रज्ञात्मेति पाठ एव

Sri Venkateswara Vedic University

तं यमधो निनीषते। एषः लोकपालः। एष लोकाधिपतिः। एष सर्वेशः

दीपिका

साधुना शास्त्रविहितेन कर्मणा पुण्यरूपेण न भूयान्नाधिको भवतीति शेषः नो एव नैव। असाधुना शास्त्रप्रतिषिद्धेन कर्मणा। कनीयान्कनिष्ठो न्यून इत्यर्थः। भवतीति शेषः। अयमर्थः। विक्रियावतो ह्यतिशयो दृष्टः समुद्रादेर्न तु विपरीतस्य गगनेऽदर्शनादिति।। साध्वसाधुकर्मणी आत्मानं न स्पृशत इत्यस्मिन्नर्थे हेतुमाह एष ह्येव हि यस्मादेवष एव प्राणप्रज्ञोपाधिक एव न त्वन्यः। एनं शरीराद्यात्मत्वाभिमानिनम्। साधु कर्म शास्त्रविहितं कर्म धर्मरूपम्। कारयत्ययस्कान्तवच्छरीर आविष्टः स्वयं निर्व्यापारस्तच्छरीराभिमानिनं विविधान्व्यापारान्कारयति। तमेनं प्रकृतं वक्ष्यमाणं यं प्रसिद्धं स्वर्गार्थिनम्। एभ्यः प्रत्यक्षेभ्यो लोकेभ्यः। उन्निनीषत ऊर्ध्वं नेतुमिच्छतीत्यर्थः। एष उ एव यथोक्त एव न त्वन्यः। एनं शरीराद्यभिमानिनम्। असाधु शास्त्रनिषिद्धं कर्म पातकं कारयत्यनिच्छन्तमप्यनुष्ठापयति। तं प्रियसुखमप्यनर्थार्थिनं यं प्रसिद्धं पातकिनमेभ्यः प्रत्यक्षेभ्यो लोकेभ्यो मनुष्यादिनिवासेभ्यः। अधो निनीषतेऽधो नेतुमिच्छतीत्यर्थः।

साध्वसाधुकर्मकारयितृत्वं स्वर्गनरकनयनार्थमित्युक्तं तदप्यस्य शरीरोपाधिरहितस्य चिन्मात्रस्य नियन्तृत्वशक्तिमात्रोपहितस्यान्तर्यामिणः प्रक्रान्तत्वादुपपन्नमित्याह एष स्वर्गनरकयोर्नेता। लोकपालो लोकानां साधूनां सुखेनासाधूनां दुःखेन च पालको रक्षको लोकपालः।।

तथा च लोकपालत्वं मन्त्र्यादिवत्स्यादित्यत आह एष उक्तो लोकपालः। लोकाधिपतिर्लोकानां रक्षकः। पित्रादिवदधिष्ठाय पालयतीति लोकाधिपतिः।।

विष्णुवेदाख्ययतिव्याख्या

स्वरूपज्ञापनार्थाय प्रारब्धैषोत्तरा श्रुतिः। स एष आत्मा आनन्दः अजरः अमृतः साधुना कर्मणा अश्वमेधादिभिः न भूयान् श्रेष्ठो भवति, असाधुना कर्मणा ब्रह्महत्यादिभिः न कनीयान् निकृष्टो भवति। एष आत्मैव यं पुरुषमन्वानुनेषति

Sri Venkateswara Vedic University

स म आत्मेति विद्यात्। स म आत्मेति विद्यात्।। ९ ।।

इति ऋग्वेदान्तर्गतकौषीतकिब्राह्मणारण्यकोपनिषदि तृतीयोऽध्यायः।।३।।

ब्राह्मणारण्यकक्रमेण अष्टमाध्यायः ।। ८ ।।

दीपिका

तथाऽपि संकुचितमैश्वर्यमस्य स्याद्राजादिवदित्यत आह एष उक्तो लोकाधिपतिः। सर्वेशः सर्वस्य निखिलस्य भूतभौतिकस्येशो नियन्ता सर्वेशः। स उक्तः सर्वेशत्वादिगुणः। मे ममेन्द्रस्य वक्तुः। आत्मा, अस्मत्प्रत्यये व्यवहारयोग्यो मामेव विजानीहीति मयोक्त आत्मा स्वरूपम्। इति विद्यादेवं जानीयात्। स म आत्मेति विद्यात्। व्याख्यातम्। वाक्याभ्यासोऽध्यायपरिसमाप्त्यर्थः।। ९ ।।

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यश्रीशंकरानन्दभगवतः
कृतौ ऋग्वेदान्तर्गतकौषीतकिब्राह्मणारण्यकोपनिषद्दीपिकायां
तृतीयोऽध्यायः।। ३ ।।

विष्णुवेदाख्ययतिव्याख्या

नुत्सते प्रेरयितुमिच्छति तमेनमसाधु कर्म कारयति। एष आत्मा लोकपालः लोकाधिपतिश्च सर्वेशश्च। इन्द्रः प्रतर्दनमित्येतदुक्त्वोपसंहरति एवं भूतः स ममात्मेति विद्यात्।

व्यावहारिकरूपं च पारमार्थिकमेव च।
प्रतिपाद्य महावाक्यनिगमार्थमिदं वचः।
समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
आत्मानं परमात्मानं जानीयादुक्तवर्त्मना।।

इति तृतीयोऽध्यायः।। ३ ।।

प्रकाशिका

कृतोत्कर्षापकर्षशून्य इत्यर्थः।।

एष ह्येव...उन्निनीषति। यं पुरुषमेभ्यो लोकेभ्यः ऊर्ध्वं भगवल्लोकं नेतुमिच्छति,

Sri Venkateswara Vedic University

प्रकाशिका

तं पुरुषं भगवल्लोकप्राप्तत्वे साधुकर्म कारयति। कर्मणां भगवल्लोकप्राप्त्युपयोगित्वञ्च तद्धेतुभूतविद्याविरोधिपापनिरसनद्वारा।।

एष ह्येवैनमसाधु...अधोनिनीषति। यं पुरुषमेभ्यो लोकेभ्यः अधःपातयितुमिच्छति, तमसाधु कर्म कारयति। यथा साधुकर्मणां ब्रह्मोपासननिष्पादनद्वारा उन्नयनहेतुत्वम्, एवमसाधुकर्मणामप्युपासनप्रतिबन्धद्वारा अधोनयनहेतुत्वम्। उक्तञ्च भगवता भाष्यकृता, 'पापस्य ज्ञानोदयविरोधित्वम्, 'एष एवासाधु कर्मकारयति तं यमधो निनीषति' इति श्रुत्याऽवगम्यते इति। विवृतञ्च व्यासार्यैः, 'कर्मणा-मुन्नयनहेतुत्वमुपासननिष्पादनरूपमिति तद्विपरीतमधोनयनमुपासनप्रतिबन्धनरूपमिति स्फुटतरमवगम्यते' इति।।

एष...सर्वेशः। लोकपालः लोकरक्षकः। अत्र व्यासार्याः, 'लोकाधिपतिः' लोकस्वामी। सर्वेशः सर्वनियन्ता। ननु 'पा रक्षणे' इति धातोः पतिशब्दः। तत् कथमत्र शेषिवाचित्वम्?उच्यते—न हि सर्वत्रावयवशक्तिरेव रूढिशक्तिरित्यस्ति। गमेर्डो इति व्युत्पत्त्या गोशब्दस्य सकलजङ्गमवाचित्वप्रसङ्गात्; स्थि- ताया गोः अवाचकत्वप्रसङ्गाच्च। अतः शेषिणि पतिशब्दो रूढः। अन्यथा, 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' इति पितुः संरक्षके पुत्रे पतिशब्दव्यवहारप्रसङ्गात्' इत्यूचुः।। स म आत्मेति विद्यात्। पूर्वोक्तगुणविशिष्टः स्वान्तर्यामीति प्रतिपत्तव्यः। यद्वा अस्मिन्नेव वाक्ये

परिष्कारः

श्रीभाष्य-भाष्यान्तराद्यादृतः; न तु स एष प्राज्ञ आत्मेति।।

एतमुपास्याकारान् सर्वान् क्रमेण प्रदर्श्य तावद्विशिष्टोपासनामेकेन वाक्येन विधत्ते स म आत्मेति विद्यादिति। मामित्यनेन पूर्वमस्मदर्थान्तर्यामिपर्यन्तग्रहणम् ; अन्यथा समनन्तरगुणानामपि हिततमोपासनकर्मत्वादेरिवानन्वयादिति विशदयितुं म आत्मेति विभज्य कथनम्। अतः शरीरात्मभावसंबन्धेनेन्द्रविशिष्टपरमात्मोपासनमेव विधित्सितमिति ध्येयम्।।

इति कौषीतक्युपनिषदि तृतीयाध्यायपरिष्कारः।

Sri Venkateswara Vedic University

प्रकाशिका

पूर्वोक्तत्वाष्ट्रहननादिकृतलेपशून्यत्ववक्तृत्वघ्रातृत्वादिगुणकजीवविशिष्टतया आयुष्ट्वेन्द्रियनिश्श्रेयसहेतुत्वशरीरोत्थापकत्वादिविशिष्टप्राणविशिष्टतया आनन्दत्वामृतत्वादिस्वरूपेण च विशिष्टस्य स्वात्मत्वेनोपासनं विधीयते। एवं सति अनेकोपासनविधानकृतवाक्यभेदशङ्काया नावकाश इति द्रष्टव्यम्। द्विरुक्तिरध्यायपरिसमाप्त्यर्था।

इदञ्च वाक्यं समन्वयाध्याये प्रथमपादे चिन्तितम्– 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्व' इत्यत्र मामिति शब्देन प्राणशब्देन च निर्दिश्यमान इन्द्र एव। इन्द्रप्रयुक्तस्य मामिति शब्दस्य तद्विषयत्वावश्यम्भावात् इति पूर्वपक्षे प्राप्ते– उच्यते। 'प्राणस्तथाऽनुगमात्।' प्राणः परमात्मा। परमात्मत्वसाध-कानन्दत्वादिमत्त्वेन तस्यास्मिन् प्रकरणे अनुगतत्वात्। 'स एष प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृतः' इति(हि?) श्रूयते। 'न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्।' त्वाष्ट्रवधादिना प्रज्ञातजीवभावस्येन्द्रस्य वक्तुः, 'मामेव विजानीहि' इति स्वात्मत्वेनोपदिश्यमानः नेन्द्रात् जीवादधिको भवितुमर्हतीति चेन्न– अस्मिन् प्रकरणे परमात्मसंबन्धिनां धर्माणां बहुत्वमुपलभ्यते। हिततमोपासनकर्मत्वम्, साध्वसाधुकर्मकारयितृत्वम्, 'भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः' इति अचेतनवर्गाधारचेतनवर्गाधारत्वमानन्दत्वमजरत्वममृतत्वं लोकाधिपतित्वम् एवमादयो हि धर्माः परमात्मसंबन्धिन उपलभ्यन्ते। अतो भूयो धर्मानुग्रहायास्य प्रकरणस्य परमात्मपरत्वमेव वक्तव्यम्। तर्हि इन्द्रस्य, 'मामुपास्स्व इति निर्देशः कथमुपपद्यत इत्यत्राह– 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्। य आत्मनि तिष्ठन् आत्मनोऽन्तरः' इत्यादिशास्त्रेण परमात्मानं स्वात्मानं दृष्ट्वा शरीरवाचिनाञ्च शब्दानां शरीरपर्यन्ततां ज्ञात्वा, मामुपास्स्वेत्युपदिष्टवान्। यथा हि साक्षात्कृतस्वात्मभूत-परमात्मतत्त्वो वामदेवः, 'अहं मनुरभवं सूर्यश्च' इति स्वात्मनि मन्वादि-भावमुपदिष्टवान्-न हि तत्र मन्वादिभावः स्वस्वरूपगतो वामदेवेनोपदिष्टः; अपि तु स्वात्मभूतपरमात्मगतः— तद्वदेवायमुपदेश इति भावः। जीवमुख्यप्राणलिङ्गान्नेति

Sri Venkateswara Vedic University

प्रकाशिका

चेन्नोपासनात्रैविध्यादाश्रितत्वादिह तद्योगात्। त्वाष्ट्रवध- वक्तृत्वादिजीवलिङ्गानाम् आयुः प्रभुत्वशरीरोत्थापकत्वेन्द्रियाश्रयत्वादीनां मुख्यप्राणलिङ्गानां चोपन्यासः किमर्थ इति चेत्– इन्द्ररूपजीवशरीरकतया प्राणरूपाचेतनशरीरकतया स्वरूपेण चोपासनार्थे चेतनाचेतनधर्माणां ब्रह्मधर्माणाञ्च कीर्तनम्। त्रिविधञ्चोपासनं प्रकरणान्तरेष्वप्याश्रितम्, यथा तैत्तिरीयके, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति स्वरूपेण, 'सच्च त्यच्चाभवत्' इति भोक्तृभोग्यलक्षणचेतनाचेतनशरीरकतया चोपासनम्। एवमिहाप्युपासनात्रैविध्यं युज्यत इति स्थितम्।।

इति कौषीतक्युपनिषदि तृतीयाध्यायप्रकाशिका।। ३ ।।

Sri Venkateswara Vedic University

अथ चतुर्थोध्यायः।

अथ गार्ग्यो ह वै बालाकिरनूचानः संपृष्ट आस। सोऽवसदुशीनरेषु स वसन्मत्स्येषु कुरुपञ्चालेषु काशिविदेहेष्विति। सहाजातशत्रुं काश्यमेत्योवाच।

दीपिका

पूर्वाध्याये पूर्वं प्रायेण प्राणोपाधिक आत्मोक्तस्तत्र च भवति कस्यचिद्विभ्रमः प्राण एव चैतन्यविशिष्ट आनन्दादिगुणक आत्मेति तद्भ्रमनिवारणार्थं प्राणात्सुषुप्तावस्थादपगतबाह्यचैतन्यात्परं चेतनमानन्दादिरूपमात्मानं विवक्षुः पूर्वोत्तरपक्षाभ्यां ब्रह्मविद्याया अमानित्वादिगुणानन्तरेणातिदुर्लभत्वं दर्शयितुमाख्यायिकामाह अथेत्यधिकारार्थः। गार्ग्यो गर्गगोत्रीय एतन्नामा। ह वै किल प्रसिद्धो, दृप्तत्वेन श्रुत्यन्तरे। बालाकिर्बालाकस्यापत्यम्। अनूचान आचार्यं वदन्तमनु स्वयमप्युच्चारयतीत्यनूचानोऽधीतवेद इत्यर्थः। संपृष्टः सम्यक्स्पृष्टः सर्वत्र प्रथितकीर्तिरित्यर्थः। आस बभूव। स प्रकृतो गार्ग्यः। अवसन्निवासमकरोत्। उशीनरेषुशीनरसंज्ञकेषु देशेषु। स वसन्संचरन्स्वकीर्तिकामः सर्वत्र पर्यटन्नित्यर्थः। मत्स्येषु मत्स्यसंज्ञकेषु। अवसिदत्येतद्वक्ष्यमाणवाक्यद्वये चानुवर्तते। कुरुपञ्चालेषु कुरुसंज्ञकेषु देशेषु पञ्चालसंज्ञकेषु।

विष्णुवेदाख्ययतिव्याख्या

गार्ग्यो ब्रह्मविदाचार्यो बालाकिर्ब्राह्मणोत्तमः।

अनूचान इत्यादि। स ब्राह्मणः अनूचान इति संस्पृष्टो बभूव। स बालाकिः स्वयं ब्रह्मज्ञ इति मत्वा सर्वविषयेषु ब्राह्मोपदेशार्थमवसत विषयेषु षट्सु।

राजानमुपसंगम्य स्वयमेवोक्तवानिदम्।
स्वाज्ञानाज्ञानदोषेण राजानमुपगम्य सः।।

प्रकाशिका

गार्ग्यो...आस। बलाकस्यापत्यं बालाकिः,गोत्रतो गार्ग्यः,अनूचानः अङ्गाध्यायी। 'अङ्गाध्याय्यनूचानः' इति स्मृतेः। संस्पष्टः सम्यक् विद्यया प्रख्यातः एवम्भूतस्सन्

Sri Venkateswara Vedic University

ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः। सहस्रं दद्मस्त इत्येतस्यां वाचि।

दीपिका

काशिविदेहेषु काश्युपलक्षितेषु विदेहसंज्ञकेषु। इत्येवं प्रकारेष्वन्यष्वपि त्रैवर्णिकनिवासदेशेष्ववसदित्यर्थः। स नानादेशनिवासी प्रथितकीर्तिर्गर्वाढ्यो गार्ग्यः। ह किल। अजातशत्रुं न विद्यते जात उत्पन्नो यदपेक्षया शत्रुः शात्रवः स्वस्य स्वेन वा सर्वत्र समबुद्धेः सोऽयं सार्थकनामधार्यजातशत्रुस्तम्। काश्यं काशिदेशाधिपतिम्। एत्य कदाचित्सभागतं प्राप्य। उवाचोक्तवान्।। गार्ग्योक्तिमाह ब्रह्मानुपचरित-ब्रह्मशब्दाभिधेयं ते तुभ्यमजातशत्रवे। ब्रवाणि यदि भवतोऽपेक्षा तदा वदानीत्यनेन प्रकारेणोवाचेत्यन्वयः। तमेवं वदन्तं गार्ग्यं ह किल। उवाचोक्तवानजातशत्रु-रजातशत्रुनामा राजा।।

विष्णुवेदाख्ययतिव्याख्या

अहं ते ब्रह्म ब्रवाणीत्युक्तवान्। ततोऽजातशत्रुस्तमित्युवाच ब्राह्मणोऽर्थ्यागत इति

प्रकाशिका

सो...इति। सः बालाकिः उशीनरेषु सत्त्वप्रचुरमत्स्यदेशेषु कुरुपाञ्चालेषु काशीविदेहेषु उवास(?) उषितवान्। इतिशब्दः प्रकारवचनः। एवञ्जातीयकेष्वन्येष्वपीत्यर्थः।।

स...उवाच। अजातशत्रुनामानं काशीराजमभिगत्योवाच।। किमिति?ब्रह्म ते ब्रवाणीति। **तं होवाच...धावन्तीति।** एतस्यामेव वाचि निमित्ते गवां सहस्रं प्रयच्छामि(मः?)।

परिष्कारः

समन्वयाध्याये चतुर्थपञ्चमे 'जगद्वाचित्वात्' इति सूत्रेण एतत्कौषीतकिश्रुतिगतस्य, 'यस्य वैतत् कर्म' इति कर्मपदस्यार्थनिर्धारणात् तदधिकरणं कौषीतकिबाला-क्यजातशत्रुसंवादमेव प्राधान्येनाधिकृत्य प्रवृत्तम्; न तु बृहदारण्यकगतं तम्। स तु, 'अपि चैवमेके' इति तत्रैव सूत्रखण्डेन स्पृष्टः।

अनूचानः अङ्गाध्यायीति। अङ्गिभूतस्वाध्यायाध्ययनमर्थसिद्धम्।।१।।

Sri Venkateswara Vedic University

जनको जनक इति वा उ जना धावन्तीति। स होवाच बालाकिः। य

दीपिका

[आदित्ये बृहच्चन्द्रमस्यन्नं विद्युति सत्यं स्तनयित्नौ शब्दोवायाविन्द्रो वैकुण्ठ आकाशे पूर्णमग्नौ विषासहिरित्यप्यसु तेज इत्यधिदैवतमथाध्यात्ममादर्शे प्रतिरूपछायायां द्वितीयः प्रति श्रुत्कायामसुरिति शब्दे मृत्युः स्वप्ने यमः शरीरे प्रजापतिर्दक्षिणेऽक्षिणि वाचः सव्येऽक्षिणि सत्यस्य।।]

अजातशत्रूक्तिमाह सहस्रं गवां सहस्रम्। दद्मो वयं राजानोऽल्पेऽपि कार्ये प्रभूतं प्रयच्छामः किमुत त्वादृशानामित्यर्थः। ते तुभ्यं ब्राह्मणाय ब्रह्मविदे दानपात्राय। नेयं ब्रह्मविद्याया दक्षिणा किं त्वित्येतस्यामिदानीमुक्तायां वाचि ब्रह्म ते ब्रवाणीत्येवंरूपवाङ्मात्रनिमित्तम्। जनक एतन्नामा मिथिलेश्वरो ब्रह्मविद्यायाः ससाधनाया दाता जनकः स एव ब्रह्मविद्यायाः प्रतिग्रहीता। इत्यनेन प्रकारेण तं ज्ञात्वाऽत्यर्थं वै प्रसिद्धाः। उ अपि जनास्त्रैवर्णिका धावन्ति गच्छन्ति। अयमर्थः। ब्रह्मविद्याया यो दाता वक्ताऽपि चेत्येवं वदन्तो जना मिथिलेश्वरमेत्य गच्छन्ति। अपि मां तादृशं ततोऽप्यधिकं वा न जानन्तीत्यनेन प्रकारेणोवाचेत्यन्वयः।

विष्णुवेदाख्ययतिव्याख्या

मत्वा। तर्हि अहं गवां सहस्रं ददानि, एतस्यां वाचि ब्रह्मज्ञानसंबन्धिन्यां निमित्तम्। जना जनको जनक इति धावन्ति। तस्माद् ब्रूहीत्युवाचाजातशत्रुः। ततः स बालाकिरुवाच।

प्रकाशिका

सर्वेऽपि ब्रह्मविदः,जनक एव ब्रह्म शुश्रूषुः दाता चेति जनकस्य समीपमेव धावन्ति। भवांस्तु मत्समीपमागत्य, ब्रह्म ते ब्रवाणीत्युक्तवान्। अनेनैव वाक्येन तोषिता वयं सहस्रं प्रयच्छाम इति भावः।।

परिष्कारः

जनको जनक इति द्विः प्रयोगेऽर्थविशेषमभिसंहितं दर्शयति जनक एव ब्रह्म शुश्रूषुः

Sri Venkateswara Vedic University

* *आदित्यब्रह्मोपासनम्* *

एवैष आदित्ये पुरुषस्तमेवाहमु पास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। बृहन्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्धेति

दीपिका

स उक्तः। ह किलोवाचोक्तवान्। बालाकिर्बालाकस्यापत्यम्। य एव प्रसिद्ध एव न त्वन्यः।

एष मादृशस्य प्रत्यक्षः। आदित्ये, आदित्यमण्डले। पुरुषः पुरुषकारश्चेतनः। तमेवोक्तस्थानस्थमेव न त्वन्यम्। अहं गार्ग्यो ब्रह्मवित्। उपासे विजातीयप्रत्ययशून्येन सजातीयप्रत्ययप्रवाहेण ब्रह्मेति साक्षात्कुर्वे। इत्यनेन प्रकारेणोवाचेत्यन्वयः। तमेवं ब्रुवाणं गार्ग्यं ह किलोवाचोक्तवान्। अजातशत्रुरेतन्नामा हस्तसंज्ञया निवारयन्। मा

विष्णुवेदाख्ययतिव्याख्या

य एष आदित्ये पुरुषः आदित्यमण्डले स्थितः तं ब्रह्म अहमुपास इति। ततोऽजातशत्रुरुवाच। एतस्मिन्नादित्ये पुरुषे ब्रह्मेति मा मां प्रति मा समवादयिष्ठाः मा संवदिष्ठाः संवादं मा कृथाः।

प्रकाशिका

स...उपास इति। आदित्यमण्डलान्तर्वर्तिनं पुरुषं ब्रह्मेत्यहमुपासे। अतः त्वमपि तमेवोपास्स्वेति भावः।।

तं ह...। मा मां प्रति एतस्मिन् आदित्यवर्तिपुरुषविषये संवादं मा कारय। अज्ञाते हि विषये संवादः कारयितव्यः। अयं तु ज्ञात एव। कथमित्यात्राह, 'बृहन् पाण्डरवासाः सर्वेषां भूतानां मूर्धेति वा अहमेतमुपास' इति।

परिष्कारः

दाता चेति।। अब्रह्मज्ञेन बालाकिना आदित्यपुरुषादयः षोडश क्रमेण ब्रह्मत्वेन कीर्त्यन्ते, य एवैष आदित्ये पुरुष इत्यादिना। ब्रह्म ते ब्रवाणीत्युपक्रमात् तमेवाहमुपासे

Sri Venkateswara Vedic University

वा अहमेतमुपास इति। स यो हैतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा भवति।

दीपिका

मा, आबाधायां द्विर्वचनम्। एतस्मिन्नुक्तपुरुषे। उक्तपुरुषोपदेशनिमित्तमित्यर्थः। आवयोर्ज्ञाने समाने सति संवादयिष्ठाः, त्वं गुरुरहं शिष्य इति गुरुशिष्योक्तिरूपं संवादं मा कारय। एतस्मिन्कार्यमाणे वयं बाधिताः स्यामः।।

ननु यद्यपि त्वं जानीष एनं पुरुषं तथाऽपि तद्गुणोपासनां फलं च न जानीष इत्यत आह बृहन्नभ्यधिकः पाण्डरवासाः शुक्लगुणोज्ज्वलवस्त्रश्चन्द्रमसः सूर्यसुषुम्नाडीरूपत्वात्। एतौ शास्त्रान्तरोक्तौ गुणौ सुर्येऽप्यविरुद्धौ। अतिष्ठाः सर्वाणि भूतान्यतीत्य तिष्ठतीत्यतिष्ठाः। सर्वेषां भूतानां निखिलानां स्थिरजङ्गमानां मूर्धा मस्तकम्। इत्यनेन प्रकारेण। वै प्रसिद्धः सर्वेषां ब्रह्मविदां निरभिमानिनाम्। अहमजातशत्रुः। एतं त्वयोक्तं पुरुषमुपास उपासनया साक्षात्कुर्वे। इतिरुक्त-पुरुषगुणपरिसमाप्त्यर्थः। स यो हैतमेवामुपास्ते। यः प्रसिद्ध उपासकः। ह किल। एतमुक्तगुणकं पुरुषम्। एवमुपास्ते, उक्तगुणोपासनया साक्षात्कुरुते। सः, अतिष्ठाः सर्वेषां भूतानां मूर्धा। व्याख्यातम्। भवति यद्गुणं ब्रह्मोपास्ते स्वयमपि तद्गुणो

विष्णुवेदाख्ययतिव्याख्या

आदित्यो ब्रह्मणा युक्तः स्वकार्ये संप्रवर्तते।
स्वातन्त्र्ये सति नैवेयं प्रवृत्तिरुपपद्यते।
न हि राज्ञि मृते राजनियुक्ताः स्वयमेव हि।
प्रवर्तन्ते स्वकार्येषु तस्मादस्तीश्वरोऽत्र हि।।

सोऽयमादित्ये पुरुषस्तमहमेवमुपासे बृहन्निति पाण्डरवासा इति सर्वेषां भूतानां

परिष्कारः

इति सर्वत्र ब्रह्मत्वेनोपासनं विवक्षितम्। अजातशत्रुस्तु यथावस्थितब्रह्मवेदित्वात् तदनभ्युपगमेन मा मैतस्मिन् संवादयिष्ठाः इत्याह।

Sri Venkateswara Vedic University

दीपिका

भवति। उपासनस्थानमेतन्न तु शुद्धं निरुपाधि ब्रह्मेत्युक्तं भवति।।

विष्णुवेदाख्ययतिव्याख्या

मूर्धा तिष्ठतीत्यर्थः इत्यहमुपासे। य एतं पुरुषमुपास्ते स सर्वेषां भूतानां मूर्धा तिष्ठा भवतीति।

प्रकाशिका

वैशब्दोऽवधारणे। बृहन् महान्। पाण्डराणि किरणरूपाणि वासांसि यस्य सः पाण्डरवासाः। आदित्यकिरणानां नानारूपत्वात् पाण्डरवासस्त्वमिति द्रष्टव्यम्। बृहदारण्यके बालाक्यजातशत्रुसंवादे बृहत्त्वपाण्डरवासस्त्वे चन्द्रधर्मतया उक्ते; इह तु आदित्यधर्मतया उक्ते इति विशेषः। अतिष्ठाः सर्वमपि कार्यमतिक्रम्य तिष्ठतीति अतिष्ठाः। सर्वेषां भूतानां मूर्धा श्रेष्ठः।।

तदुपासनस्यानुरूपं फलमाह स यो...भवति।

परिष्कारः

तदर्थश्च मद्विदितार्थसंवादानुकूलव्यापारवान् मा भूरिति। आदित्यपुरुषादितत्त्वं मया सुज्ञातम्। त्वया च तदन्यथा ज्ञातम्। अतः त्वदीयो वादः मदभिमतस्य संवादो न भवति। संवादापेक्षया च अन्यथा गृहीतांशत्यागेन वास्तवांशशिक्षायै भवेत् अपेक्षकस्याज्ञत्वे। अहं तु सम्यग् जानामि; त्वमेव त्वन्यथा गृहीतवानसि। अतो मम संवादसंवृत्तये त्वया न व्यापारितव्यमिति भावः। संवादं मा कारयेति। मदर्थस्य संवादः त्वत्तोऽधिगत इति मदुक्तये मा यतस्वेत्यर्थः। अज्ञाते हीति। अत्र वक्तव्यं बृहदारण्यकपरिष्कारे द्रष्टव्यम्। यद्वा संवादः संमतिः। विषयस्य मया अज्ञातत्वे हि त्वदुपदेशमङ्गीकुर्याम्; त्वञ्च मामङ्गीककारये :। ज्ञातत्वात्तु विपरीतार्थे तदुक्तं न संमन्येयेत्यर्थः।। ६ ।।

Sri Venkateswara Vedic University

* *चन्द्रब्रह्मोपासनम्* *

स होवाच बालाकिः। य एवैष चन्द्रमसि पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। सोमो राजाऽन्नस्याऽऽत्मेति ना अहमेतमुपास इति। स यो हैतमेवमुपास्तेऽन्नस्याऽऽत्मा भवति।

* *विद्युद्ब्रह्मोपासनम्* *

स होवाच बालाकिः य एवैष विद्युति पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। तेजस आत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते तेजस आत्मा भवति।

दीपिका

चन्द्रमसि चन्द्रमण्डले। सोमो राजा प्रियदर्शनो दीप्तिमान्। अन्नस्याऽऽत्मा। चतुर्विधस्यादनीयस्याऽऽत्मा कारणं स्वरूपं वा। फले तु तद्वान्भवतीति व्याख्येयम्।। विद्युति सौदामनीमण्डले। तेजस आत्मा तेजस्वीत्याद्यभिमानः।।

विष्णुवेदाख्ययतिव्याख्या

पुनरप्युवाच बालाकिः। य एष चन्द्रमसि वर्तमानः पुरुषः सुखरूपी अहं तं ब्रह्मेत्युपास इति। अजातशत्रुस्तमुवाच त्वमस्मिश्चन्द्रमसि पुरुषे मां प्रति ब्रह्मेति मा संवदिष्ठाः। अहं तं पुरुषं सोमो राजन्नस्यात्मेत्युपासे। तदुपासनफलं चाह-स अन्नस्यात्मा भवतीति। एवं सर्वत्र योज्यम्। विद्युति पुरुष इति बालाकिः। तमपि तेजस्व्यात्मेति प्रत्युवाच। तदुपासकः तेजस्व्यात्मा भवति।

प्रकाशिका

स होवाच...भवति। अन्नस्य व्रीहियवादिरूपौषधिवर्गस्य। आत्मा। प्रियत्वाद्वा, चन्द्रमसः सर्वरसात्मत्वेन तत्स्वरूपत्वाद्वा, अमावास्यायां चन्द्रस्य सर्वौषध्यनुप्रवेशश्रवणाद्वा चन्द्रस्य अन्नात्मत्वम्।।

तेजस्यात्मा तेजस्विस्वरूप इत्यर्थः। तेजस आत्मेति पाठेऽपि स एवार्थः।। शब्दस्यात्मा। स्तनयित्नुसहितस्य मेघस्य शब्दप्रधानत्वात् शब्दात्मत्वम्। शिष्टं

Sri Venkateswara Vedic University

* *स्तनयित्नुब्रह्मोपासनम्* *

स होवाच बालाकिः। य एवैष स्तनयित्नौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। शब्दस्याऽऽत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते शब्दस्याऽऽत्मा भवति।। १।।

* *आकाशब्रह्मोपासनम्* *

स होवाच बालाकिः। य एवैष आकाशे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। पूर्णमप्रवर्ति ब्रह्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिः नो एव स्वयं नास्य प्रजा पुरा कालात्प्रवर्तते।

दीपिका

स्तनयित्नौ मेघमण्डले। शब्दस्याऽऽत्मा ध्वनिवर्णभेदभिन्नस्य कारणं स्वरूपं वा।।१।।

आकाशे गगनेऽव्याकृते वा। पूर्णमप्रवर्तिक्रियाशून्यं ब्रह्म बृहत्सर्वस्मादप्यधिकं पूर्यते प्रजया पशुभिः। पूर्णे गुणोपासनफलं पुत्रगवादिपरिपूर्तिः।। अप्रवर्तिर्गुणोपासनफलमाहनो एव स्वयं प्रवर्तते। शतसंवत्सरकालात्पूर्वं स्वयमुपासको नो एव प्रवर्तते प्रमीयते। अस्योपासकस्य प्रजा तनयादिका। पुरा कालान्न प्रवर्तत इत्यनुवर्तते।।

विष्णुवेदाख्ययतिव्याख्या

ततो बालाकिः यः स्तनयित्नौ स्थितः पुरुषस्तमुपास इति। ततोऽजातशत्रुरहं तं पुरुषं शब्दस्यात्मेत्युपासे। तदुपासकः शब्दस्यात्मा भवति। य आकाशपुरुषस्तमुपास इति बालाकिः।।१।।

ततोऽजातशत्रुः स आकाशपुरुषः अप्रवृत्ति पूर्णं ब्रह्मेत्यहमेतमुपासे। तदुपासकः प्रजया पशुभिश्च पूर्तये। पूर्णशब्दस्यार्थोऽयम्। स उपासकः स्वयं च अस्य प्रजा च कालात् पुरा नैव प्रवर्तते।

Sri Venkateswara Vedic University

* *वायुब्रह्मोपासनम्* *

स होवाच बालाकिः। य एवैष वायौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते जिष्णुर्ह वा अपराजयिष्णुः अन्यतस्त्यजायै भवति।

दीपिका

वायौ पवने। इन्द्रः परमैश्वर्यसंपन्नः। वैकुण्ठो विगता कुण्ठा परेण निवारणा यस्मात्स विकुण्ठः। विकुण्ठ एव वैकुण्ठः। अपराजिता सेना न परैः पराजिताऽपराजिता सेना।। इन्द्रगुणफलमाह जिष्णुर्ह वा जयनशीलः। ह प्रसिद्धौ वाशब्द एवकारार्थः।।

विष्णुवेदाख्ययतिव्याख्या

वायौ परुषो यः अहं तमुपास इति बालाकिः। अजातशत्रुर्मा मैतस्मिन्निति पूर्ववत्। अहं तं पुरुषं वायौ स्थितं वैकुण्ठ इन्द्रः अपराजिता सेनेति वोपासे। तदुपासको जिष्णुर्भवति। अपराजयिष्णुश्चान्यतो भवति।

प्रकाशिका

पूर्णत्वविशिष्टोपासनायाः फलम्, पूर्यते प्रजया पशुभिरिति। पूर्णत्वप्रयुक्त-निर्व्यापारत्वलक्षणाप्रवर्तित्वविशिष्टोपासनायाः फलम्, नो एव स्वयमित्यादि। स्वयमपि, तत्पुत्रपौत्रादिकं वा न शास्त्रानुशिष्टशतायुष्ट्वकालात् प्राक् अस्माल्लोकात् प्रवर्तते। नास्य सन्ततावपमृत्युर्भवतीत्यर्थः।।

इन्द्रः ईश्वरः। 'योऽयं पवते एष देवानां गृहाः' इति वायोर्देवलोकत्वप्रसिद्धेः लोकत्वेन वैकुण्ठसादृश्याद्वैकुण्ठत्वम्। मरुतां गणत्वप्रसिद्धेः सेना। जिष्णुः जयशीलः। अपराजिष्णुः अपराजितः। अन्यतस्त्यजायी। अन्यतो भवा अन्यतस्त्याः। शत्रव इति यावत्। तान् जेतुं शीलमस्य। 'सुप्यजातौ' इति णिनिः। शिष्टं स्पष्टम्।।

परिष्कारः

पूर्वमप्रवर्तीति। छान्दोग्ये गायत्रीविद्यायां(३-१२) मोक्षफलकं पूर्णत्वाद्युपास-नमुक्तम्। तत्राप्याकाशः प्राक् प्रस्तुतः; ब्रह्मतुल्यतया कीर्तितश्च।।

Sri Venkateswara Vedic University

*** *अग्निब्रह्मोपासनम्* ***

स होवाच बालाकिः। य एवैषोऽग्नौ पुरुषस्तमेवाहमुपास इति। तं होवाताजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। विषासहिरिति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते विषासहिर्हैवान्वेष भवति।

*** *अब्ब्रह्मोपासनम्* ***

स होवाच बालाकिः। य एवैषोऽप्सु पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। नाम्न आत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते नाम्न आत्मा भवति। इत्यधिदैवतम्। अथाध्यात्मम्।। २ ।।

दीपिका

वैकुण्ठगुणफलमाह अपराजयिष्णु परैर्जेतुमशक्यशीलः।। अपराजित-सेनागुणफलमाह अन्यतस्त्यजायी, अन्यतस्त्योऽन्यतो भवो वैरी तज्जयलक्षणं शीलमस्येत्यन्यतस्त्यजायी।

अग्नौ जातवेदसि। विषासहिर्विविधसहनशीलो दुःसहो वाऽन्यैः। हैवान्वेष भवति। ह प्रसिद्धम्। एष एव न त्वन्यः। अनूपासनादेव उपासको भवति। अप्सु जलेषु। नाम्नः स्वात्मनाम्नः। आत्मा स्वरूपं कारणं वा भवति। न च शाखान्तरप्रतिरूपगुणेन विरोधः। अस्ति हि सादृश्यं नाम्नो वस्तुना। तथा हि। घट इति वस्तु घट इति नामेति वाऽत्यन्तसादृश्योपलम्भात्। इत्यधिदैवतमनेन प्रकारेण

विष्णुवेदाख्ययतिव्याख्या

अहमग्नौ पुरुषमुपासे। सोऽपि न ब्रह्म। अहमेतं विषासहिरित्युपासे। तदुपासकः विषासहिर्ह इहानुभवत्येव। इत्येते पुरुषा अधिदैवतभूताः। अनन्तरमध्यात्ममुच्यते।।

प्रकाशिका

विषासहिः। सोढुमशक्यः शत्रुभिरित्यर्थः। मर्षयितेति वाऽर्थः।। नाम्नस्त्वात्मा। नामाधिष्ठात्री देवतेत्यर्थः। शिष्टं स्पष्टम्।।

* *प्रतिरूपपुरुषोपासनम्* *

स होवाच बालाकिः। य एवैष आदर्शे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। प्रतिरूप इति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायामाजायते[1] नाप्रतिरूपः।

दीपिका

दैवतमधिकृत्योक्तमधिदैवतम्। अथाधिदैवतोपासनानन्तरम्। अध्यात्ममात्मानं शरीरमधिकृत्योच्यमानमुपासनमध्यात्मम्।। २ ।।

आदर्शे दर्पणे भास्वरे द्रव्य इत्यर्थः। प्रतिरूपः सदृशो रोचिष्णुरित्यर्थः। प्रतिरूपो हैवास्य, उपासकस्य सदृशः प्रसिद्ध एव प्रजायाम्। प्रजायां संताननिमित्तम्। आजायते पुत्रः स्पष्ट उपपद्यते। नाप्रतिरूपो न विलक्षणः।

विष्णुवेदाख्ययतिव्याख्या

अनन्तरमध्यात्ममुच्यते। अधिदैवतेष्टौ पुरुषा ब्रह्मेत्युक्ता अजातशत्रुणा निरस्ताः। अध्यात्ममपि तावन्तः। प्रथममहमादर्शे पुरुषो ब्रह्म तमुपासे। अजातशत्रुस्तं पुरुषं चक्षुःप्रतिरूप इति तमुपास इति। तदुपासनाफलमाह। अस्योपासकस्य प्रजा पुत्र आत्मप्रतिरूपो भवति आत्मसदृश इत्यर्थः। अप्रतिरूपो न भवति।

प्रकाशिका

इत्यधिदैवतम्। अथाध्यात्मम्। देवतायामुपासनप्रकार उक्तः। आत्मन्युपासनप्रकार उच्यत इत्यर्थः।।

प्रतिरूपः। प्रतिबिम्ब इत्यर्थः। अस्य सन्ततावनुरूप एव पुत्रो जायते। नाननुरूपः। प्रतिबिम्बस्य कार्यकारणसंघातलक्षणात्मशब्दिताभिन्नत्वादध्यात्मान्तर्गतत्वमिति द्रष्टव्यम्।।

परिष्कारः

प्रतिरूपो हैवास्य प्रजेति। 'बिम्बादिवोत्थितौ बिम्बौ रामदेहात् तथा परौ' इत्युक्तरीत्या

---

१. स्वयमाजायते इति परिष्कारपाठः

Sri Venkateswara Vedic University

* *प्रतिध्वनिपुरुषोपासनम्* *

स होवाच बालाकिः। य एवैष प्रतिश्रुत्कायां पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवाद यिष्ठाः। द्वितीयोऽनपग इति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते। विन्दते द्वितीयात्। द्वितीयवान्भवति।

दीपिका

प्रतिश्रुत्कायां श्रवणं श्रवणं प्रत्यधितिष्ठतीति प्रतिश्रुत्का। द्वितीयो द्विसंख्यापूरणः। अनपगो गमनशून्यः।। द्वितीयगुणस्य फलमाह विन्दते लभते। द्वितीयाद्भार्या-शरीराद्द्वितीयमिति शेषः।। अनपगगुणस्य फलमाह द्वितीयवान्भवति। अनपगतपुत्रपौत्रादिर्भवतीत्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

ततो बलाकिः प्रतिश्रुत्कायां पुरुष इति ब्रह्मेत्युपासे तमजातशत्रुः द्वितीयोऽनपग इति तदुपासने द्वितीयां विन्दते द्वितीयवांश्च भवति।

प्रकाशिका

प्रतिश्रुत्कायां प्रतिध्वनौ। द्वितीयः पूर्वशब्दापेक्षया द्वितीयः। अनपगमः नापगच्छतीत्यनपगमः। द्वितीयाम् आत्मापेक्षया द्वितीयां भार्यां विन्दते लभत इत्यर्थः। द्वितीयवान् भवति। पुत्रेण द्वितीयवांश्च भवतीत्यर्थः। विन्दते द्वितीयमिति पाठे द्वितीयं पुत्रं विन्दते। अनपगमत्वोपासनाफलमुच्यते द्वितीयवान् भवतीति नित्ययोगे मतुप्। नित्यं पुत्रसहितो भवतीत्यर्थः।।

परिष्कारः

स्वप्रतिबिम्बवत् स्वप्रजा भवतीत्यर्थः। तत्र शरीरसाम्यमात्रं न विवक्षितम्; किन्तु सर्वांशतः इत्याशयेन अनुरूप एव पुत्रो जायते इत्युक्तम्।।

प्रतिश्रुत्कायामिति। प्रतिश्रुत्कापदेन प्रतिश्रुज्जनकदिग्ग्रहणं युक्तम्; श्रुत्यन्तरे समानप्रकरणे दिक्षु इति श्रवणात्।।

* शब्दपुरुषोपासनम् *

स होवाच बालाकिः। य एवैष शब्दः पुरुषमन्वेति तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। असुरिति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात्संमोहमेति।

* तमःपुरुषोपासनम् *

स होवाच बालाकिः। य एवैष च्छाया पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। मृत्युरिति वा अहमेतमुपास इतिः। स यो हैतमेवमुपास्ते नो एव स्वयं नास्य[1] प्रजा पुराकालात्प्रमीयते।। ३।।

दीपिका

शब्दः पुरुषमन्वेति। गच्छन्तं पुरुषं योऽयं ध्वन्यात्मकः शब्दः पश्चाद्गच्छति। असुर्जीवनहेतुरित्यर्थः। नो एवेत्याद्याकाशपर्याये व्याख्यातम्। संमोहमेति निधनं गच्छति। छायापुरुषश्छायारूपः। मृत्युर्मरणहेतु नो एवेत्यादिकमाकाशपर्याये व्याख्यातम्। प्रमीयते निधनं गच्छति।। ३ ।।

विष्णुवेदाख्ययतिव्याख्या

ततो बालाकिः य एष शब्दः पुरुषमन्वेति तमुपास इति । अजातशत्रुस्तमसुरित्यहमुपास इति। तदुपासनफलं चोवाच। उपासकस्तस्य प्रजा च कालात् पुरा न मरणेन संमोहमेति। स होवाच बालाकिः य एवैषश्छायापुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः मा मैतस्मिन् समवादयिष्ठाः। मृत्युरिति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात् प्रमीयते। ततो बालाकिश्छायायां पुरुषो ब्रह्मेत्युवाच। अजातशत्रुन्तं मृत्युरित्युवाच। उपासकश्च कालात् पुरा न प्रमीयते अस्य प्रजा च।। ३ ।।

प्रकाशिका

पुरुषमन्वेति। गुहादौ पुरुषशब्दानुकारिवर्णात्मकः प्रतिशब्द इत्यर्थः। असुरिति वा

---

१. न चास्य इति विष्णुयतिपाठः

Sri Venkateswara Vedic University

* *शारीरपुरुषोपासनम्* *

स होवाच बालाकिः। य एवैष शारीरः पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। प्राजापतिरिरिति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिः।

* *सुप्तपुरुषोपासनम्* *

स होवाच बालाकिः। य एवैष प्राज्ञ आत्मा येनैतत्पुरुषः सुप्तः स्वप्न्ययाचरति तमेवाहमुपास इति। तं होवाचाजाचशत्रुः। मा मैतस्मिन्संवादयिष्ठाः।

दीपिका

शरीरे भवः शारीरः। प्रजापतिः प्रजायाः पालकः। प्राजायते प्रजया पशुभिः। प्रजापशुवृद्धिर्भवति। सुषुप्तः प्राज्ञः प्रज्ञया नित्ययुक्तः प्राणोपाधिकः। आत्माऽऽत्म-शब्दप्रत्ययालम्बनम्। येन प्राज्ञेनाऽऽत्मना सहैकतायै। एतत्सुप्त एतत्स्वप्नदर्शन

विष्णुवेदाख्ययतिव्याख्या

बालाकिः शारीरः पुरुष इति। तमजातशत्रुः प्रजापतिरिति। उपासकः प्रजया पशुभिश्च प्रचीयते। ततो बालाकिः प्राज्ञ आत्मेति। येनात्मना सुप्तः स्वप्नया चरति तमहमुपास

प्रकाशिका

अहमेतमुपाम इति। तादृशशब्दस्य प्राणबललभ्यतया असुरित्युपासे इत्यर्थः। **नो...एति।** स्वयं वा तत्सन्ततिर्वा अकाले मूर्च्छां मरणं (वा?) न प्राप्नोतीत्यर्थः।।

मृत्युरिति वा इति। नीलत्वभयङ्करत्वादिमृत्युसादृश्यात् छायापुरुषस्य मृत्युत्वेनोपासनमिति द्रष्टव्यम्।।

शारीरः। शरीरे अहमित्यभिमन्यमानः पुरुषः शारीरः। तस्य पुत्रपौत्रादिलक्षण-प्रजोत्पादकत्वरक्षकत्वादिना प्रजापतित्वम्। प्रजया पशुभिः प्रजायते। प्रजया पशुभिश्च प्रकृष्टो जायत इत्यर्थः। शिष्टं स्पष्टम्।।

Sri Venkateswara Vedic University

यमो राजेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते।

दीपिका

रूपं शयनं प्राप्तः स्वप्न्यया चरति स्वप्नेन गच्छति स्वप्नाननुभवति। सर्वं निखिलं ह प्रसिद्धम्। अस्मा अस्योपासकस्य। इदं प्रत्यक्षादिप्रमाणैरुपलभ्यमानम्। श्रैष्ठ्यायाधिकत्वाय। यम्यते नियमेन प्रवर्तत इत्यर्थः।

प्रकाशिका

स होवाच...। प्राज्ञः जाग्रद्दशायां प्रज्ञाशाली अयमात्मा एतत्सुप्तः– एतत् सुप्तं यस्य–एतादृशसुप्तिविशिष्टस्सन्–उपरतबाह्येन्द्रिय इति यावत्–येन स्वप्नायाचरति येन मनसा विशिष्टस्सन् स्वप्नाय प्रवर्तते स्वप्नात्(स्वाप्नान्?) पदार्थान् पश्यति, तत् मनो ब्रह्मोपास इत्यर्थः। **यमः....।** सर्वेन्द्रिययमयितृत्वात् मनसो यमत्वम्,

परिष्कारः

स्वप्नायेत्यत्र स्वप्नयेति पाठान्तरम्। 'आङ्याजयारामेमुपसंख्यानम्' इति(७-१-३९) पाणिनीयवार्तिकात् स्वप्नेन्त्यत्र स्वप्नयेति अयाच्।

तन्मनो ब्रह्मोपास इति। ननु तमेवाहमुपासे इति पुल्लिङ्गतच्छब्दश्रवणात् प्राज्ञस्यात्मनो ग्रहणं युक्तम्। पूर्वोत्तरवाक्येषु च य एवैष इति यच्छब्दगृहीतस्यैव तमेवाहमुपास इति उपास्यत्वेन ग्रहणात् इहापि तादृशस्य प्राज्ञात्मन एवोपासिकर्मत्वे वर्णनीये मनस उपासनवर्णनं कथमिति चेत् –उच्यते। अस्ति विशेषः। तथा हि-- सर्वेष्वपि पर्यायेषु पुरुषविशेषाणामुपास्यत्वमुक्तम्। तद्वदिह, 'यः पुरुषस्तमेवाहमुपासे' इति न श्रूयते। प्राज्ञस्यात्मन उपासनान्वयस्तु स्यात्,यदि अनुपपत्तिर्न स्यात्। यद्ययं प्राज्ञ आत्मा परमात्मा, तर्हि तस्य ब्रह्मत्वं प्रामाणिकमिति तस्याब्रह्मत्वमजातशत्रुविवक्षितमयुक्तं स्यात्।

विष्णुवेदाख्ययतिव्याख्या

इति। तमाजातशत्रुर्यमो राजेति। तदुपासकः सर्वमिदमात्मोपासकाय श्रैष्ठ्याय यम्यत इति। ततो बालाकिर्दक्षिणेऽक्षिणि यः पुरुषस्तमुपास इति। तमजातशत्रुर्नामादीनां

प्रकाशिका

श्रैष्ठ्याच्च राजत्वं द्रष्टव्यम्। श्रैष्ठ्याय यम्यते। अस्य श्रैष्ठ्याय सर्वमपि भूतजातं यम्यते। यतत इति यावत्।।

परिष्कारः

अथ जीवात्मा, तर्हि, य एवैष शारीरः पुरुष इति पूर्वपर्यायान्नातिरिच्यते। किञ्च य एवैष इति यच्छब्दप्रतिसंबन्धी चेत् तमिति तच्छब्दः, तर्हि येनेत्यस्य कः प्रतिसंबन्धी। अतः य एवैष प्राज्ञ आत्मा, स एतत्सुप्तस्सन् येन मनसा चरति, तदुपासनमहं करोमीत्यच्यते। तमिति पुल्लिङ्गनिर्वाहः कथमिति चेन्न, मनसो मनः पदेनैव ग्रहणनियमाभावात्, येन करणविशेषेणेत्यर्थवर्णनसंभवादनुपपत्यभावात्। ननु प्रज्ञाशब्दस्य मनःपरत्वमत्र पूर्वाध्याये दृष्टम्। अतः प्राज्ञ आत्मेति मनोधिष्टातृदेवताविशेषो गृह्यताम्। येनेति पदमपि तत्परमेव। प्राज्ञ आत्मेत्यत्र प्रज्ञात्मेत्यपि पाठः स्यात्। बहुत्र तथा श्रवणात्। तथा च सुप्तः येन देवताविशेषेण स्वप्नाय चरति, एष प्राज्ञ आत्मा यः, तमुपासे इत्यर्थोऽस्तु। एवञ्च स इति पदानध्याहारः, एतेषां पुरुषाणां कर्तेति वक्ष्यमाणवाक्ये अस्यापि पुरुषत्वेन कीर्तनौचित्यञ्चेति चेत्– अस्तु कामम्। प्रकृतभष्यस्यापि तदर्थपरतायां नातीव क्लेश इति। ननु बृहदारण्यके शरीरात्ममात्रं कथितम्, न प्राज्ञात्मदक्षिणवामाक्षिपुरुषत्रयम्। अतस्तत्रोत्तक्तस्य शारीरात्मन एव चतुर्धा किञ्चिद्रूपेण विभाग इहाभिमतोऽस्तु। अतो न मनः परोऽयं प्रज्ञात्मपर्याय इति चेत् न अन्यत्रोक्तमेवात्र वक्तव्यमिति निर्बन्धाभावात्। अस्तु वा तमिति पदं येनेति प्रागुक्तमनोविशिष्टवेषेण जीवपरम्। तन्मनो ब्रह्मोपास इति भाष्यञ्च पुरुषविशेषणतया मनसोपि विवक्षादर्शकम्, न तु पुरुषस्योपास्यत्ववारकमिति।।

Sri Venkateswara Vedic University

* *दक्षिणाक्षिपुरुषोपासनम्* *

स होवाच बालाकिः। य एवैष दक्षिणेऽक्षन्पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। नाम्न आत्माऽग्नेरात्म ज्योतिष आत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति।

* *सव्याक्षिपुरुषोपासनम्* *

स होवाच बालाकिः। य एवैष सव्येक्षन्पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुः। मा मैतस्मिन्संवादयिष्ठाः। सत्यस्याऽऽत्मा विद्यत आत्मा तेजस आत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवतीति।। ४।।

दीपिका

दक्षिणेऽक्षन्दक्षिणेऽक्षणि दक्षिणे चक्षुषि। नाम्न आत्मा वर्णात्मकशब्दस्य कारणं स्वरूपम्। ज्योतिष आत्मा प्रकाशमात्रस्य स्वरूपम्। एतेषां नामाग्निज्योतिषां सर्वेषां निखिलानामात्मा भवति स्वरूपं भवति।

सव्येऽक्षन्सव्येऽक्षणि वामे चक्षुषि। सत्यस्य प्राणस्वरूपस्याऽऽत्मा स्वरूपम्। विद्युत आत्मा सौदामन्याः स्वरूपं तेजस आत्मा ज्योतिर्मात्रस्य स्वरूपम्। एतेषां सत्यविद्युत्तेजसां सर्वेषामात्मा भवति सर्वेषां स्वरूपं भवति। शेषं पर्यायपञ्चदशकेऽपि प्रथमपर्यायवद्व्याख्येयम्। इतिः पुरुषोपदेशपरिसमाप्त्यर्थः।।४।।

विष्णुवेदाख्ययतिव्याख्या

त्रयाणाम् आत्मेत्युवाच। तदुपासक एतेषां त्रयाणामात्मा भवति। ततो बालाकिः सव्येऽक्षिणि पुरुष इति। अजातशत्रुः सत्यादीनां त्रयाणामात्मेति तं पुरुषमुवाच। उपासकोऽपि तेषां त्रयाणामात्मा भवति। इत्युपसंहरति।। ४।।

प्रकाशिका

स ह...आत्मा भवति। दक्षिणाक्षिप्रतिबिम्बे नामाग्निज्योतिरात्मत्वदृष्टौ

Sri Venkateswara Vedic University

* *अनात्मज्ञं प्रति आत्मबोधनप्रकारः* *

तत उ ह बालाकिस्तूष्णीमास। तं होवाचाजातशत्रुः। एतावन्नु बालाका३ इति। एतावद्धीति होवाच बालाकिः। तं होवाचाजातशत्रुः। मृषा वै किल मा समवादयिष्ठाः। ब्रह्म ते ब्रवाणीति। स होवाच। यो वै बालाक

दीपिका

ततः सव्ये चक्षुषि पुरुषस्य निराकरणानन्तरम्। उ एव तदनन्तरमेव। ह किल। बालाकिर्बालाकस्यापत्यं तूष्णीमास मौनी बभूव। तं तूष्णीभूतं बालाकिम्। हावोचाजातशत्रुः। व्याख्यातम्।।

राजोक्तिमाह एतावदियत्प्रमाणम्। नु वितर्के। उतान्यदपीत्यर्थः। बालाका३इ। हे बालाके। प्लुतिर्निर्भर्त्सनार्था। यद्यप्ययोग्यं ब्राह्मणस्य भर्त्सनं तथाऽपि गर्वपरिहारार्थं क्रियमाणं न विरुद्धम्। गर्वो ह्यस्य महान्तं पुरुषार्थं नाशयन्कण्टकः कण्टकोद्धरणं च राज्ञा करणीयमिति न्यायात्। इत्यनेन प्रकारेण राजोवाचेत्यन्वयः। एवं राज्ञोक्तेऽपगतगर्वः। एतावद्धि, इयदेवोक्तं नातोऽधिकमहं किंचिद्ब्रह्म वेद्मीति शेषः। इति होवाच बालाकिः, एवं किलोक्तवान्बालाकस्यापत्यम्। तमपगतगर्वं बालाकिम्। होवाचाजातशत्रुः। व्याख्यातम्। मृषा वै किल मा मामजातशत्रुम्। मृषा वै वितथमेव किल निश्चितम्। समवादयिष्ठा ब्रह्म ते ब्रवाणीति। व्याख्यातम्।।

विष्णुवेदाख्ययतिव्याख्या

ततो बालाकिः स्वकल्पिते ब्रह्मणि राज्ञा निरस्ते सति तूष्णीं बभूव। तत्र बालाका इति प्लुतिर्निगृह्यानुयोगे चेति। एतावदेव भवता ज्ञातम्। किमिति अयदस्ति चेदुच्यतामिति। ततो बालाकिरुवाच। मया एतावदेव ज्ञातम्,ततः परं न।

प्रकाशिका

नामाग्निज्योतिरात्मत्वं भवति। सव्याक्षिप्रतिबिम्बे सत्यविद्युत्तेज आत्मत्वबुद्धौ सत्यविद्युत्तेज आत्मत्वं भवति।।

तूष्णीमास। उत्तरापरिस्फूर्तेरिति शेषः।।

एतावन्नु बालाक इति। हे बालाके! एतावदेव खलु ते विदितमित्यर्थः।।

Sri Venkateswara Vedic University

एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य इति। तत उ ह बालाकिः समित्पाणिः प्रतिचक्रम उपायानी नीति। तं होवाचाजातशत्रुः।

दीपिका

एवमुक्त्वा पुनर्बालाकेरर्वाग्वदनस्य लज्जाजडस्यापगतगर्वस्यानुग्रहार्थं सोऽजातशत्रुर्ह किलोवाचोक्तवान्बालाकिं प्रति।। राजोक्तिमाह यत्स्वा प्रस्तवितो ब्रह्मत्वेन। वै प्रसिद्धः सत्यज्ञानादिलक्षणः। बालाके हे बालाके। एतेषामादित्यादीनां पुरुषाणां त्वयोक्तानां पुरुषाणां कर्तोत्पादकः। यस्य वा यस्य प्रसिद्धस्य वेदान्तेषु। वाशब्दः पूर्वोक्तव्युदासार्थः। किमल्पाभिधानेनेत्यर्थः। एतद्भूतभौतिकरूपं विश्वम्। कर्म क्रियत इति कर्म। येनोत्पाद्यत इत्यर्थः। स त्वदुक्तपुरुषैः सह विश्वकर्ता। वै प्रसिद्धः सत्यज्ञानादिलक्षणः। वेदितव्यः साक्षात्करणीयः श्रवणाद्युपायैः। इत्यनेन प्रकारेण स होवाचेत्यन्वयः। तत उ तत एव राजोक्तेरनन्तरं ह किल बालाकिर्बालाकस्यापत्यं ब्रह्म जिज्ञासुः समित्पाणिः समित्करः प्रतिचक्रमे प्रतिचक्राम राजानं प्रति ब्रह्मोपदेशार्थं गृहीतोपायन आजगामेत्यर्थः। वाचा चैवं व्याहरन्। उपायानीति यदि भवतोऽनुज्ञा तदा भवन्तं गुरुत्वेन समीप आगच्छामीत्यनेन प्रकारेण प्रतिचक्रामेत्यन्वयः।

विष्णुवेदाख्ययतिव्याख्या

ततो राजोवाच त्वं ब्रह्म ते ब्रवाणि इत्युक्तवान् पूर्वम्। तन्मृषा किल संवदिष्ठा इति।

स्वाज्ञानाज्ञानदोषेण राजानमुपगम्य सः।
स्वाज्ञानदर्शनात्तूष्णीमुपविष्टो बभूव सः।

ततोऽजातशत्रुरुवाच। हे बालाके एतेषां त्वयोक्तानां पुरुषाणां यः कारयिता।

प्रकाशिका

एतावद्धीति। एतावदेव मे विदितमित्युवाचेत्यर्थः।।

मृषा वै...। ब्रह्म ते ब्रवाणीति मृषोक्त्या मां मृषैव संवादयिष्ठाः संवादं कारितवानसि। एतावन्तं कालमब्रह्मवाद एव प्रवृत इत्यर्थः।।

तर्हि किं तत् वेदितव्यं ब्रह्मेत्यत्राह स होवाच यो वै...वेदितव्य इति।

Sri Venkateswara Vedic University

प्रतिलोमरूपमेव तत्स्याद्यत्क्षत्रियो ब्राह्मणमुपनयेत्। एहि व्येव त्वा

दीपिका

तमपगतगर्वं ब्राह्मणं दीनतमामवस्थां प्राप्तं ह किलोवाचाजातशत्रुरुक्तवान्राजा।

प्रतिलोमरूपमेव विपरीतरूपमेव न त्वनुरूपं तत्स्याद्भवेत्। यत्क्षत्रियो न्यूनवर्णः क्षतत्राणकारी ब्राह्मणमुत्तमवर्णं द्विजोत्तममुपनयेद्ब्रह्मविद्यायै दीक्षयेत्।। मा च ते भयं यदसौ राजा न वक्ष्यतीत्येवमाह एह्यस्माज्जनसमाजादेकान्तमागच्छ। व्येव त्वा ज्ञपयिष्यामि त्वा त्वां गुरुं विज्ञपयिष्याम्येव यज्जानामि तत्तुभ्यं वदन्न

विष्णुवेदाख्ययतिव्याख्या

एतेषामिति वाक्येन ब्रह्मणोऽस्तित्वमुच्यते।

एतेषामिति वाक्येऽस्मिन्निजार्थोऽस्तीति गम्यताम्।

यस्य वैतदिति ह्युक्तेः पुनरुक्तिनिवृत्तये।

स वै वेदितव्यः यस्य पुरुषस्यैतत् सर्वं कर्म स ब्रह्मेति वेदितव्य इत्युपसंहरति।

ततो बालाकिस्तं राजानं पलाशदण्डपाणिः शिष्यो भूत्वा अहं त्वामुपायानीत्युपागतवान्। क्षत्रियो ब्राह्मणमुपनयेदित्येतत् प्रतिलोमरूपं स्यात्। तस्मादेहि आगच्छ ।

प्रकाशिका

वैशब्दोऽवधारणे। त्वया ब्रह्मत्वेनोपदिष्टानामादित्यादिपुरुषाणां यः कर्ता ते यत्कार्यभूताः; किं विशिष्याभिधीयते; यस्य प्रत्यक्षादिसन्निधापितं चिदचिद्रूपं समस्तं जगत् कर्म कार्यं क्रियत इति व्युत्पत्त्या कर्मशब्दः कार्यवचनः स एव वेदितव्यः; न तु त्वदुपन्यस्ता आदित्यादय इति भावः।।

तत उ...उपायानीति। उशब्दोऽवधारणे। हशब्दः प्रसिद्धौ।

परिष्कारः

मृषा वै किलेति। अज्ञस्त्वं कथमभिज्ञ इव मत्संमतिं प्रतीक्षितवानिति भावः।। एतेषां पुरुषाणां कर्तेत्यनेन सर्वदेवस्रष्टृचतुर्मुखग्रहणं मा भूदिति व्यष्टिसमष्टि-भूतसर्वप्रपञ्चहेतुपरब्रह्मग्रहणव्यक्तये यस्य वैतत् कर्मेत्युक्तम्।

Sri Venkateswara Vedic University

ज्ञपयिष्यामीति। तं ह पाणावभिपद्य प्रवव्राजा। तौ ह सुप्तं पुरुषमाजग्मतुः। तं हाजातशत्रुरामन्त्रयांचक्रे। बृहन्पाण्डरवासः सोम राजन्निति। स उ ह

दीपिका

वञ्चयिष्यामीत्यर्थः। इत्यनेन प्रकारेणोक्त्वाऽनन्तरं तं बालाकिं ब्रह्मविद्यार्थिनं ह किल पाणावभिपद्य करे सस्नेहं गृहीत्वा प्रवव्राज सभादेशाद्देशान्तरं जगाम। तौ राजबालाकी। ह किल सुप्तं पुरुषमाजग्मतुरनेककर्मश्रमाकुलं शयानं राजपुरुषं कञ्चिदयितुः प्राप्तवन्तौ। तं सुप्तं पुरुषं ह किलाजातशत्रुरेतन्नामा राजाऽऽमन्त्रयांचक्रे वक्ष्यमाणैर्नामभिः संबोधयाञ्चक्रे।।

संबोधननामान्याह बृहन्, हे सर्वस्मादप्यधिक प्राण। पाण्डरवासः पाण्डरा आपो वाससी यस्य ते प्राणस्य तस्य संबोधनं हे पाण्डरवासः प्राण। सोम हे सोमात्मक प्राण। राजन्हे दीप्तिमन्प्राण। इतिः संबोधनपरिसमाप्त्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

अहं त्वा ब्रह्म विज्ञापयिष्यामीत्युक्त्वा तं बालाकिः पाणिं गृहीत्वा प्रवव्राज तौ शिष्याचार्यौ भूत्वा कमपि सुप्तं पुरुषं जग्मतुः। ततोऽजातशत्रुस्तं पुरुषमामन्त्रयाञ्चक्रे

प्रकाशिका

एवमजातशत्रुणोक्तो बालाकिः गताभिमानो 'नीचादप्युत्तमां विद्याम्,' 'आपत्कल्पो ब्राह्मणस्याब्राह्मणात् विद्योपयोगः' इति शास्त्रमनुसृत्य क्षत्रियादप्यजातशत्रोर्विद्या-मुपादित्सुः, 'नानुपसन्नाय ब्रह्मोपदेष्टव्यम्' इति शास्त्रं जानन् समिद्भारहस्तः शिष्यस्सन्, उपगच्छामीति प्रववृते।। **प्रतिलोम...ज्ञापयिष्यामीति।** 'क्षत्रियो ब्राह्मणमुपनयेत्' इति यत्, तत् विपरीतरूपमेव स्यात्। अतः एहि त्वामुपनयनमन्तरेणैव ब्रह्म विज्ञापयिष्याम्येव।। **तं ह...प्रवव्राज।** तं बालाकिं पाणौ गृहीत्वा निर्गत इत्यर्थः।।

परिष्कारः

वाशब्दः एतेषां पुरुषाणां कर्तेति वाक्यकृतोपपादनानादारप्रदर्शनार्थः। बालाक्यधि-

Sri Venkateswara Vedic University

तूष्णीमेव शिश्ये। तत उ हैनं यष्ट्याऽऽविचिक्षेप। स तत एव समुत्तस्थौ। तं होवाचाजातशत्रुः। क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्वैतदभूत्। कुत एतदागा३दिति।। ५ ।।

दीपिका

स बृहन्नित्यादिना संबोधितः प्राण। उ हापि प्रसिद्धो यो जागर्ति ततोऽन्यो जीवोऽवस्थान्तरात्मत्वेन तूष्णीमेव मौनेनैव शिश्ये शयनं चक्रे।। तत उ तदनन्तरमेव। ह किल। एनं शयानं पुरुषम्। यष्ट्या वेत्रादितनुकाष्ठेनाऽऽविचिक्षेपाऽऽ-समन्तात्ताडितवान्। स शयानः पुरुषः प्राणाद्व्यतिरिक्तो यष्टिपातसंजातवेदनस्तत एव तदानीमेव न तु कालान्तरे समुत्तस्थौ सम्यगुत्थानं कृतवान्। तं होवाचाजातशत्रुः। तं प्राणात्मवादिनं बालाकिम्। व्याख्यातमन्यत्।।

एवं प्राण आत्मा न भवति यो जाग्रदपि न बुद्धवान्। क्व कुत्र। एष प्राणाद्व्यतिरिक्तः शयानः। एतत्सर्वचैतन्यशून्यं यथा तथा। बालाके हे बालाके। पुरुषश्चेतनः प्राणादीनां स्वामी। अशयिष्ट शयनमकुरुत क्व कस्मिन्प्रदेश एतदुक्तं शयनमभूज्जातम्।।

उक्तः प्रश्नः पुरुषविषयेऽपरोऽवस्थाविषये। पुरुषशयनयोर्देशं पृष्ट्वा पुरुषस्याऽऽगमनदेशं पृच्छति कुतः कस्माद्देशात्। एतज्जागरणं प्रत्येतदागमनं वा। आगादागतवान्प्लुतिर्विचारार्था। विचार्य कथयेत्यर्थः। इत्यनेन प्रकारेण प्रश्नमकरोदिति शेषः।। ५ ।।

विष्णुवेदाख्ययतिव्याख्या

आहूतवान्। हे बृहन् पाण्डरवासिन् सोम राजन्निति। ततः स पुरुषस्तूष्णीं शिश्य एव। ततोऽजातशत्रुस्तं सुप्तं पुरुषं यष्ट्याचिक्षेप च। ततः स उत्थितो बभूव। ततोऽजातशत्रुस्तं बालाकिमुवाच। हे बालाके अस्मिन् शरीरे एष पुरुषः क्वाशयिष्ट एतत् क्वाभूत्। एतत् कुत आगादिति बालाकिमपृच्छत्।। ५ ।।

Sri Venkateswara Vedic University

प्रकाशिका

तौ ह सुप्तं पुरुषमीयतुः। तौ बालाक्यजातशत्रू राजभवने सुप्तं कञ्चित् पुरुषं प्राप्तवन्तावित्यर्थः। बालाक्यधिकरणभाष्ये, 'तौ ह सुप्तं पुरुषमाजग्मतुः' इत्युदाहृतं वाक्यं बृहदारण्यकगतम्; नैतच्छाखागतम्। अत एव तत्र व्यासार्यैः, 'तौ ह सुप्तं पुरुषमीयतुः' इति श्रुतिः इत्युक्तम्।।

बृहन् पाण्डरवासः सोमराजन्। 'प्राणो वाव ज्येष्ठः श्रेष्ठश्च' इति ज्यैष्ठ्यश्रैष्ठ्यगुणेन प्राणस्य बृहत्त्वात् बृहन्नित्यामन्त्रणम्। पाण्डरवासस्त्वं च प्राणधर्मः। किं मे वासः' इति प्राणेन पृष्टे, 'आपो वासः' इति अपां प्राणवासस्त्वोक्तेः। तासाञ्चापाम्, 'यच्छुक्लम्, तदपाम्' इति शुक्लवर्णाश्रयत्वात् पाण्डरत्वं युक्तम्। सप्तान्नब्राह्मणे, 'अथैतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपमसौ चन्द्रः'इति प्राणस्य चन्द्रसंबन्धप्रतीतेः लक्षणया सोमेति प्राणस्य संबोधनम्। 'प्राणो वै सम्राट्' इति श्रवणात् राजन्नित्यामन्त्र्यत इति व्यासार्यैरुक्तम्।।

स उ ह तूष्णीमेव शिश्ये। अनुत्थित एव यथापूर्वमशयिष्टेत्यर्थः।।

तत उ हैनं यष्ट्या विचिक्षेप। सुप्तं यष्ट्या ताडितवानित्यर्थः।।

स तत एव समुत्तस्थौ। दण्डताडनादेव समुत्तस्थौ। न तु प्राणनामामन्त्रणादिनेत्यर्थः। प्राणनामभिरामन्त्रणेऽप्यनुत्थानप्रदर्शनं प्राणनयत्व-ज्ञापनार्थम्। सुषुप्तिदशायामुपरतव्यापारेभ्यः शरीरेन्द्रियेभ्योऽन्यत्वं सुज्ञानमपि; तस्यामपि

परिष्कारः

पुण्यरूपकर्मसत्त्वपरत्वाद् वाक्यस्य। अत एव तत्र, 'पुण्यापुण्यलक्षणं च कर्म यस्य' इति श्रीभाष्यम्। यस्य कर्मेत्यस्य यत्समवेतकृतिविषयभूतमित्यर्थः। क्रियमाणं सृज्यमानमेतत् सर्वं यस्येत्यन्वये तु जगत् यच्छेषभूतमित्येवं षष्ठ्या शेषत्वादिविवक्षाऽपि स्यात्। पूर्वोक्तोऽर्थः स्वरसः।।

प्रतिलोमरूपमिति। पण्डितरूपवेदनीयमित्यादाविव अतिशये रूपप्रत्ययः। अतीव प्रतिलोममित्यर्थः।।

Sri Venkateswara Vedic University

प्रकाशिका

दशायामनुपरतव्यापारात् प्राणादन्यत्वं ज्ञापनीयमिति। प्राणनामभिरामन्त्रणेऽप्यनुत्थानेन दण्डताडनोत्थानेन च जीवस्य प्राणव्यतिरेको दर्शितः।। एवं देहेन्द्रियमनः प्राणव्यतिरिक्तं जीवं प्रदर्श्य ततोऽतिरिक्तपरमात्मानं बोधयितुमाह **तं होवाच....।** हे बालाके! एष पुरुषः अशयिष्ट इत्येतत् क्व इति स्वप्नस्थानप्रश्नः। यद्वा, एतच्छब्दः स्वप्नपरः। अशयिष्टेत्येतत् प्रत्ययार्थमात्रपरम्। क्व एतत् स्वप्नमकृतेत्यर्थः। सर्वथा स्वप्नस्थानप्रश्नः क्व वा एतदभूदिति सुषुप्तिस्थानप्रश्नः। एतच्छब्दस्य नपुंसकलिङ्गत्वेऽपि प्रकृतवाचिप्रकृतिस्वारस्यात् प्रकृतपुरुषशब्दित-जीवपरः(रत्वम्?)। ततश्च क्व सुप्तोऽभूदित्यर्थः। कुत एतदागादिति। अत्राप्येतच्छब्दो जीवपर एव। प्रबोधकालीनजीवोद्गमनापादानं किमित्यर्थः। ततश्च जीवस्य स्वप्नस्थानसुषुप्तिस्थानोद्गमनापादानानि पृष्टानि भवन्ति। यद्वा— त्रिष्वपि प्रश्नेषु एतच्छब्दः सप्त म्यन्तः। एतस्मिन् काल इत्यर्थः। 'सुपा सुलुक्' इति सुपो लुक्। एतस्मिन् काले क्व स्वाप्नमनुभूतम्; एतस्मिन् काले क्व सुप्तः; एतस्मिन् काले कुतो निर्गत इति। एवञ्च त्रयाणामपि एतच्छब्दानामैकरूप्यञ्च सिध्यति।। ५ ।।

परिष्कारः

प्रवव्राजेति संन्यासे प्रसिद्धमपीह तावदविवक्षया प्रयुक्तम्।।

ननु बालाक्यधिकरणस्य कौषीतकिश्रुतिविषयकतायाः प्रागेवोक्तत्वात् तत्र च भगवता भाष्यकृता आजग्मतुरित्येव पठितत्वात् कथम् ईयतुरिति पठित्वा व्याख्यायत इत्यत्राह वालक्याधिकरणभाष्ये इति।।

बृहन् पाण्डरवासः सोमराजन् इति। अत्र कर्तव्यो विचारः सर्वः बृहदारण्यकभाष्यपरिष्कारयोर्द्रष्टव्यः। सम्राट् पदविषयश्च।।

यष्ट्या चिक्षेपेति। 'पाणिनापेषं बोधयाञ्चकार' इति बृहदारण्यकम्।। स्वप्नमनुभूतमिति पाठे 'संध्यं स्वप्नं तृतीयं स्थानम्' इति श्रुतिदर्शनात् क्लीबस्यापि साधुत्वं द्रष्टव्यम्।। ५ ।।

Sri Venkateswara Vedic University

* आत्मनः सर्वशरीरव्याप्तिः *

तत उ ह[१] बालाकिर्न विजज्ञे[२]। तं होवाचाजातशत्रुः। यत्रैष एतद्बालाके पुरुषोऽशयिष्ट। यत्रैतदभूद्यत एतदागादिति। हिता नाम हृदयस्य नाड्यो

दीपिका

तत उ अपि राज्ञा पृष्टं ह किल बालाकिर्बालाकस्यापत्यं न विजज्ञे न विज्ञातवान्। तमज्ञातस्वप्रश्नं बालाकिम्। होवाच एतदागादिति। व्याख्यातम्।।

स्वयं तद्देशविशेषमाह राजाहिता नाम प्राणिनां हितकारणाद्धिता इत्यभि- धानम्। हृदयस्य हृदयपुण्डरीकसंबन्धिन्यो हृदयपुण्डरीकान्निर्गता इत्यर्थः। नाड्यः शिराः।

विष्णुवेदाख्ययतिव्याख्या

बालाकिस्तन्न विज्ञातवान्। ततोऽजातशत्रुरुवाच। एष पुरुषो यत्र शयितः एतद्यत्राभूत् यत एतदागादिति तत् स्थानमहं ब्रवीमि। हिता इति प्रसिध्दा नाड्यः सन्ति।

प्रकाशिका

तदु ह बालाकिर्न विजज्ञौ। उत्तरं बालाकिर्न ज्ञातवानित्यर्थः।।

तं होवाचाजातशत्रुः यत्रेत्यादि। उच्यत इति शेषः।।

स्वप्नस्थानप्रश्नं प्रतिवक्ति हिता नाम..तदा भवति। आत्मनो हितावहत्वात् हिता इति प्रसिद्धाः हृदयसंबन्धिन्यो नाड्यः हृदयात् पुरीततं पुरीतदाख्यं हृदयान्तर्वर्तिमांसपिण्डविशेषमभिप्रस्थिता भवन्ति।

परिष्कारः

आसु तदा भवतीति। ननु जीवातिरिक्तपरमात्मप्रतिबोधनार्थे प्रवृत्तेन अजातशत्रुणा क्वैतदभूदित्यादि पृष्ट्वा व्याख्यानं क्रियताम्। स्वप्नस्थानं किमिति प्रथमप्रश्नः तद्विवरणञ्च व्यर्थम्,परमात्मनः सुप्तानाधारत्वात्,नाडीनामेव तथात्वात् परमा- त्मनिरूपणे तदनुपयोगादिति चेत्- उच्यते। 'य एतेषां पुरुषाणां कर्ता यस्य वै तत्

१.तदुह इति विष्णुवेदयतिपाठः २. विजज्ञौ इति विष्णुवेदयतिपाठः

Sri Venkateswara Vedic University

हृदयात्पुरीततमभिप्रतन्वन्ति। तद्यथा सहस्रधा केशो विपाटितस्तावदण्व्यः पिङ्गलस्याणिम्ना तिष्ठन्ति शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति। तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति। अथास्मिन्प्राण

दीपिका

हृदयाद्धृदयपुण्डरीकान्निर्गत्य पुरीततमान्त्रं हृदयवेष्टनमभिप्रतन्वन्ति सर्वतः प्रकर्षेण विस्तारयन्ति वेष्टयन्तीत्यर्थः। तद्यथा यावत्परिमाणा इत्यर्थः। सहस्रधा केशो विपाटितः। बालः सहस्रप्रकारेण विविधं पाटितः केशस्य सहस्रांश इत्यर्थः। तावत्तत्परिमाणा अण्व्यः सूक्ष्माः पिङ्गलस्य चित्रवर्णस्याणिम्नाऽणुतमेन रसेनातिसूक्ष्मेणेत्यर्थः। तिष्ठन्ति पूर्णा वर्तन्ते।।

सामान्यतो वर्णमुक्त्वा विशेषेण वर्णानाह शुक्लस्य श्वेतस्य। अणिम्नेति सर्वेषु वर्णेष्वनुवर्तते। कृष्णस्य कालस्य पीतस्य सुवर्णवर्णस्य लोहितस्य रक्तस्येत्येवंप्रकारस्य वर्णान्तरस्याप्यणिम्ना रसेन पूर्णास्तिष्ठन्ति। तासु हृदयवेष्टनपुरीतत्प्रतिष्ठितासु हृदयगमनमार्गभूतासु सामीप्येन तदा भवति तस्मिञ्शयनकाले वर्तते। न स्वप्नोऽन्यनाडीषु वर्तमानस्य भवतीत्यर्थः।।

विष्णुवेदाख्ययतिव्याख्या

ता नाड्यो हृदयात् पुरीतदिति प्रसिध्दं मां समभिप्रतन्वन्ति प्राप्नुवन्ति। ताः किं प्रमाणा इत्याह। केशः सहस्रधा विपतितो यावत् तावदण्व्यः अणुतरस्ताः पञ्चवर्णस्तिष्ठन्ते। तासु नाडीषु तदा स्वापकाले पुरुषो वर्तते। तस्मिन् काले सुप्तः पुरुषः कंचन स्वप्नमपि न पश्यति यस्मिन् काले प्राण एक एव भवति।

प्रकाशिका

हृदये पुरीतति नद्धा भवन्ति। ततश्च यथा केशस्यापि सहस्रधा पातः अतिसूक्ष्मः; तावदण्व्यः तथा अण्व्यः सूक्ष्माः पिङ्गलस्य शुक्लस्य कृष्णस्य पीतस्य लोहितस्य अन्नपीतादिरसस्य अणिम्ना लेशेन पूर्णाः तिष्ठन्ति। अतिसूक्ष्मत्वात् लेशेनापि पूर्णाः भवन्ति। तासु नाडीषु तदा स्वप्नकाले आश्रितो भवतीत्यर्थः।।

Sri Venkateswara Vedic University

एवैकधा भवति। तदैनं वाक्सर्वैर्नामभिः सहाप्येति। चक्षुः सर्वै रूपैः सहाप्येति। श्रोत्रं सर्वैः शब्दैः सहाप्येति। मनः सर्वैर्ध्यानैः सहाप्येति। स यदा प्रतिबुध्यते। यथाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठे रन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते। प्राणेभ्यो देवा देवेभ्यो लोकाः।

दीपिका

स्वप्नस्थानमभिधाय विस्तृतं सुषुप्तस्थानं सजागरणमाह यदा यस्मिन्काले। सुप्तः स्वप्नं न कंचन पश्यतीत्यादि लोका इत्यन्तं व्याख्यातम्। अयमर्थः। नाडीद्वारा पुरीतद्वेष्टनेऽनेकनाडीकारणे हृदयपुण्डरीके स्थिताकाशान्तर्वर्तिक्रियाशक्त्यु-पाधावानन्दात्मनि सुषुप्तिं प्राप्य तत एव जागरणमागच्छति स उपगताधाराधेयभेदो विज्ञानानन्दस्वरूपो ब्रह्मशब्दाभिधेयो न तु भवदभिमतः प्राणादिरधिदैवतमथाध्यात्मं चेति।।

विष्णुवेदाख्ययतिव्याख्या

उक्तार्थम्। तद्यथेत्यादि परमात्मानमाह।
एष ह्येवैनमित्यादौ यद्यप्येषोऽत्र वर्णितः।
तथापि विस्तरार्थोऽयमुच्यतेऽस्तित्वसिध्दये।
न हि कार्यं विना किंचित् कारणं जायतेऽत्र हि।

प्रकाशिका

सुषुप्तिस्थानप्रश्नस्योत्तरमाह **यदा सुप्तः...सहाप्येतीति।** सुप्तः वर्तमाने क्तः स्वपन् सन् यदा उपरतस्वप्नप्रदर्शनो भवति। यदाशब्दानुरोधात् तदाशब्दोऽध्याहर्तव्यः– अथ स्वप्नानन्तरम् अस्मिन् प्राणे प्राणशरीरके परमात्मनि एकधा भवति। एकधाभावो नाम–जाग्रदाद्यवस्थाजनितदेहात्माभिमानकृतरागद्वेषादिलक्षणकालुष्यादि-राहित्येनावस्थानम्। 'सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति' इत्यादौ प्राणशब्दस्य परमात्मनि प्रचुरप्रयोगात्, वाजसनेयके समानप्रकरणे, 'य एषोऽन्तर्हृदय

Sri Venkateswara Vedic University

प्रकाशिका

आकाशस्तस्मिन् शेते' इति आकाशशब्दितस्य सुषुप्त्याधारात्वश्रवणाच्च आकाशप्राणशब्दयोः परमात्मपरत्वमन्तरेणाविरोधासंभवात्, 'सता सोम्य तदा संपन्नो भवति' 'सति संपद्य न विदुः' 'प्राज्ञेनात्मना संपरिष्वक्तः' इति परमात्मनः सुषुप्त्याधारत्वस्य श्रुत्यन्तर(रे?) श्रवणाच्च प्राणशब्दो योगेन वा अपर्यवसानवृत्त्या वा ब्रह्मपरः। परमात्मनो बुद्धिस्थत्वात् अस्मिन् इति निर्देशोऽप्युपपद्यते। अथ (तदा?) तदुत्तरक्षण एव परमात्मानम् अपियन्तं जीवं वागादीन्द्रियाण्यपि (तत्) स्वकार्येण सहापियन्तीत्यर्थः। नामशब्दो नामाभिलपनपरः। रूपशब्दशब्दौ तज्ज्ञानौपयिकव्यापारपरौ। रूपशब्दादीनां सुषुप्तौ लयासंभवात्। इन्द्रियव्यापारोपरतेरेव सुषुप्तिशब्दार्थत्वात्।।

उद्गमनापादानप्रश्नस्योत्तरमाह **स यदा...लोकाः।** जीवप्रबोधदशायां अग्नेर्विस्फुलिङ्गा इव एतस्मात् परमात्मनः प्राणशब्दिता जीवा यथास्थानं प्रस्थिता भवन्ति। तेभ्यश्च देवशब्दितानि इन्द्रियाणि, एतेभ्यश्च लोकशब्दितानि ज्ञानानि भवन्तीत्यर्थः।।

परिष्कारः

कर्म इत्यनेनैव जीवविलक्षणे ब्रह्मणि उपदिष्टे सिद्धे सुषुप्तप्रतिबोधनाद्यर्था प्रवृत्तिरेव किमर्थेति विचारणीयम्। तदुच्यते। बालाकिः स्वोपासितान् परुषान् कीर्तयन् शारीरं पुरुषं जाग्रतं सुप्तञ्च पृथक् पृथक् निर्दिदेश। सुषुप्तं तु विजहौ। तेनायं मन्यते– जाग्रतः पुंसः सुप्तोऽन्यः, व्याघ्रवराहाद्यनेकाभिमानशालित्वात् सुप्तस्य। मन्यते हि स्वप्ने,व्याघ्रोऽहम्,महाराजोऽहम्,महाब्राह्मणोऽहमित्येवम्। सुषुप्तिकाले तु जीवस्य लीनत्वात् श्वासप्रश्वासरूपेण तदाऽवस्थितः प्राण एव सुषुप्तः स्यादिति तस्य पुरुषत्वाभावादेव सुषुप्तो न गणनीय इति। अतोऽयं बालाकिः प्रतिबोधनीयः, 'एक एवाऽऽत्मा जागरस्वप्नसुषुप्तीरनुभवति स्थानभेदेन। न च सुषुप्तः प्राणः। तथा सति प्राणनामभिरामन्त्रणे स उत्तिष्ठेत्। न चैवम्' इति। तत्र, 'यत्रैतत् सुप्तोऽभूत्,य एष विज्ञानमय' इति जाग्रत्सुप्तैक्यं दर्शितम्। जागरस्थानापेक्षयाऽतिरिक्तं नाडीस्थानं

Sri Venkateswara Vedic University

तद्यथा क्षुरः क्षुरधानेऽवहितः स्यात्। विश्वम्भरो विश्वम्भरकलायै। एवमेवैष प्राज्ञ आत्मेदं शरीरामात्मानामनुप्रविष्ट आ लोमभ्य आ नखेभ्यः।। ६।।

दीपिका

कथमसौ ब्रह्मशब्दाभिधेय उपलब्धुं शक्यत इति बालाकेर्हृदयगतां शङ्कामपाकरिष्यन्दृष्टान्तपुरःसरमाह तत्तत्रोपलब्धौ दृष्टान्तः। यथा दृष्टान्ते। क्षुरस्तीक्ष्णाग्रः प्रसिद्धः क्षौरकर्मणि। क्षुरधाने क्षुरो धीयते यस्मिन्पात्रे तत्क्षुरधानं तस्मिन्नवहितः प्रक्षिप्तः स्याद्भवेत्। अयं हृदयपुण्डरीके शरीरैकदेश उपलब्धौ दृष्टान्तः।। इदानीं सर्वशरीरोपलब्ध्यर्थं दृष्टान्तमाह विश्वंभरो वा विश्वंभरोऽग्निः। वाशब्दो दृष्टान्तान्तरे। विश्वंभरकुलायेऽग्निनीडेऽरण्यादौ। एवमेवानेनैव प्रकारेण। एष ब्रह्म ते ब्रवाणीति यो भवता प्रकृतः। प्रज्ञो नित्यस्वयंप्रकाशप्रज्ञायुक्तः। आत्माऽस्मत्प्रत्ययव्यवहारयोग्यः। इदं शरीरमिदं शरीरे भवमेतच्छरीरस्थेन्द्रियमित्यर्थः। आत्मानमात्मशब्दप्रत्ययावलम्बनम्। अनुप्रविष्टः सृष्टमनु प्रवेशं कृतवान्।। प्रवेशावधिमाह आ लोमभ्य आ नखेभ्यः। लोमनखपर्यन्तं नखाग्रशरीरबहिर्गत-केशान्मुक्त्वा समग्रे शरीर इत्यर्थः।। ६ ।।

विष्णुवेदाख्ययतिव्याख्या

जगत्कारणतस्तस्माद्विष्णुरस्तीति गृह्यताम्।
प्राणस्य सर्वाधारत्वं पूर्वमुक्तमपीर्यते।
प्रत्यगात्मत्वसिध्यर्थं तात्पर्यातिशयादिह।

अयमेव विशेषः। तत्र प्रत्यगात्मा तात्पर्यादेव गम्यते। अत्र साक्षात् सिध्दो भवति। तद्यथेत्यादि। यथा क्षुरधाने क्षुरोऽवहितः विश्वम्भरकुलाये विश्वम्भरो वावहितः तथैव एष पूर्वोक्तः प्राज्ञ आत्मा प्राणोऽस्मीत्युक्तः परमात्मा इदं शरीरं परिगृह्य सर्वानुत्थापयतीति पूर्वमुक्तम्। अत्र तु स प्राणः शारीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्योऽनु प्रविष्टो भवति।। ६ ।।

Sri Venkateswara Vedic University

** आत्मज्ञानेन मोक्षप्राप्तिः **

तमेतमात्मानमेत आत्मानोऽन्ववस्यन्ति। यथा श्रेष्ठिनं स्वाः। तद्यथा

दीपिका

स्वप्नसुषुप्तिजागरणेषु प्राणाद्व्यतिरिक्तमात्मानमभिधाय तस्य च सर्वस्मिञ्शरीरे

विष्णुवेदाख्ययतिव्याख्या

भोक्तृत्वस्य विशेषेण ब्रह्महेतुत्वमुच्यत।
अस्तित्वसाधकं ह्येतदेकमेवेति सिध्दये।

प्रकाशिका

तद् यथा क्षुरः....आ नखेभ्यः। क्षुरो धीयतेऽस्मिन्निति क्षुरधानं क्षुरकोशः। तस्मिन् यथा क्षुरः अवहितः पिहितप्रविष्टः, विश्वं बिभर्ति वैश्वानराग्न्यादिरूपेणेति विश्वंभरोऽग्निः तस्य कुलाये नीडे , एवमेवैष परमात्मा इदं पुरोवर्तिशरीरम् आलोमभ्यः आनखेभ्यः। व्याप्त इत्यध्याहारः। व्याप्त्या आत्मानं जीवात्मानमनुप्रविष्टः अन्तर्यामितयाऽनुप्रविष्ट इत्यर्थः। तादृशस्य सुषुप्त्याधारत्वोद्गमनापादनत्वे संभवत इति भावः। यद्वा इदं वाक्यं जीवशरीरपरमेव व्याख्येयम्। आत्मानमिदं शरीरम् आत्मत्वेनाभिमन्यमानमिदं शरीरम् आलोमभ्यः आनखेभ्यः जीवरूपेण प्रविष्ट इत्यर्थः।। ६ ।।

तमेतमात्मानमितर आत्मनोऽन्ववस्यन्ति। एतादृशं परमात्मानम् इतरे जीवाः अन्ववस्यन्ति अनुवर्तन्ते।।

परिष्कारः

प्राप्य स एव स्वप्नमनुभवति, परमात्मानं प्राप्य सुषिप्तिमित्युपदिष्टं भवति।।

यत्राग्नेरिति। अत्र, 'यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गाः' इति श्रीभाष्यपाठः।। अवहितः अधस्तात् निहितः, अन्तर्हित इति वा। शरीरमात्मानमित्युक्तयोर्भेदात् उभयोः अनुप्रविष्ट इत्यत्रान्वयायोगात् शरीरं व्याप्त आत्मानमनुप्रविष्ट इत्यध्याहारेण प्रथमयोजना।। ६ ।।

Sri Venkateswara Vedic University

श्रेष्ठी स्वैर्भुङ्क्ते। यथा वा स्वाः श्रेष्ठिनं भुञ्जन्ते। एवमेवैष प्रज्ञात्मैतैरा-

दीपिका

हृदये च सामान्यविशेषाभ्यां व्याप्तिं चेदानीं तस्यैव स्वामित्वं विवक्षुर्दृष्टान्तपुरःसरमाह- तमा लोमभ्य आ नखेभ्यः शरीरे सामान्यविशेषाभ्यां प्रविततम्। एतं बुद्धिसाक्षिणम्।

आत्मानमस्मत्प्रत्ययव्यवहाकरयोग्यं वस्तुत आनन्दात्मानम्। एतेऽपग ताधिदेवभेदा अध्यात्मं प्रत्यक्षा इव। आत्मानो वागाद्याः। अन्ववस्यन्ति, आत्मनो निश्चयमनु पश्चान्निश्चयं कुर्वन्ति।। तत्र दृष्टान्तमाह यथा दृष्टान्ते। श्रेष्ठिनं श्रेष्ठत्वं प्रधानत्वं स गुणो यस्यास्ति स तु श्रेष्ठी तं प्राधान्यवन्तं कुटुम्बिनमित्यर्थः। स्वाः स्वसंबन्धिनो ज्ञात्युपलक्षिता उपजीविकाः। अन्ववस्यनतीत्यनुवर्तते।।

निश्चये प्राधान्यमुक्त्वा भोगेऽपि प्राधान्यं वक्तुं दृष्टान्तमाह तत्तत्र भोगप्राधान्ये। यथा दृष्टान्ते। श्रेष्ठी कुटुम्बी स्वैर्ज्ञात्यादिभिः सह भुङ्क्तेऽन्नमत्ति।

विष्णुवेदाख्ययतिव्याख्या

तमेतं परमात्मानमन्ये प्रत्यगात्मादय आत्मानोऽन्ववस्यन्ति। यथा श्रेष्ठी स्वैः एवं वैतमात्मानमेत आत्मानोऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वाः।

प्रकाशिका

तत्र दृष्टान्तमाह यथा **श्रेष्ठिनं स्वाः।** यथा श्रैष्ठ्यवन्तं स्वाः ज्ञातयः अनुवर्तन्ते।।

तद् यथा श्रेष्ठी...। यथा कश्चित् प्रभुः भोगापकरणभूतैः स्वैर्ज्ञातिभिः भोगान् भुङ्क्ते यथा स्वाश्च बन्धवः तं प्रभुमैश्वर्यादिसमग्रमनुभूय तद्दत्तानि वित्तादीनि चोपजीव्य हृष्यन्ति– एवमेवायं परमात्मा स्वोपकरणभूतैर्जीवात्मभिलीलारसं भुङ्क्ते।

परिष्कारः

श्रैष्ठ्यवन्तमिति। श्रेष्ठिपदं वैश्ये रूढं तदर्थविवक्षयाऽप्यन्वयमर्हति। अथापि तथा विशेषग्रहणे कारणाभावात् श्रैष्ठ्यवन्तमित्यर्थवर्णनम्।।

तद्यथा श्रेष्ठीति। अत्र, 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्ति, एवमेवैष प्रज्ञात्मा एतैरात्मभिर्भुङ्क्ते, एवमेवैत आत्मान एनं भुञ्जन्ति' इति श्रीभाष्यपाठः।।

Sri Venkateswara Vedic University

त्मभिर्भुङ्क्ते। एवं वै तमात्मानमेत आत्मानो भुञ्जन्ति। स यावद्ध वा

दीपिका

यथा वा यद्वद्वाशब्दः प्रकारान्तरेण दृष्टान्तार्थः। श्रेष्ठिनं प्रधानं कुटुम्बिनं स्वा ज्ञात्याद्या भुञ्जन्त्यदन्ति। एवमेवानेन प्रकारेण न त्वन्यथा। एष प्रज्ञात्मा। व्याख्यातम्। ज्ञानक्रियाशक्त्युपाधिरित्यर्थः। एतैः प्रतिप्राणिव्यवस्थितैः। आत्मभिरात्मशब्द-प्रत्ययालम्बनैर्वागादिभिः सह। भुङ्क्तेति। अथ वा दृष्टान्तदार्ष्टान्तिकयोस्तृतीया करणार्था। न हि निर्मनुष्यकुटुम्बिनो द्रव्यवतोऽपि भोगः संभवति परैर्द्रव्यापहारादेः संभवात्। एवमसङ्गोदासीनस्य चितिस्वभावस्याऽऽत्मनोऽपि विना करणादिकं न भोगः। यथा श्रेष्ठी स्वैर्व्याख्यातम्। उत्पन्ने कार्ये प्रधानकुटुम्बी येन प्रकारेण स्वैर्ज्ञातिभिः सह पर्यालोच्यान्ववस्यत्येमेतैरात्मभिरयमात्मेति बहिरेवावगन्तव्यम्॥

तमेतमात्मानमित्यस्य प्रपञ्चार्थमाह एवं वा, अनेनैव यथा श्रेष्ठिनं स्वा इति वक्ष्यमाणेन प्रकारेण। एतमिन्द्रियाणामधिष्ठातारमात्मानमेत आत्मानो भुञ्जन्ति। यथा श्रेष्ठिनं स्वा व्याख्यातम्।

विष्णुवेदाख्ययतिव्याख्या

अस्तित्वसाधकं ह्येतदनुमानमिहोच्यते।
यथा राजा भटैः सार्धं भुङ्क्ते न स्वयमेव हि।
तथायं परमात्मापि न भुङ्क्ते स्वयमेव हि।
भोगमभ्युपगम्यास्य साध्यतेऽस्तित्वमत्र हि।

प्रकाशिका

ते चाऽऽत्मानः परमात्मदत्तभोगोपकरणाः सर्वैश्वर्यायुगुणविशिष्टं तमनुभूय हृष्टा भवन्तीत्यर्थः। यथा वा स्वाः श्रेष्ठिनं भुञ्जन्तीति पाठे, यथा प्रधानपुरुषः स्वकीयैर्भृत्यादिभिः भोगसाधनानि उपहरद्भिः हेतुभिः भोगान् भुङ्क्ते, यथा च भोगसाधनानि उपहरन्तः प्रधानपुरुषं पालयन्ति– एवमित्यर्थः। 'भुज पालने' इति भुजेः परस्मैपदित्वादिति ध्येयम्। ईदृशं भोक्तृत्वं जीवद्वारा वा परमात्मनि योजनीयम्॥

Sri Venkateswara Vedic University

दीपिका

अत्राऽऽद्यन्तपर्याययोः सामान्यविशेषाभ्यां पुनरुक्तिपरिहारः। अथवा श्रेष्ठिनं स्वा इत्यस्य दार्ष्टान्तिक एवं वा इत्यादिः। न त्वात्मनो निश्चयमन्तरेणोपभोगः कर्तुं शक्यः। अस्मिन्पक्षे यथा श्रेष्ठी स्वैर्यथा श्रेष्ठिनं स्वा इति वचनद्वयं निगमनार्थत्वेन व्याख्येयम्। अथवा निश्चयो द्व्यात्मको भवति। आपत्कालीनोऽनापत्कालीनश्च। तत्रानापत्कालीनः प्रधानबुद्ध्यनुसारी निश्चयो मृगयायां मन्त्रिणा तादृशं हृदि निधाय तमेवमात्मानमिति प्रथममुक्तम्। आपत्कालीनस्तु बन्धुभिः सह कुटुम्बिनः कुटुम्बिना सह बन्धूनां च विचार्य भवति तादृशमङ्गीकृत्योक्तं यथा श्रेष्ठी स्वैरेवं वेत्यादि।

अस्मिन्पक्षे यथा वा श्रेष्ठिनं स्वा भुञ्जन्तीत्यस्यैवमात्मानं प्राणा भुञ्जन्त इति। इदं बहिरेवावगन्तव्यम्।।

अस्याऽऽत्मनो ज्ञानेन कस्य किं फलं जातमिति बालाकिशङ्कां व्यावर्तयितुमजातशत्रुराह स प्रसिद्धः प्रतर्दनस्य गुरुः। यावद्यावन्तं कालं ह किल श्रुतमस्माभिः पूर्वेभ्य इत्यर्थः। वै प्रसिद्धः प्रजापतिशिष्य एकाधिकशतवर्षब्रह्मचारी ब्रह्मविद्यार्थिम्। इन्द्रः परमैश्वर्यसंपन्नस्त्रिलोकीपतिः। एतं मयोक्तं सर्वेन्द्रियोपजीव्यम्।

विष्णुवेदाख्ययतिव्याख्या

ऋतं पिबन्तावित्यादौ दृष्टमेतच्छ्रुतावपि।
भोक्तारमिति दृष्टं हि स्मृतावस्तित्वसिध्दये।
लिङ्गमन्यदथोवाच श्रुतिरस्तित्वसिध्दये।
यथा राजभटा राज्ञः परिवेषादिकारिणः।
भोजयन्ते महाराजं तथात्मानः परात्मनः।
पूजादिदर्शनात्तस्मात् परात्मास्तीति गम्यते।
फलोक्त्याप्यस्तितां वक्ति श्रुतिरस्य परात्मनः।
ज्ञाने चाज्ञानकाले च विशेषो दृश्यते स्फुटम्।
ततोऽप्यस्ति परं ब्रह्म परमानन्दमद्वयम्।

Sri Venkateswara Vedic University

इन्द्र एतमात्मानं न विजज्ञे। तावदेनमसुरा अभि बभूवुः। स यदा विजज्ञे।

दीपिका

आत्मानमानन्दात्मानं न विजज्ञे विशेषेणायमसाविति न ज्ञातवान्। तावत्तावन्तं कालम्। एनमात्मज्ञानशून्यमिन्द्रम्। असुराः शास्त्रनिषिद्धार्थप्रवृत्ता वागादयो विरोतनादयो वाऽभिबभूवुरभिभवं पराभवं चक्रुः। सः, असुरैरभिभूतो यदा यस्मिन्काले 'य आत्माऽपहतपाप्माविजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाल्लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानाति' इति प्रजापतिवाक्यं सभायां श्रुत्वाऽनन्तरं विजज्ञे य एषोऽक्षिणि पुरुषो दृश्यत इत्यादेः प्रजापतेरुपदेशाद्विशेषेणायमसाविति ज्ञातवान्साक्षात्कृतवानित्यर्थः।

विष्णुवेदाख्ययतिव्याख्या

इन्द्रो यावदात्मानं न विजज्ञौ असुरस्तावत् परिभवं कुर्वन्ति। स यदा परमात्मानं विजज्ञौ ततोऽसुरान् हत्वा विजित्य देवानां श्रैष्ठ्यादि गतवानिन्द्रः।

प्रकाशिका

स यावत्...य एवं वेद। इन्द्रो ब्रह्मविद्यालाभात् प्रागसुरैः पीडितः इमां ब्रह्मविद्यां लब्ध्वा असुरहननेन विजयी सर्वदेवाधिपत्यं सर्वदेवश्रैष्ठ्यं स्वाराज्यशब्दिता-कर्मवश्यत्वलक्षणं च प्राप। अतोऽन्योऽप्येवं वित् सर्वभूताधिपत्यं सर्वभूतश्रैष्ठ्यं पापाहतिपूर्वकमकर्मवश्यत्वलक्षणं स्वाराज्यशब्दितं मोक्षञ्च प्राप्नोतीत्यर्थः।

व्यासार्यैस्तु 'सर्वान् पाप्मनोऽपहत्येत्यनेनापहतपाप्मत्वादिगुणाष्टक'मुक्तम्; जरादीनामपि पाप्मान्तर्गतत्वात्।' उक्तं हि वाक्यकारैः, 'स्युः पाप्मानःकालजरामृत्यु-शोकादयः संख्याततत्वात् इति। स्वाराज्यम् स्वाधीनत्वम्। अतः सत्यकामत्वं सत्यसंकल्पत्वञ्चोक्तं भवति। अतः(तत्?) स्वाराज्यं संसारिभ्योऽस्य श्रैष्ठ्यरूपम्

परिष्कारः

अन्योऽपि य एतामिति। इदं य एवं वेदेत्यभ्यासस्यार्थवर्णनमिव। अभ्यासस्य समाप्त्यर्थत्वं सर्वत्र प्रसिद्धमिहापि संभवति।

Sri Venkateswara Vedic University

अथ हत्वाऽसुरान्विजित्य सर्वेषां देवानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं परीयाय। तथो एवैवं विद्वान्सर्वान्पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्य-माधिपत्यं पर्येति य एवं वेद य एवं वेद।। ७।।

इति ऋग्वेदान्तर्गतकौषीतकिब्राह्मणाण्यकोपनिषदि चतुर्थोऽध्यायः।। ४ ।।

कौषीतकिब्राह्मणारण्यकक्रमेण नवमोऽध्यायः ।। ९ ।।

दीपिका

अथ तदा हत्वा निपात्यासुरानुक्तान्विजित्य विजयं प्राप्य त्रिलोकीं स्वाधीनां विधायेत्यर्थः। सर्वेषां निखिलानां देवानामग्न्यादीनां श्रैष्ठ्यं श्रेष्ठत्वं प्राधान्यम्। स्वाराज्यं स्वराजस्य भावोऽप्रतिहतेच्छत्वम्। आधिपत्यं गर्भदासानिव सर्वानधिष्ठाय पालयितृत्वमाधिपत्यं परीयाय सर्वतो गतवान्। तथो एव तद्वदेव न त्वन्यथा। एवं विद्वानवस्थात्रयातीतः प्राणादिभिराश्रयणीयोऽसङ्गोदासीनस्वभाव आकाश-वत्सर्वगतोऽपि शरीरे हृदये च सामान्यविशेषाभ्यामुपलभ्यमानचैतन्योऽपगतसर्वधर्म आनन्दात्माऽहमस्मीत्येवं ज्ञानवान्। सर्वान्पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यम्। भूतानां स्थिरजङ्गमानाम्। व्याख्यातमन्यत्। पर्येति प्राप्नोति। यः शमागिसाधनचतुष्टयसंपन्नः। एवं वेद, इन्द्रवदुक्तमात्मानं जानीते। य एवं वेद। व्याख्यातम्। वाक्याभ्यास उपनिषत्समाप्त्यर्थः।

विष्णुवेदाख्ययतिव्याख्या

ततो विद्वत्प्रशंसा। एवमेतद्ब्रह्मज्ञानं विद्वान् श्रैष्ठ्यं स्वाराज्यमाधिपत्यं च पर्येति। य एवं वेद इति।

इति चतुर्थोऽध्यायः।।

प्रकाशिका

आधिपत्यम्। अधिपतिः परमात्मा, 'सर्वस्याधिपतिः' इति श्रुतेः। तत्संबन्धि आधिपत्यम्। गुणाष्टकं हि ब्रह्मसंबन्धितया ब्राह्ममुच्यते, 'ब्राह्मेण जैमिनिः' इति। अतो ब्रह्मसंबन्धितया तत्साधर्म्यरूपं संसारिभ्यः श्रेष्ठतारूपं यत् स्वाराज्यम्,

Sri Venkateswara Vedic University

प्रकाशिका

फलमाप्नोतीत्यर्थः।।

एतत् प्रकरणं समन्वयाध्याये चतुर्थपादे चिन्तितम्। तत्र हि– 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्म स वै वेदितव्यः' इत्यत्र (यः?) आदित्यादिपुरुषाणां कर्ता, तत्कर्तृत्वनिर्वाहकञ्च पुण्यपापादिलक्षणं कर्म यस्यास्ति, स वेदितव्य इत्यर्थप्रतीतेः, कर्मशब्दस्य पुण्यपापयोः रूढत्वात्, सुप्तपुरुषागमनयष्टिघातोत्थापनादीनाञ्च जीवलिङ्गत्वात्, तद्यथा 'श्रेष्ठी स्वैर्भुङ्क्ते' इति वाक्यप्रतिपाद्यभोक्तृत्वपरिपाल्यत्वयोर्जीव एव संभवात् जीव एव प्रकरणप्रतिपाद्य इति प्राप्ते– उच्यते, 'जगद्वाचित्वात्'। 'यस्य वैतत्कर्म' इत्यत्र कर्मशब्दस्य यद्यपि पुण्यपापादौ रूढिरस्ति– तथापि चलनेऽपि रूढ्यविशेषेण रूढ्योः परस्परकलहायमानत्वेनार्थनिर्णयासामर्थ्यात्, एतच्छब्दस्य प्रत्यक्षादिसंनिधापितजगत्परत्वौचित्येन तत्समानाधिकृतकर्मशब्दस्यापि, क्रियत इति कर्मेति व्युत्पत्त्या जगद्वचनत्वमेवोचितम्। ततश्चायमर्थः— त्वदुक्तानामादित्यादिपुरुषाणां यः कर्ता, अन्ततो गत्वा, सर्वमपि जगत् यस्य कार्यम्, स एव वेदितव्यः। ततश्च नात्र जीवस्य प्रसक्तिः। यदि हि पुण्यापुण्यलक्षणकर्मसंबन्धी जीवोऽत्र वाक्ये प्रतिपाद्यः स्यात्– तदा आदित्यादिषु पुरुषवादिनं बालाकिमब्रह्मवादित्वेन प्रत्याख्यातवता अजातशत्रुणा स्वयमब्रह्मण उपदेश्यत्वासंभवात् (असामञ्जस्यं स्यात्?)। अतो नायं कर्मशब्दः पुण्यपापवचनः अपि तु जगद्वचनः।

परिष्कारः

जगद्वचनत्वमेवोचितमिति। नात्र कर्मपदं जगदित्यर्थकम्, अप्रसिद्धेः। अपि तु जगति एतत्पदेनोक्ते तद्गतकार्यत्ववाचि। तथा च भाष्यम् 'कृत्स्नस्य जगतः कार्यत्ववाचि' इति। एतच्छब्द एव सर्वजगत्परः। तद्गतकार्यत्वं कर्मेत्यनेनोच्यते, सर्वे यस्य कार्यमिति। एवकारेण पुण्यापुण्यपरत्वेऽनौचित्यातिशयो ज्ञाप्यते। तत्पक्षे हि पुरुषाणां कर्तेत्युक्तं कर्तृत्वं जीवे अस्वरसं पुरुषसृष्टिसंकल्पाश्रयत्वाभावात्,

Sri Venkateswara Vedic University

प्रकाशिका

'जीवमुख्यप्राणलिङ्गान्नेति चेत् तद् व्याख्यातम्।' यष्टिधातोत्थापनभोक्तृत्वादिजीवलिङ्गात्, 'अथाऽस्मिन् प्राण एवैकधा भवति' इति प्राणशब्देन प्राणभृतं निर्दिश्य तत्र करणग्रामस्यैकधाभावश्रवणात्, प्राणभृत्त्वस्य जीवलिङ्गात्वाच्च जीव एवात्र प्रतिपाद्यते। न च प्राणशब्दस्य मुख्यप्राण एवार्थः; प्राणनामभिरामन्त्रणाश्रवणेन मुख्यप्राणव्यतिरिक्तत्वस्य ज्ञापितत्वेन मुख्यप्राणस्य एतत्प्रकरणप्रतिपाद्यत्वासंभवेन प्राणशब्दस्य प्राणसहचरितजीवलक्षकत्वस्यैव युक्तत्वात्। ततश्च यष्ट्यादिजीवलिङ्गात् प्राणशब्दसंकीर्तनाच्च प्राणभृत् जीव एवात्र प्रतिपाद्यत इति चेत्– तत् व्याख्यातम्। प्रतर्दनविद्यायाम्, 'यत्र प्रकरणे ब्रह्मलिङ्गानि चिदचिल्लिङ्गानि चोपलभ्यन्ते, तत्र चिदचिल्लिङ्गानां चिदचिच्छरीरकान्वयसंभवात् चेतनाचेतन-शरीरकब्रह्मोपासनं विधीयते' इत्युक्तत्वात्। इहानन्यथासिद्ध-जीवलिङ्गमस्ति चेत्- तच्छरीरकब्रह्मोपासनार्थः तन्मध्यवर्तिजीवोपदेशः।

परिष्कारः

पुरुषोत्पत्तिपर्यवसायिपुण्यादिकर्मकर्तृत्वस्यैव तत्र सत्त्वात्। तावदर्थविवक्षायां यस्य स्वैतत्कर्मेति पुनरुक्तं स्यात्। यस्य कर्मेत्येबालमिति एतत्पदवैय्यर्थञ्च। वाशब्दश्चानन्वितः, चशब्दस्यैव युक्तत्वात्। एवमत्र भाष्ये, 'यद्यपि रूढिरस्ति, तथापि' इति प्रयोगस्वारस्यात् पुण्यापुण्ययोः रूढावप्यनतिसंमतिराविष्क्रियते, चलने रूढेरावश्यकत्वेन प्रकरणाद्यनुरोधेन कर्मत्वेन रूपेणैव तद्विशेषण-ग्रहणसंभवादिति।

प्राणशब्देनेति। अत्र प्रकरणे प्राणनामभिरामन्त्रणरूपं प्राणलिङ्गं प्रथममस्ति। पश्चात्, 'प्राण एवैकधा भवति' इति प्राणशब्दश्च। तत्र प्रथमस्य आत्मनि प्राणव्यतिरिक्तताज्ञापनार्थता पूर्वपक्षिणोऽपीष्टा। तेन प्राणव्यतिरेकसिद्धावपि जीवत्वं न सिध्यति। अतो द्वितीयग्रहणम् । ननु प्राणशब्दस्य जीवलिङ्गत्वेन वर्णनं पूर्वपक्षीष्टं चेत्, 'जीवलिङ्गान्नेति चेत्' इत्येतावदेवालमिति चेत्- सत्यम्। सूत्रकारः, 'जीवमुख्यप्राणलिङ्गान्नेति चेत्- न; उपासात्रैविध्यात्' इति प्रागुक्तसूत्रप्रत्यभिज्ञान-

Sri Venkateswara Vedic University

प्रकाशिका

अत्र च प्रकरणे उपक्रम एव, 'मृषा वै मा संवादयिष्ठाः' इति अब्रह्मवाद-प्रत्याख्यानदर्शनात् पापापहतिपूर्वकस्वराज्यरूपब्रह्मविद्यैकान्तफलेनोपसंहारात् प्रकरणस्य ब्रह्मपरत्वेन निश्चितत्वात् मध्ये जीवोपदेशस्तच्छरीरकतया ब्रह्मोपासनार्थ इत्यध्यवसीयत इत्यर्थः। 'अन्यार्थे तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।' यष्टिघातेन जीवसंबोधनं जीवातिरिक्तब्रह्मस्वरूपप्रतिबोधनार्थमिति जैमिनिराचार्यो मन्यते। कुतः? प्रश्नव्याख्यानाभ्याम् प्रश्नप्रतिवचनाभ्याम्। यष्टिघातेनापि जीवप्रतिबोधनानन्तरम्, 'क्वैष एतद्बालाके पुरुषोऽशयिष्टक्वैतदभूत् कुत एतदागात्' इति जीवसुषुत्याधारप्रश्नस्य, 'अथास्मिन् प्राण एवैकधा भवति' इति परमात्म-वाचिप्राणशब्देन प्रतिवचनदर्शनाच्च जीवातिरिक्तब्रह्मप्रतिबोधनशेषतयैव जीवोपन्यासः। न तु तस्यैव शेषितया। ननु, 'क्वैतदभूत्' इत्येतच्छब्देन न जीवोऽभिधीयते; येन तत्प्रतिपादनं परमात्मप्रतिपत्तिशेषभूतं स्यात्। अपि तु एतच्छब्देन करणजातमभिधीयते। एतत् करणजातं सुषुप्तौ क्व लीनम्; प्रबोधदशायां कुत उत्थितमिति प्रश्नः– 'अथास्मिन् प्राण एवैकधा भवति' इति प्राणशब्दनिर्दिष्टे प्राणभृति लय इति प्रतिवचनतात्पर्यञ्च किं न स्यादिति चेत्, तत्राह, 'अपि चैवमेके।'

परिष्कारः

संपत्तिसौकर्याय पूर्वपक्ष्याशयं जीवमुख्यप्राणलिङ्गादिति पूर्वशब्दप्रयोगेणानुवदतीति भाव्यम्। न हि प्राणस्य प्रकरणप्रधानप्रतिपाद्यता संभवति, 'तद्यथा श्रेष्ठी' इत्याद्युक्तभोक्तृत्वात्मत्वादेरनन्वयात्।

जैमिनिराचार्यो मन्यत इति। नन्वत्र पूर्वसूत्रे जीवशरीरकब्रह्मोपासनार्थं जीवोपदेश इति स्वमतं कथयन् सूत्रकारो यदि जैमिनिमतं पश्चात् निर्दिशति, तर्हि कतरदत्र ग्राह्यम्। द्वितीयपादे वैश्वानरविद्यायामग्निशरीरकपरमात्मोपासनार्थमग्निशब्द इत्युक्त्वा, 'साक्षादप्यविरोधं जैमिनिः'इति योगार्थपक्षमुपचिक्षेप। तत्र सूत्रकार-पक्षमेवादृत्य, जैमिनिमतप्रदर्शनं संभवदुदाहरणान्तरविषयतत्परिग्रहाभिप्रायेणेति वर्णयामः। न ह्यत्रापि तद्वत् स्थलान्तरे जीवोपदेशस्य जीवव्यतिरेकप्रदर्शनार्थ-

Sri Venkateswara Vedic University

प्रकाशिका

एके वाजसनेयशाखिनः प्रश्नप्रतिवचनयोः जीवसुषुप्त्याधारविषयत्वं स्पष्टमामनन्ति। 'य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्' इति 'य एषोन्तर्हृदय आकाशस्तस्मिन् शेते' इति च। अतो जीवप्रतिपादनस्य परमात्मप्रतिपादनशेषत्वात् परमात्मैवात्र प्रकरणे प्रतिपाद्यः; न जीव इति स्थितम्।।

परिष्कारः

ताव्युत्पादनायेह जैमिनिमतोक्तिरिति शक्यं वक्तम्; 'अपि चैवमेके' इति प्रकृतस्थल एव जैमिनिमतग्राह्यतायामुपष्ठम्भकवर्णनात्।

अत्र जैमिनिमतमेव तन्मतमिति चेत्, तर्हि पूर्वसूत्रमिदं सूत्रञ्च, 'तद् व्याख्यातम्' इति भागत्यागेन एकसूत्रतया प्रणेतव्यं भवेत् इति चेत्– उच्यते। अत्र पूर्वसूत्रेण जीवमुख्यप्राणोभयविषयेऽपि विशिष्टोपासनपक्ष उक्तः, अनेन सूत्रेण विशिष्टोपासनमुपेक्ष्य जीवादिव्यतिरेकप्रदर्शनार्थस्तदुपदेश इति पक्षान्तरमुच्यते इति केषांचिन्निर्वाहः इह प्रकाशिकायामादृतः। नन्वेवं कतरन्मतं ग्राह्यमिति शङ्का परिहार्येति चेत्– उच्यते। जैमिनिमतमेवेह सूत्रकारस्यापि गूढमभिमतम्। पूर्वसूत्रेण पक्षान्तरकथनञ्च तस्यापि स्थलान्तरे समादरणीयत्वमस्तीति ज्ञापनाय। वैश्वानराधिकरणे जैमिनिपक्षग्रहणं स्थलान्तरे उपयोगाभिप्रायेण; इह स्वपक्षग्रहणं तदभिप्रायेणेति विशेषः। तेन चेदृशसमाधानस्य प्रागेवोक्ततया पूर्वपक्षः प्रायो नोदियादिति ज्ञाप्यते। तदनन्तरञ्च तादृशं समाधानमिहासंभावितमिति पुनः पूर्वपक्षिशङ्कायां प्रकारान्तरेण समाधानं हृद्गतं जैमिनिकण्ठोक्तं प्रदर्श्यते। कथं तदिहासंभावितमिति चेत्– यत्र जीवादौ परमात्मावाचिशब्दसामानाधिकरण्यादिना परमात्मधर्मान्वयप्रतीतिः, तत्र विशिष्टविवक्षा। इह तु, र 'क्वैष तदाऽभूत् कुत एतदागात्,' 'एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते' इति व्यधिकरणनिर्देश एव लक्ष्यते। अतो विशिष्ठोपासनसंभावितमिति। एवं सूत्रद्वयेन पक्षद्वयनिर्देशश्च अधिकरणसारावल्यामपि दर्शितः–

परिष्कारः

'इत्थं जीवातिरिक्ते प्रकरणनियते तत्र यज्जीवमुख्य-
प्राणाख्यानं न तेन क्षतिरिह च तथा तद्विशिष्टेप्युपासा।
प्राणस्य प्राणभाजोऽप्यधिकरणतया वाजिवाक्योक्तरीत्या
ब्रह्मज्ञप्त्यै तदन्यप्रकथनमिति हि स्थापना सार्वभौमी' ।। इति।

अत्र श्लोके पूर्वार्धेन विशिष्टोपासनमुक्त्वा तद्विवरणमेवोत्तरार्धेन क्रियते। वाजिवाक्यम् अन्तर्यामिब्राह्मणम्। तृतीयपादे, 'ब्रह्मोच्यते' इति शेषः। तथा च अन्तर्यामिश्रुतिरीत्या इह प्राणजीवविशिष्टतया ब्रह्मोच्यत इति तदर्थः। एवं ब्रह्मज्ञप्त्यै तदन्यप्रकथनात् प्रतर्दनविद्यायामिवेहापि विशिष्टोपासनसंभवात् एषा स्थापना सार्वभौमीति चिन्तामणिव्याख्यानुसारेणार्थः।

चिन्तामणौ यथावस्थितवाक्यभ्रंशात् तत्र तत्र वाक्यान्तरप्रक्षेपशङ्कया अविश्वसनीयत्वमाशय्य प्रवृत्तायां पदयोजनायां पूर्वार्धे विशिष्टोपासन-रूपमेत-दधिकरणद्वितीयसूत्रमेयमुच्यते; तृतीयसूत्रप्रमेयमुत्तरार्धे। वाजिवाक्यं तावत् 'अपि चैवमेके' इति सूत्रखण्डविवक्षितं वाक्यम्; न त्वन्तर्यामिब्राह्मणम्। तथा च तत्र प्राणजीवकथनं जीवाधिकरणतया तदन्यभूतं ब्रह्मेति ज्ञापनार्थम्। अयमुत्कृष्टः परिहार इति तदर्थ इत्युक्तम्। तत् सिद्धम् एवमाद्यनुरोधादत्र, 'जीवोपदेशः तच्छरीरकब्रह्मोपासनार्थ इत्यध्ववसीयते' इति वर्ण्यत इति। अत्रेदं बोध्यम्– श्रीभाष्ये द्वितीयसूत्रस्य जीवविशिष्टब्रह्मोपासनतात्पर्यकत्वं नैव भाषितम्। प्राणशरीर-कब्रह्मोपासनमिह प्रकरणे संभवतीति तेन सूत्रेण कथ्यत इति पुनर्भाष्यसूक्तिमापाततः पठन्तः सर्वे संमन्येरन्। वस्तुतः सूक्तिशैलीमवदधानैरिदं सुज्ञानम्, यत् द्वितीयसूत्रभाष्यं 'तत्परतया वर्णनीयानीति' इत्यन्तेन समाप्तम्; ततः, 'प्रातर्दने हि' इत्यादि 'इत्यत्राह' इत्यन्तं तृतीयसूत्रावतरणभूतमिति। अतश्च प्राणशरीरकतया ब्रह्मोपासनमपि न भाष्यकृता द्वितीयसूत्रविवक्षिततया कण्ठोक्तम्। किन्तु तृतीयसूत्रोत्थानो-पयोगिशङ्काकृन्मुखेन संभवमात्रेणाऽऽविष्कृतमित्येतदेव। जीवविशिष्टोपासनं तु

Sri Venkateswara Vedic University

परिष्कारः

नतराम्। तर्हि द्वितीयसूत्रप्रमेयं किमिति चेत्- न विशिष्टोपासनं वाक्यविवक्षितमिति तत्प्रमेयम्; किन्तु ब्रह्मपरत्वस्य प्रकरणे निश्चिततत्वात् जीवादिलिङ्गं श्रूयमाणमपि तच्छेषतया नेयमित्येतदेव। तदेव भाषितम'तत्परतया वर्णनीयानि' इति। अत्र च श्रुतप्रकाशिका, 'न तूपासनार्थत्वमप्यतिदेष्टव्यमिति भावः' इति। अथ च, शेषतया वर्णनं नाम विशिष्टोपासनपरतया वर्णनान्नाधिकं भवेदिति कृत्वा तस्य प्राणविषये संभवेऽपि जीवविषये असंभवं विमृशता शङ्कायां क्रियमाणायाम् उपासनातिरिक्तप्रकारेण शेषतया वर्णनमुपपादयितुं तृतीयसूत्रमिति।

ननु तर्हि द्वितीयसूत्रे, 'तद् व्याख्यातम्' इति किमर्थम्? तद् विहाय द्वितीयतृतीयसूत्रयोरेकसूत्रतया पठनमेव पर्याप्तम्। न च प्रकृतस्थले प्रकारान्तरेण निर्वाहेऽपि उदाहरणान्तरे विशिष्टोपासनमपि भवतीति ज्ञापनार्थं सूत्रभेद इति वाच्यम्- - इन्द्रप्राणाधिकरणे विशिष्टोपासनपक्षस्योक्तत्वात् इह प्रकारान्तरेण निर्वाहे दर्शिते, यत्र यत्संभवः, तत्र तद्ग्रहणमित्यस्य ज्ञायमानतया पृथक्सूत्रवैयर्थ्यात्। अत एव प्राणविषये विशिष्टोपासनसंभवसूचनार्थे पृथक्सूत्रप्रणयनमित्यपि न मन्तव्यम्– इन्द्रप्राणाधिकरणमिदञ्च पश्यतां यथासंभवं तत्तद्ग्रहणस्य स्वतः सिद्धेरिति चेत्- - उच्यते। इन्द्रप्राणाधिकरणे, 'उपासात्रैविध्यात्' इत्युपासनपरतया निर्वाहस्य तत्र संभवाभिप्रायेण कथनेऽपि तदधिकरणस्य विशिष्टोपासनेनैव निर्वाहवर्णने न तात्पर्यम्; किन्तु यत्र यथा संभवति तत्र तथा शेषतया निर्वाहवर्णन एवेति ज्ञापनार्थमेव, 'तद् व्याख्यातम्' इति पठित्वा पृथक्कृतम्,अत्र संभवन्निर्वाहप्रकारोपपादनार्थञ्च तृतीयसूत्रम्। 'अन्यार्थं तु' इत्यस्यायमाशयः–प्रकरणस्य जीवपरत्वं शङ्कमानेन यथा तत्र प्राणनामभिरामन्त्रणादेः प्राणलिङ्गस्य प्राणातिरिक्ततया जीवज्ञापन-परत्वमाशय्यते, तथा ब्रह्मपरत्ववादिना जीवलिङ्गस्य जीवातिरिक्तब्रह्मज्ञापनपरत्वं हि सुवचमिति। एवञ्च, 'अथास्मिन् प्राण एवैकधा भवति' इति वाक्यम् अस्मिन् इति प्रकरणिनं परमात्मानं ब्रुवत् परमात्मनिष्ठे मुख्यप्राणे एकधाभावपरं वा,

Sri Venkateswara Vedic University

परिष्कारः

प्राणभृति एकधाभावपरं वा प्राणशरीरके परमात्मनि एकीभावपरं वा, 'प्राणस्य प्राणम्' इत्युक्तरीत्या पुष्कलप्राणनव्यापाराश्रये परमात्मनि एकीभावपरं वेति विमर्शे, अत्र स्वप्नोद्गमनयोरिव सुषुप्तावेकधाभावस्यास्य जीवकर्तृकताया एव स्वरसतः, 'यदा सुप्तः स्वप्नं न कथञ्चन पश्यति' इति वाक्यतश्च सिद्धत्वात् करणग्रामस्यैकधाभावो नात्र वर्ण्यत इति जीवकर्तृकएकीभावोऽयं परमात्मन्येवेति निश्चये जाते, प्राणशरीरकपरमात्मपरत्वमप्यौचित्यादुपेक्षितुं युक्तम्। समानप्रकरणे बृहदारण्यके, 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इत्यत्र आकाशशब्दो न हि भूताकाशविशिष्टपरमात्मवाची, भूताकाशे जीवशयनाभावात्। किन्तु आउसमन्तात् काशत इत्युक्तपरमात्मवाची। तद्वदिहापि प्राणशब्दो न मुख्यप्राणविशिष्टवाची; मुख्यप्राणे जीवस्यैकीभावाभावात्। किन्तु प्राणनव्यापारविशिष्ट परमात्मवाचीति पर्यालोचनसंभवात्। अस्मिन् प्राण एवेत्यस्य अस्मिन्नेव प्राणे, न तु मुख्यप्राणे अन्यत्र वेत्यर्थः। प्राणनप्रदे परमात्मनि सुषुप्तत्वादेवायं जागरग्रयासायासपरिहारं लभत इति भावः।

अस्तु तावदिदं कथमपि। सूत्रभाष्ययोराशयस्तावन् प्रागुक्तोधार्यः। एववं 'तद् व्याख्यातम्' इति इन्द्रप्राणाधिकरणातिदेशकरणात् इदमधिकरणं तदुपरि अधिकाशङ्क्या प्रवृत्यमित्यपि सूच्यते। अधिकाशङ्कापरिहारप्रकारौ च श्रुतप्राकाशिकायां दर्शितौ, 'प्रतर्दनविद्यायामुपक्रमे जीवलिङ्गावगमः। महावाक्यस्वारस्यं तु परमात्मपरत्वे। इह तूपक्रमोपसंहारमध्येषु जीवलिङ्गावगमात् अत एव परमात्मनः चिदचिद्वशिष्टतापरत्वाभावेनोपासात्रैविध्याप्रतिपत्तेः प्रातर्द-नन्यायनवकाश इत्यधिकाशङ्का। त्रिविधोपासनाभावेपि जीवातिरिक्तब्रह्म-बोधनरूपप्रयोजनसंभवादस्त्यवकाश इत्यनन्तरसूत्रे विवक्षितोऽधिकः परिहारः' इति। दर्शितभाष्यस्वारस्यश्रुतप्रकाशिकाग्रन्थानुरोधेन च अन्यत् वाक्यजातं नेयम्।

Sri Venkateswara Vedic University

परिष्कारः

नन्वेवं विशिष्टोपासनपरत्वं द्वितीयसूत्रे न विवक्षितं चेत्– अधिकरण-सारावल्यां तद्वर्णनं कथम्– उच्यते। बहुषु तालकोशेषु अत्र श्लोके द्वितीयः पाद एवं पठ्यते, 'प्राणाख्यानं न तेन क्षतिरिह न तथा तद्विशिष्टेऽप्युपासा' इति। व्याख्यानेष्वदृष्टोऽपि बहुतालकोशरक्षितः नञ्घटितः पाठः समुचितो न सहसा प्रतिक्षेपमर्हति। तदयमर्थः– जीवापेक्षयोत्कृष्टे परमात्मनि प्रकरणार्थतया स्थिते सति जीवमुख्यप्राणाख्यानं स्थितमपि न क्षतिकरम्। तावता इन्द्रप्राणाधिकरणोक्तरीत्या जीवविशिष्टोपासनं विवक्षितमिति न मन्तव्यम्। तथा स्वरूपेणोपासनवत् प्रातर्दनोपासनवच्च तद्विशिष्टेऽप्युपासा नेह भवति। किन्तु वाजिवाक्ये आकाशादिपदघटिते जीवस्य ब्रह्माधारकत्वं यथा ज्ञापितम्, तथेहापि प्राणजीवाधारतया ब्रह्मज्ञापनार्थमेव तत्कथनम्। अन्तर्यामिब्राह्मणोक्तरीत्या प्राणजीवाद्याधारतायाः ब्रह्मणि सत्त्वात् तद्रूपेण ब्रह्मज्ञापनार्थमेव प्राणजीवकथनमिति इन्द्रप्राणाधिकरणार्थस्थापना चेत् क्रियते, सा सार्वभौमी हि। प्रतर्दनविद्याभूमाविव बालाकिविद्याभूमावपि सा सुखमवतरतीति। श्लोके प्राणस्येत्यादिस्थापनेत्यन्त-मिन्द्रप्राणाधिकरणार्थस्थापनापरम्। वाजिवाक्यपदं चिन्तामणिग्रन्थ इवान्त-र्यामिब्राह्मणपरम्। सार्वभौमीति प्रकृताधिकरणविषयवाक्येऽपि तदतिदेशसंभव उच्यत इति।

एवञ्च द्वितीयसूत्रस्य विशिष्टोपासनपरतयाऽत्र योजनं यथा श्रुतानुसा-रिबहुग्रन्थविमर्शे सारावलिश्रुतप्रकाशिकासामरस्ये औदासीन्येन सारावलि-प्रसिद्धपाठानुसारेण सुखग्राह्यार्थमात्रसंग्रहदृष्टथेति।।

सचन्द्रलोकभोगोक्ता मुक्तिः पर्यङ्कविद्यया।
ऐहिकामुष्मिकश्लिष्टा मुक्तिः प्रातर्दनीगता।।
केवला मुक्तिरन्ते च प्रोक्ता बालाकिविद्यया।
मुख्यप्राणस्य साक्षस्य मध्ये वैभवमीरितम्।।

प्रकाशिका

क्षेमाय यः करुणया क्षितिनिर्जराणां भूमावजृम्भयत भाष्यसुधामुदारः।
वामागमाद्भगवदावदतूलवातो रामानुजः स मुनिराद्रियतां मदुक्तिम्।।

इति
श्रीमत्ताताचार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवा-
समधिगतशारीरकमीमांसाभाष्यहृदयस्य परकालमुनि-
पादसेवासमधिगतपारमहंस्यस्य
श्रीरङ्गरामानुजमुनेः कृतिषु
कौषीतकिब्राह्मणोपनिषत्प्रकाशिका संपूर्णा।।
श्रीरस्तु।।
श्रीमते रङ्गरामानुजमहादेशिकाय नमः

परिष्कारः

इत्थमिशाद्युपनिषत्परिष्कारविधायिना।
वेदान्तलक्ष्मणाभिमुख्ययोगीन्द्राङ्घ्यब्जसेविना।।
रङ्गलक्ष्मणयोगीन्द्राल्लब्धवेदान्तसंपदा।
विविधग्रन्थनिर्माणसिद्धसाधुप्रसक्तिना।।
वीरराघवसंज्ञेन वात्स्यसच्चक्रवर्तिना।
कौषीतकिश्रुतिशिरः परिष्कारः क्रमात् कृतः।।

इति वात्स्यसच्चक्रवर्तिवीरराघवाचार्यकृतः
कौषीतक्युपनिषद्भाष्यपरिष्कारः
श्रीमते हयवदनपरब्रह्मणे नमः
श्रीरस्तु।। शुभमस्तु।।

Sri Venkateswara Vedic University

ऋतं वदि वक्तारम्। मयि भर्गो मयि महो वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविराविर्मयोऽभूर्वेदसा मत्साऽऽणीर्ऋतं मा मा हिंसीपने-नाधीतेनाहोरात्रात्संवसाम्यग्र इला नमं इला नम ऋषिभ्यो मन्त्रकृद्व्यो मन्त्रपतिभ्यो नमोऽस्तु देवेभ्यः शिवा नः शंतमा भव सुमृलीका सरस्वति मा ते व्योम संदृशि। अदब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः।। १ ।।

ॐ शान्तिः शान्तिः शान्तिः।।

दीपिका

कौषीतकिब्रह्मण आत्मविद्या गुप्ताऽपि सम्यक्प्रकटीकृतेयम्।।
लोकोपकाराय मया श्रुतीनां पदावलोकैकपरेण नित्यम्।।१।।
त्रय्या अथर्वाङ्गिरसश्च तद्वद्ये वा प्रसिद्धा इह लोकमध्ये।।
अतो मयाऽकारि पदावलोकस्तेषां कृतेऽस्मिञ्शिव एतु तुष्टिम्।।२।।
गङ्गादयः शीतलनीरपूरा नैवोऽऽश्रिताश्चेत्सरितोऽह्यभाग्यैः।।
न्यूनत्वमासां किमिवात्र भूयान्नमापि तद्वत्कृतयः प्रवृत्ताः।।३।।
आत्मावबोधाय मदुक्तिवारां प्रवृत्तिरेवोपनिषत्संमूहे।।
विबुध्य सन्तः सततं स्वचित्तं प्रक्षालयन्तु प्रविमुक्तिकामाः।।४।।
सर्वं न सर्वस्य हितं प्रियं वा व्यवस्थितं येन लभामहेऽदः।।
प्रिया हितास्तेन विमुक्तिभाजां पदावलोका विहितास्ततोऽमी।।५।।

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यश्रीशङ्करानन्दभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां चतुर्थोध्यायः।।४।।

समाप्तेयं सदीपिका कौषीतक्युपनिषत्।।

Sri Venkateswara Vedic University